जीवानन्दनम्_ of आनन्दरायमखि
with the commentary रसायन (according
to आयुर्वेद Points of View) by Pt.
नारायणदत्त वैद्य - Edited by Pt. ~~हरि~~
हरिशास्त्री दाधीच.
खुर्जा-जयपुर, 1990 Vikram era.

38

[struck out]

आयुर्वेद 1226

॥ श्रीः ॥

जीवानन्दनम्

(नाटकम्)

रसायनटिप्पणसमुल्लसितम् ।

श्रीमदानन्दरायमखिप्रणीतं

जीवानन्दनम् ।

'खुर्जा'नगरवास्तव्य-भिषगाचार्य-पंडितनारायणदत्तवैद्य-
कृतरसायनटिप्पणसमुल्लासितम् ।

जयपुरनिवासिना
साहित्यमहोपाध्याय-कविभूषणाशुकवि-पंडितश्रीहरिशास्त्रिणा
दाधीचेन संशोधितम् ।

तदिदं
प्राणाचार्य-भिषगाचार्य-वैद्यरत्ना-ऽऽयुर्वेदमार्तण्ड-पण्डित-
श्रीलक्ष्मीरामस्वामिना मुद्रापयित्वा प्रकाशितम् ।

१९९० विक्रमाब्दे

प्रथमावृत्तिः १००० [redacted]

॥ श्रीः ॥

अर्पण-पत्त्रम्

निखिलशास्त्रपारपारावारीणेषु काशीस्थविद्वन्मण्डलमूर्धन्येषु निःसीमकारुण्यामृतरसपरिपूर्णमानसेषु श्री० ६ गुरुवर्य्य श्रीचण्डीप्रसादसुकुल-शास्त्रि-महाशयेषु प्रणतिपूर्वकं निवेदयते—

भगवन् ! अत्र भवतां पादपद्मोपसेवया ।
लब्धेन बोधलेशेन यच्चापलमचीकरम् ॥ १ ॥
तदेतट्टिप्पणं नाम जीवानन्दरसायनम् ।
भक्त्या श्रीमच्चरणयोर्बद्धाञ्जलि समर्पये ॥ २ ॥

इति

खुरजा
चैत्र सुदी १५ चंद्रवार
१९९० वि०

सेवको—
नारायणदत्तवैद्यः

श्रीहरिः ।

भूमिका

समस्तेऽपि संस्कृतवाङ्मये प्रायस्त्रिविधानि नाटकानि दृग्विषयतामुपयान्ति—अभिनयप्रधानानि, यानि सर्वांशतो वा कञ्चिदंशमपहाय परिवर्त्त्य वाऽभिनेतुं शक्यन्ते; विषयविशेषप्रत्यायनप्रयोजनानि, येषु चेतनान्यचेतनानि वा तत्तानि पात्राणि मृषा परिकल्प्य किमप्याध्यात्मिकं वा व्यावहारिकं वा रहस्यमवबोध्यते; कविकर्ममात्रप्रधानानि, येषु श्रव्यकाव्येष्विव केवलं शब्दार्थसामग्रीपरिष्करण एव कवेः संरम्भो दृश्यते । तत्र शाकुन्तलोत्तररामचरितप्रभृतीनि प्रायः प्रथमवर्गे, प्रबोधचन्द्रोदयप्रभृतीनि प्रायो द्वितीयवर्गे, अनर्घराघवप्रभृतीनि तु प्रायस्तृतीयवर्गे प्रविशन्तीति नाऽतिरोहितं कविकर्ममर्मविदुषां विपश्चिताम् ।

तदेवमिदं प्रेक्षावतां पुरस्तात् प्रस्तूयमानं 'जीवानन्दनं' नाम नाटकं यद्यपि नाटकदृष्ट्या द्वितीयवर्गे एवान्तर्भवति, तथापि विविध-

---

१—अत्रेदं तत्त्वम्—नाटकानां दृश्यकाव्यत्वात् काव्येषु दृश्यत्वस्य चाऽभिनयैकमूलत्वात् काव्यजीवितभूताया रसादिव्यङ्ग्यसामग्र्याश्चाभिनयेनैव कार्त्स्न्येनाऽभिव्यञ्जनीयत्वान्नाटकेष्वभिनयप्रधानानां भवति प्रथमा कोटिः । विषयविशेषप्रत्यायनप्रयोजनानां पुनः, पात्रपरिकल्पनस्य तादृशदुरधिगमविषयबोधने दृष्टान्तविधया सौकर्यसंपादकत्वाद् दृष्टप्रयोजनत्वेऽपि, वस्तुतो दृश्यकाव्यत्वाभावाद् विशेषतो रसाद्यव्यञ्जकत्वाच्च भवति द्वितीया कोटिः । कविकर्ममात्रप्रधानानां त्वनभिनेयत्वेन पात्रप्रयोगस्याऽनतिप्रयोजनीयतया दृश्यकाव्यताविरहात् सत्यामपि रसादिव्यङ्ग्यसामग्र्यां श्रव्यकाव्येभ्यो विशेषतोऽनतिरेकान्नाटकदृष्ट्या भवति तृतीयैव कोटिरिति दरनिमीलितनयनैर्निध्यातव्यं नाट्यशास्त्रहृदयज्ञैः ।

शास्त्रेषु लोकव्यवहारे च प्राप्तप्रावीण्येन प्रगल्भप्रवरेण कविकुञ्जरेणाऽऽनन्दरायमखिनाऽत्र परमरमणीयया पात्रपरिकल्पनया, कमनीयकविकर्मकौशलेन, हृदयहारिणा शब्दसंदर्भेण, साहित्यायुर्वेद—वेदान्त—पातञ्जलादिविविधागमरहस्यस्फुटीकारेण च तथा नैपुण्यं निदर्शितं, यथा-तत्तच्छास्त्रतत्त्वविदां विदुषां न न नितरां संतुष्येत् स्वान्तम् ।

तत्र प्रथमतः पात्रपरिकल्पनमेव पश्यामः । अत्र हि—

पक्षः	प्रतिपक्षः
राजा—जीवः	राजयक्ष्मा
महिषी—बुद्धिः	विषूचिका
मन्त्री—विज्ञानं ज्ञानं च	पाण्डुः[1] (युवराजश्च)
सेनापतिः—राजमृगाङ्कः[2] पूर्णचन्द्रोदयश्च	संनिपाताः
सैनिकाः—औषधानि	रोगाः

इमानि प्रधानपात्राणि । तत्र **जीवस्य** देहेन्द्रियादिसर्वाध्यक्षत्वं **राजयक्ष्मणश्च** सर्वरोगमूर्धवर्तित्वं सर्वजनप्रसिद्धमिति न समर्थनसापेक्षम् । **बुद्धेर्जीवगृहिणीत्वं** तु जीवस्य सर्वदा तदायत्तत्वात् सर्वकार्येषु तत्सहचारित्वाच्च सिद्धमेव, अत एव श्रीमद्भागवते पुरञ्जनोपाख्यानेऽपि तस्यास्तथात्वम् । **विषूचिकाया** यक्ष्मगृहिणीत्वं पुनः प्राणापहारित्वे तुल्यबलत्वात्, यक्ष्माक्रान्ता इव विषूचिकाक्रान्ता अपि केचनैव जीवन्तीति । उचितं चैतत्, 'वैरं विवादो मैत्री च नोत्तमाधमयोः क्वचित्'

१—पाण्डोर्मुहुर्मुहुर्युवराजत्वमात्रमुल्लिखितमवलोक्य तस्य मन्त्रित्वे न संशयितव्यम्, १४७ पृष्ठे तस्य स्पष्टं मन्त्रित्वनिरूपणात् ।

२—यद्यपि राजमृगाङ्क-पूर्णचन्द्रोदययोर्न कण्ठतः सेनापतित्वं प्रतिपादितं कविना, तथापि षष्ठेऽङ्के ८०-८१ पद्याभ्यां तयोरेवाऽऽधिपत्यमभिव्यञ्जितं सेनायामिति द्रष्टुं शक्यते ।

इति न्यायात्। न च विषूचिकाया यक्ष्मणः पृथगेवाक्रमणं जीवे दृश्यते इति सहचारित्वाभावेन नोचितं तस्या यक्ष्मगृहिणीत्वमिति शङ्क्यम्, राजगृहिणीनां सङ्गरे स्वामिसहचारस्य प्रतिष्ठाप्रतिकूलत्वात्। पृथगाक्रमणं तु नाऽनुचितम्, वीरपत्नीनां स्वयमपि युद्धकृतेरितिहासेषु श्रूयमाणत्वात्। ज्ञान-विज्ञानयोर्जीवमन्त्रित्वे तु नाऽस्त्येव किञ्चिद्वाच्यम्, यतोऽलौकिके वस्तुनि ज्ञानसाहाय्येन लौकिके तु विज्ञानसाहाय्येन प्रक्रमते जीव इति विस्पष्टमेव। **पाण्डोः** पुनर्यक्ष्मणो युवराजत्वं मन्त्रित्वं च कल्पयता कविना न मनागप्यनौचित्यं स्पृष्टम्, तस्य राजयक्ष्मपुरोवर्त्तित्वादंशेन तद्रूपवहत्वात् तत्प्रवृत्तौ सौकर्यसंपादकत्वाच्च। सेनापतित्वमपि पक्षे **राजमृगाङ्क-पूर्णचन्द्रोदययोः** प्रतिपक्षे तु संनिपातानामुचितमेव स्व-स्ववर्गे सर्वप्रधानत्वादिति नेह किमप्यधिकमुपन्यसितुमपेक्षितम्। **औषधानां रोगाणां** च सैनिकत्वं तु प्रत्यहं प्रतिव्यक्ति चाऽनुभूयमानमिति विमर्शनलेशमपि न सहते। अनयैव दिशा कुशाग्रीयधिषणैरितरत्रापि निधेया दृष्टिः। अस्माभिस्तु विस्तराद्विभ्यद्भिः सर्वपात्रविमर्शाद्विरम्यते।

अथ वस्तु विमृश्यताम्—कविनेह असंयतात्मनामुपरि रोगाणामाक्रमः, औषधैस्तत्प्रतिनिवृत्तिः, योगेन भगवद्भक्त्या च सर्वांशेन रोगनिराकरणं शिवपदप्राप्तिश्चेति वस्तु संक्षिप्येह निरूपितम्। तत्र—

प्रथमेङ्के—कविना पूर्वं धारणाविज्ञानयोः प्रवेशः कारितः। धारणा हि 'ध्येये चित्तस्य स्थिरबन्धनम्'। विज्ञानस्य हि सा सर्वतोऽधिकमपेक्षितं वस्तु। न हि चित्तस्य स्थिरबन्धनमन्तरा विज्ञानं प्रभवत्यन्वेषितुं चाऽऽविष्कर्त्तुं च किमपि। अत एव कविना धारणाविषये विज्ञानमुखेनैतदाभिधापितम्—"तव न किञ्चित् प्राणिनाम-

न्तर्गतमविदितमस्ती"ति । किञ्च हितमहितं चाऽपि जीवस्य तदधीनमेव, यतः संकल्पप्रभव एव हि सर्वो व्यवहारः, संकल्पस्य परा काष्ठा च धारणा । तदेतत् कविना—

बुद्ध्या महत्या कृतसाहचर्या देवे निजे दर्शितभूरिभक्तिः ।
परप्रवृत्तिं विदती महिम्ना साधारणा त्वं त्वहिते हिते च । १-२४

इत्यत्र श्लेषेण स्वयमेव प्रतिपादितम् । तेन 'सद्विषया धारणा हितसंपादिका, इतरा त्वहितसंपादिका' इति वस्तु परोक्षेणाऽवबोधितम् ।

ततश्चासावधाने जीवे यक्ष्मणो यक्ष्मभृत्यानां रोगाणां चाक्रमणं धारणया बोधितम् । अथाऽकस्माद्राजयक्ष्मभृत्याक्रमणं संभावयता जीवेन तत्प्रतीकाराय शिवं प्रसाद्य रसगन्धकौ समधिगन्तव्याविति विज्ञानेन निवेदितम् । प्रसिद्धं च गन्धकजारितस्य पारदस्य राजयक्ष्मादि सर्वरोगनाशकत्वम् । तथा हि योगरत्नाकरे—

समे गन्धे तु रोगघ्नो द्विगुणे राजयक्ष्मनुत् ।
जीर्णे तु त्रिगुणे गन्धे कामिनीदर्पनाशकः ॥
चतुर्गुणे तु तेजस्वी सर्वशास्त्रविशारदः ।
भवेत् पञ्चगुणे सिद्धः षड्गुणे मृत्युनाशनः ॥

स्वयं कविना चाऽशीतितमे पृष्ठे प्रदर्शितानि कानिचन तदुभयप्रभावसूचकानि पद्यानि । अथैतं विज्ञानमन्त्रमनुसरतो बुद्धिसहकृतस्य जीवस्य शिवभक्त्यनुष्ठानमन्ते निरूपितम् ।

द्वितीयेऽङ्के—लोके राजयक्ष्मणः पुरोवर्त्तित्वेन प्रत्यक्षीकृतः कासो जीवस्याऽन्तर्मुखत्वे विघ्नमाचरितुं प्रापयति प्रवृत्तिं यक्ष्मणो युवराजस्य सचिवस्य च पाण्डोः सविधे, यक्ष्मणः सविधे च । अत्र हि कासस्य यक्ष्मचरतां बोधयता कविना कासोपेक्षा न विधेयेति सूचितम् । ततः पाण्डुः स्वसहायभूतै रोगैः सह मन्त्रयते, यतते चाऽऽक्रमाय जीवे, अत्र

मन्त्रणाप्रकरणे के के व्याधयः कथं कथमुपद्रवन्तीति सुनिपुणं निरूपितमित्यतिरोहितमेव भविष्यति पुस्तकमेतत्प्रेक्षिष्यमाणानाम् ।

तृतीयेऽङ्के—नागरिकेण विचारेण गद(हृद्रोग)निग्रहे विहिते विज्ञानेन पुरं (देहः) परिष्क्रियते । जीवश्च प्राप्नोति रस-गन्धकौ शिवप्रसादेन । परं लब्धावप्येतौ विज्ञानमन्तरा न किमपि कार्यं साधयितुं शक्तौ । यतो विज्ञानं हि सर्वविधविधेयेष्वावश्यकम् । तदेतत् स्वयं कविनैवाऽभिहितमपि ।

ऋषिरेव विजानाति द्रव्यसंयोगजं गुणम् ।
विज्ञानशर्मणः कोऽन्यः सर्वज्ञाननिधिर्ऋषिः ।

तेन रसगन्धकप्रयोगविज्ञानपटीयसि नाक्रामन्ति रोगाः केचन, न च राजयक्ष्माऽपीति साधितम् ।

चतुर्थेऽङ्के—राजधर्मानाचरताऽपि राज्ञा भगवद्भक्तिर्न विस्मरणीयेति निपुणं प्रदर्शितम् । प्रसङ्गेन ऋतुचर्यादिकं च वर्णितम् । प्रकटिता च सरसकाव्यनिर्माणशक्तिः । स एषोऽङ्कः कवेः कविकर्मकौशलावलोकनकामुकैरवश्यमवलोकनीयः ।

पञ्चमेऽङ्के—कविनाऽऽभ्यन्तरशत्रूणां कामादीनां वशीकारोपायः प्रदर्शितः । तत्र कामलोभयोर्भगवद्ध्यानविषयता, क्रोधस्य तु मत्सरादिषु पातः, दम्भस्य नाशः, मदस्य तु निरोधः सूचितः । युक्तं चैतत्— लौकिकविषययोरेव कामलोभयोरनिष्टजनकत्वात्तयोरलौकिकवस्त्वभिमुखीकरणे दोषाजननस्य दृष्टचरत्वात् । क्रोधः पुनर्दोषरूपोऽपि तदितरदोषविनाशेऽपेक्षितायास्तीव्रतायाः संपादकत्वान्न सर्वथा हेयः । अत एव श्रीमद्भागवतेऽपि—

कामं दहन्ति कृतिनो ननु रोषदृष्ट्यारोषं, दहन्तमपि ते न दहन्त्यसह्यम् ।
सोऽयं यदन्तरमलं निविशन् बिभेति, कामः कथं नु पुनरस्य मनः श्रयेत ॥

इत्यभिहितम् । लौकिकविषयस्तु स हेय एवेत्यत्र किमस्माभिर्वाच्यम् । दम्भस्तु न कथमप्युपयोगीति तस्य परित्याग एवोचितः सताम् । अथ यद्यपि मदस्याऽपि विद्यते दम्भवदेवाऽनिष्टजनकत्वम्, तथापि दैवानुकूल्येन कार्यसाफल्यवतां सर्वांशेन तस्याऽनुत्पत्तिरसंभविनीति तन्निरोध एव भवितुमर्हति न सर्वथा त्यागः । तेन तथा निरूपयता कविना दर्शितं मानुष-मानसविज्ञानमित्यत्र न संशयलेशोऽपि । ततश्च कविर्मानसदोषेषु केवलं मत्सरमेवाऽवशेषयति, तन्नाशः केवलया भगवद्भक्त्यैव शक्यसंभव इति । तदेतत् सप्तमेऽङ्के दर्शयिष्यते कविना ।

षष्ठेऽङ्के--सर्वजगत्परिचालके कालकर्मणी कविर्दर्शकत्वेनोपस्थापयति । तत्संवादमुखेनैव तयोः स्वरूपं च निर्दिशति । तदनन्तरमाध्यात्मिकज्ञानरूपं 'ज्ञान'माश्रयन्तो ये जना व्यवहारादिज्ञानरूपं 'विज्ञानं' सर्वथा परिजिहीर्षन्ति तान् वस्तुतत्त्वमुपदेष्टुं ज्ञानेन जीवस्योपजापं विज्ञानेन तत्समाधानं च कारयति कविः । विज्ञानमुखेन—

पुरस्य दार्ढ्र्यं योगस्य सिद्धिः सर्वार्थसाधिनी ।
अखण्डानन्दसिद्धिश्च फलं तेनैव जायते ॥

इत्यादि प्रतिपादयन्नवबोधयत्यावश्यकत्वं शरीररक्षणस्यैहिकामुष्मिकोभयविधोन्नतौ । ये पुनरसमर्थाः स्वास्थ्यरक्षणादिव्यावहारिकविषयेषु देहाभिमानत्यागं विडम्बयन्ति, तेऽपि—

श्लथाभिमाने पुरि हन्त देवे क्षोभो भरेत् त्वत्प्रकृतिष्वकस्मात् ।
ततोऽवकाशं प्रतिलभ्य सर्वे प्रत्यर्थिनस्ते प्रबला भवेयुः ॥

इत्यादिना प्रारब्धकर्मनाशात् पूर्वं देहाभिमानत्यागे हानिं बोध्यन्ते ।

ततो यक्ष्मप्रेरितव्याधिषु प्रथमं भस्मकमपथ्यतां च प्रवेशयता कविना मिथ्याबुभुक्षयाऽऽकुलिता लोका अपथ्यमश्नन्तो रोगिणो भवन्ति, प्रयान्ति च परम्परया राजयक्ष्मादिमहारोगाणां वश्यतामिति वस्तु बोधितम् ।

अथाऽपथ्यजुषि जीवे रोगपरवशो स्वदोषानपश्यति

त्वदुपदेशवशंवदचेतसा वपुषि नश्वरके ममतां वृथा ।
विदधता शिवभक्तिरसायनं शिवशिवाऽन्तरितं परमार्थदम् ॥

इत्थं विज्ञानमुपलभमाने पुनरपि विज्ञानेन

पुराभिमानो न वृथा तद्दार्ढ्येन विना कथम् ।
चित्तस्वास्थ्यम् ? विना तच्च शिवभक्तिर्दृढा कथम् ॥

इत्यादि समाहितम्, धैर्येण रोगविजयश्चोपदिष्टः । ततो विविधभेषजैः साध्यरोगविजयो वर्णितः । इत्थमस्मिन्नङ्के लौकिकीमलौकिकीं चोन्नतिमभिलष्यतां स्वास्थ्यसंरक्षणस्य साध्यरोगविजयस्य च परमावश्यकत्वमुपपादितम् ।

सप्तमेऽङ्के—सिद्धेऽपि साध्यरोगविजये संचितकर्मणां परिणामरूपा असाध्यव्याधयो व्याकुलयन्ति जीवम्, मत्सरस्य तावत्पर्यन्तमप्यविनाशात् । ते च मत्सरश्च भगवद्भक्त्यैव जेतुं शक्या इति प्रथमतः शिवभक्त्यनुष्ठानमुपवर्णितम् । ततः प्रसन्नेन भगवता साम्बेन शिवेन साङ्गयोगोपदेशः, योगानुष्ठानेन च जीवस्याऽऽत्यन्तिकी श्रेयः संपत्तिरिति वस्तु वर्णितम् ।

अन्ते सर्वसंदर्भसंक्षेपश्च जीवमुखेनैवमावेदितः कविना ।

मन्त्रिन् ! जन्मैव दोषः प्रथम—मथ तदप्याधिभिर्व्याधिभिश्च-
जुष्टं, कष्टं बताऽतः किमधिकमपितु त्वन्मतैर्वैभवेन ।
देव्या भक्त्याः प्रसादात् परमशिवमहं वीक्ष्य कृच्छ्राणि तीर्णः
सर्वाणि द्राक्, तदत्यद्भुतमिह शुभदं संविधानं तवेदम् ।

तदेवं लोके ज्ञान-विज्ञानसाचिवेन जीवेन प्रेयःप्राप्तिसमकालमेव भगवद्भक्त्या योगसिद्धिमधिगत्य स्वस्य श्रेयः संपादनीयमिति वस्तु नाऽतिविस्तरेण नाटकेऽस्मिन् निरतिशयं निर्णीतम् । सेयं दिक् । कुशा-

श्रीयाधिषणैः पुनरितोऽप्यधिकं सूक्ष्म-सूक्ष्मं विमर्शनीयमिति विरम्यते विफलाविस्तरात् ।

टिप्पणम्

नाटकमेतज्जयपुरीयायुर्वेदाचार्यपरीक्षायां पाठ्यपुस्तकत्वेन नियतमस्ति, किन्तु व्याख्यानविरहाच्छात्राणामासीत् क्लेशः । तमेतमसहमानैरायुर्वेदमार्त्तण्डस्वामिश्रीलक्ष्मीरामजीमहाभागानां प्रियशिष्यैः खुर्जानगरनिवासिभिः श्रीनारायणदत्तशर्माभिषगाचार्यैष्टिप्पणविधानेन सुमहदुपकृतश्छात्रलोकः पाठकपण्डितवर्गश्चेत्यत्र किंनाम वक्तव्यम् ? यद्यपि विस्तरभिया संक्षिप्तं टिप्पणमेवैतद् विहितम्, तथापि त्रिदोषकालकर्मादिस्वरूपनिरूपणे, तत्तच्छास्त्रीयपारिभाषिकशब्दार्थप्रदर्शने, औषधप्रयोगसंग्रहे च व्याख्यात्रा स्ववैदुष्यं यथेष्टं प्रदर्शितमिति तु तटस्थेनाऽपि स्वीक्रियेतैव ।

उपकारस्मरणम् ।

अथेदमावश्यकमवसाने निवेदनीयम्—यत् संस्कृतपुस्तकप्रकाशकानां दृष्टदौर्लभ्येऽस्मिन् समये लाभलालसाविहीनैः केवलं कवेः कीर्त्तिरक्षाकामुकैर्जयपुरीयसंस्कृतविद्यालये आयुर्वेदप्रधानाध्यापकैर्व्याख्यातृमहाशयस्य गुरुचरणैः पूर्वोक्त स्वामिमहाभागैरध्येतृवृन्दसौलभ्यसंपादनाय पुस्तकमेतत् स्वीयव्ययेन मुद्राप्य प्रकाशयद्भिर्निरतिशयमुपकृतश्छात्रसंघः सुरसरस्वती-साहित्य-सुधारसिकः सुधीसमुदायश्चेति पुनरुक्तप्रायमेव ।

अस्य ग्रन्थस्य संशोधका अस्माकं प्रियसुहृद्वराः श्रीहरिशास्त्रिणस्तु धन्यवादानर्हन्त्येवेत्यलमति प्रपञ्चितेन ।

प्रौष्ठपदी पौर्णमासी १९९० विक्रमवत्सरः	पुरुषोत्तमशर्मा चतुर्वेदः । साहित्याचार्यः शुद्धाद्वैतालङ्कारश्च

आवश्यकं किञ्चिदावेदनम् ।

इह किलानेकविधसुन्दरबन्धुरसन्दर्भकल्लोलवति साहित्यसरस्वति गभीरतरे ये ये यावद्बुद्धिबलोदयं कवयः सहृदयाः समाविशन्ति, ते ते किञ्चिदलौकिकचमत्कृतिगुणपूर्णं तूर्णमेव नूत्नं प्रत्नं वा रत्नं समासादयन्ति, धन्या मान्याश्च भवन्ति तेनैवेति सार्वजनीनम् । तदनुसारमेवाद्य संस्कृतसाहित्यरत्नाकरस्यैकं 'जीवानन्दनं' नाम नाटकं प्रत्नं रत्नं दृग्गोचरीभूतम । विलक्षणचमत्कृतिगुणपूर्णोऽयं सन्दर्भः समीक्षितः, सपरामर्शमावर्तितो, दृशा वाचा मनसा तु, निधिरिव गुणानां, भूमिरिव भावानां, परिचितिरिव सरलतायाः, पात्रमिव प्रसादस्य, मन्दिरमिव माधुर्यस्य, प्रदर्शनमिव प्रकृतीनां, सिद्धौषधिरिव दुःसाध्यरोगाणाम्, निकष इव रचनावैचित्र्यस्य, उपवनमिवोच्चैःकल्पनानां व्यायामक्षेत्रमिवाचेतनव्यवहाराणां स्रोत इव महेश्वरभक्तेः रसायनशालेव वैद्यानाम् गुरुरिव गूढोपदेशस्य प्रतिभाति प्रतिभावतां सर्वेषाम् ।

अत्र हि समस्तवैद्यौषधसमुदायतोऽप्यसाध्यता-प्रख्यातिमारूढं राजयक्ष्माणं (रोगविशेषं) प्रति प्रतिविधानं सुखसंविधानं निबद्धम । तथा हि असाध्या अपि रोगाः शिवाराधनतः सुसाध्या भवन्तीति, यक्ष्मणि च प्रबलेऽपि भगवतः श्रीचन्द्रमौलेः साम्बस्य समुपासनं समुपदिशतां प्रायशस्तन्त्राणां तत्त्वमादाय पारदगन्धकादिरसायनानां नवजीवनसंचारनैरोग्यबलपुष्टिप्रदानसामर्थ्यं प्रकटितं नाट्यकलाकुशलेन समाराधितचन्द्रमौलिना कविनाऽऽनन्दरायमखिना ।

सदुपदेशपूर्णमपि विशेषत आयुर्वेदविद्याप्रबोधकं धर्मोपादेय व शासकमास्तिक्यदृढीकरणं च सर्वसाधारणानामपि सुरभारतीप्रणयिनां

हिन्दुसन्तानानाम् । तदिदं नाटकं कवित्वचमत्कारशून्यमिति यदतां काव्यमालासम्पादकानां म० म० श्रीदुर्गाप्रसादपण्डितानां का नाम निर्णीतिरीतिरिति त एव जानन्तु । वयन्त्वित्थमनुमिनुमो यदिमे महाभागाः प्रायशो यूरोपभाषापण्डितानां (पाश्चात्याविदुषां) निर्णयानुसारमेव स्वकीयं संमतं, स्थिरयन्तिस्म, विरलेषु निबन्धेषु प्रख्यातेषु विवेचनं किंचिदञ्चयन्तः कुतश्चनांशतो विरुद्धयन्ति स्मापि । तदिति स्वप्रक्रमानुसारमत्रापि यूरोपीयप्राच्यनाटकविवेचनपरेण "संस्कृतनाटकानि" इति नाम पुस्तकप्रणेत्रा 'कीथ" महाशयेन जीवानन्दनोपरिलिखितं 'They have no merits' इति संमतमालोक्यैवाङ्कितं, कार्यबाहुल्यात्समयाभावाद्वा वर्णनीयस्य दुरूहविषयतया वा न स्वयं विचारधारानिकषे कषित्वेति निःसन्देहोयमूहः ।

यदि ते कंचन विचारं समाकलयिष्यन् ननु नैवमलेखिष्यन् । प्रकाण्डपण्डितत्वात्तेषाम् । यदग्रे च तत्रैव तैः "सम्विधानकमनुच्छिष्टं चिकित्साशास्त्रानुकूलमिति कृत्वाऽस्य काव्यमालायां प्रवेश" इत्यपि भणितत्वात् इति न विशेषं ब्रूमः ।

"कीथ" महाशयेन तु यदङ्कितं किमपि, तत्सारहीनं, नाटकसाहित्यविवेचानाविमर्षनिबन्धनञ्च, गुणशून्यतायां चमत्कृतिराहित्ये

---

(१) अत्र वयं कीथ महाशयस्य संमतं तद्ग्रन्थतो यथास्थितमुल्लिखामः पाठकानां विमर्शनाय—

यथा—

Two Śaiva dramas are the *Vidyāparinayana* and *Jīvānandana* written at the end of the seventeenth and beginning of the eighteenth century. They have no merits."

—Keith, *The Sanskrit Drama, pp.* 253.

चास्य तत्कृतप्रमाणप्रदर्शनाभावात्, न हि तैः किंचनास्य नाटकस्य पद्यं गद्यं वा, पात्रं तदाभाषणं वा, वस्तु प्रतिवस्तु वा, विचारं समाचारं वा, कल्पनं विरचनं वा, अंशतोऽप्युद्धृत्य पाठकानां पुरस्तान्निवेदितं, तथा सति तु तदूरीकरणे न कस्यापि दुराग्रहः। न च तैः कृतं तदिति न रमणीया तेषां भणितिः। किं बहुना पाठकमहाभागाः सकृदेवैतत्पठित्वा स्वयमेव ज्ञास्यन्ति वदिष्यन्ति च 'कीथ'-महानुभावस्य संमतं राज्ञामाज्ञामात्रमस्तीति। "पाणिस्थकंकणकृते किमु दर्पणेन" इति न्यायात्।

मन्ये—प्रथमं तु साहित्यरसध्वन्यलङ्कारभावनिबद्धोयं निबन्धः, ततो भैषज्यकलाकौशलसंवलितः, ततोऽपि शिवभक्तिसदुपदेशविशेषवान्, तदुपरि विचित्रपात्रकल्पना—गौरवशाली, कथं कियतावौचित्येन, कीदृशान्वर्थ्येन, किंविधेन विज्ञानेन, तद्विवेचनं प्रत्नदार्शनिकानामध्यात्मविद्याधुरन्धराणां प्रथमसोपानमप्यनुपलब्धारो वयं दूरं वैदेशिकाः अद्यावध्यपि नव्यदर्शनविरचनेऽनासादितस्थैर्याः कथं धैर्येणार्यान्प्रबोधयिष्याम इति न विचारधारायामिदं नाटकं नीतवान्, तत एव नानुशीलितवान्, अत एव च न लिखितवान्, अस्य गुणसम्पदम् इति।

पाठकानां करतलामलकायमानोऽयं जीवानन्दनाभिधो रूपकस्यादिमो भेदः, मोहमयीनगरस्थनिर्णयसागरीय काव्यमालायाः (२७) सप्तविंशतिसंख्यायां प्रकाशित एकनवत्यधिकाष्टादशशततमे क्राइष्टसंवत्सरे। सोऽयं सन्दर्भो बहुषु स्थलेष्वशुद्ध आसीदिति प्रकाशकानां मुद्रणाधारपुस्तकस्य तथाभूतत्वं हेतुरितिकाव्यमालासम्पादकैरप्यूरीकृतम्। कृतबहुलान्वेषणोपक्रमैरपि तैरस्य (नाटकस्य) एकमेव पुस्तकं जयपुरराजगुरुकुलप्रसूतश्रीकृष्णकुमाराणां संग्रहादुपलब्धम्। तदाधारेणैव मुद्रापितमिदमिति यत्र तत्र स्थलेषु तत्कृतसन्देहचिह्नानि समुल्लसन्ति श्वित्राणीव रोगिणः श्यामले वपुषि।

यथामुद्रितमपि कालक्रमादनुपलब्धिपदमारूढमवेद्य खिद्यन्तेस्म तत्कवित्वानुबुभूषूणां, तदनुपमभावबुभुत्सूनां, तदनुच्छिष्टसंविधानकं दिदृक्षूणाम् , आनुपूर्वीतस्तत्पिपठीषूणां च च्छात्राणां जिज्ञासूनां सहृदयानां विदुषां कवीनां पाठकानां चेतांसि, यदत्र नास्ति काचनापि व्याख्या, या तदीय विसंष्ठुलस्थलानि सरलयन्ती गभीरानायुर्वेदसम्बन्धिनो भावानवभासयन्ती, चिरं रंजयेत् तेषां तेषां जिज्ञासूनां सहृदयानां हृदयानि । न च किंचन टिप्पणमेवोट्टङ्कितं केनचिद्विचक्षणेनेति महतीयमुपेक्षा प्रेक्षावतामभूदत्र ।

वर्णनीय–सम्विधानकस्य नितान्तं विचित्रारोप्यारोपकभावतयाऽप्यायुर्वेदगंभीरविषयत्वमेव साहित्यसेविनां बुधानां वैयाकरणानामप्यत्रोपेक्षणे कारणत्वं प्रमिण्वन्तो वयमित्थं मनः समादध्मः, यत् यो हि नाम साहित्यव्याकरणन्याययोगवेदान्ताद्यावश्यकज्ञातव्यविषयविशिष्टो भैषज्यतन्त्रकुशलो मनीषी "सुगन्धवत्सुवर्ण" भवेत् स हि कुर्यात् व्याख्यानमेतादृशस्य विलक्षणगुणचमत्कृतिवर्णनानिपुणस्य निबन्धस्य, नान्य इति । आस्तां तावत् ।

तदिदं नाटकं कालक्रमप्राबल्यात्कवेरस्य ग्रन्थगुम्फकस्य स्वदृष्टोदयाद्वा, नूतनसंविधानप्रवृत्त्यनुरागाद्वा विचित्रकल्पनाप्रधानाद्वा चेतनाचेतनानां रणरणनवत्वाद्वा चमत्कृतरोप्यारोपकसद्भावाद्वा जयपुरराजकीयसंस्कृतशिक्षाविभागपाठ्यक्रमनियोजकसमित्या (बोर्ड) आयुर्वेदशास्त्राचार्य-परीक्षायां न्ययोजि ।

तत्र नियुक्ते चास्मिन् , अधुना न सुलभोऽयं ग्रन्थ इति, नास्य किंचिद्व्याख्यानमिति, न वर्त्ततेऽत्र स्वल्पमपि टिप्पणमिति, नास्य तत्त्वावबोधकरोऽध्यापकोऽपीति, कथं चास्योत्कर्षं पारयिस्यामो ज्ञातुमिति, कथं च तर्तुं शक्ष्यामः परीक्षाम्बुधिमित्यादिबहुविधास्त्रुटीर्विद्यार्थिनां पण्डिताना-

मपि च पुरस्तात्प्रस्फुरन्तीः समाकलय्य लोकोपकारपरायणैरुदारैः सभास्तारैर्जयपुरसंस्कृतकालेजप्रधानायुर्वेदाध्यापकैः श्रीलक्ष्मीरामवैद्यमार्तण्डैरिदं प्रकाशयितुं प्रतिश्रुतमाकर्ण्य प्रहर्षपुलकितगात्रैश्छात्रैः सविनयं निवेदितास्त एव देशिकेन्द्रा सर्वलोकाभिरामाः श्रीलक्ष्मीरामाश्छात्राणां सुगमावबोधाय सटिप्पणमेवास्य प्रकाशनं मञ्जूरी[1]कृतवन्तः ।

अथ को नामास्य टिप्पणप्रणीतौ प्रभवतीति समाकलने, स्वाशिष्याणां व्याकरणविज्ञाननिपुणोयमिति, न्यायवेदान्तादिदर्शनसुदर्शनोऽयमिति, समास्वादितसाहित्यरसोऽयमिति, समाकलितकमनीयकवित्वगुणोयमिति, भैषज्यतन्त्रस्वतन्त्रोऽयमिति, लेखशक्तिसम्पन्नोयमित्यादिसमस्तावश्यकगुणाढ्यमवेद्य खुर्जानगरनिवास्यार्य आयुर्वेदाचार्यः पण्डितश्रीनारायणदत्तवैद्यराजो महाभागः समादिष्टोऽत्र टिप्पणीं प्रणेतुम् ।

तदिह लब्धस्वदेशिकेन्द्रादेशाविशेषोऽयं मनीषी स्वमतिवैभवेन सुनिपुणं तत्र तत्र भैषज्यवैदुष्यं प्रकटयन् कचित्कचिदावश्यकेषु चांशेषु साहित्ययोगव्याकरणादितत्त्वानि सम्यक् प्रतिपादयन् मेधानैरोग्यबलादिविलक्षणगुणप्रदानपरं स्वल्पमात्राप्रदेयं रसायनमिव सुलक्षणं प्रणीतवान् लघु टिप्पणं रसायनं नाम चरितार्थमेवेति परः सन्तोषावसरः । यदसुलभेऽपि शुद्धेऽस्य पुस्तके, असत्यपि च पुस्तकान्तरे लिखिते मुद्रिते वापि यथार्थनिर्देशपरं विषमेष्वंशेष्वावश्यकेष्वपि स्थलेषु तदाशयं सम्यग् बोधयन्नसौ महाभागो वैद्यराजः सफलतां प्राप्त इति नालं कापि शङ्का ।

परमत्र परीक्षावसरतः पूर्वमेव मुद्रितमिदं सटिप्पणं लभेमहि इति छात्राणामसुकरमभिलाषं पूरयितुं प्रबलानुरोधपरैः कृतत्वरैरस्माभिः प्रक्रान्तमुद्रणे शोधने च वर्णयोजकानां संशोधकानां चास्माकं समीक्षण-

---

(१) मञ्जु यथा तथा ऊरीकृतवन्तः ।

तोऽन्तरिता ये ये यत्र कुत्रचनाक्षरदोषास्तिरोहिता इव तस्कराः पुनः कृतावर्तने च दृग्गोचरीभूतास्ते तेऽस्य पृष्ठभागे शुद्धिपत्रे निगडितास्तत एव संशोध्य पठनीयाः ।

आयुर्वैदिकभेषजानि यानि यक्ष्मराजं सबलं समुन्मूलयितुं जीवराजस्य सेवायां नियोजितानि कविना, तानि सर्वाणि (रसादीनि) अस्य परिशिष्टभागे छात्राणां जिज्ञासूनां च सौकर्यार्थं तत्तदायुर्वेदतन्त्रेभ्यः समुद्धृत्य टिप्पणकरेण प्रेषितानि योजितानीति ततोऽवश्यमालोकनीयानि ।

एवं मुद्रितपूर्वमपि नाटकमिदमकृतव्याख्यानटिप्पणतया नोपयोगीति तदुपयोगाय भैषज्यतन्त्रप्रचाराय छात्राणपरमोपकाराय च स्वकीयधनव्ययेन पुनर्मुद्राप्य प्रकाशयन्तः सन्तः श्रीमन्तः स्वामिनः श्रीलक्ष्मीरामवैद्यदिवाकराः स्ववैदुष्यप्रतापभास्वराः सम्प्रत्युपष्टुत्यर्हा अवश्यं धन्यवादमर्हन्तो मन्मानसेनेत्थमाशिषा प्रयुज्यन्ते सहर्षमभिनन्द्यन्ते च—

विक्रमोपार्जिता येन नियुक्ता शर्मकर्मसु ।
श्रीर्दासीव न संभुक्ता मुक्ता विरतिशालिना ॥ १ ॥
सोऽयं लोकाभिरामश्रीलक्ष्मीरामो महायशाः ।
वदान्यो वैद्यमार्तण्डो जीवताच्छरदां शतम् ॥२॥

अन्ते चास्य ग्रन्थकर्तुः संक्षेपतः परिचयं कृत्वा विरमामः—

शैवोऽयं कविश्रेष्ठो वैद्यवरः सहृदयो गरिष्ठो धर्मनिष्ठो वैदिककर्मनिष्ठश्चासीदिति तद्रचनात एवास्य नाटकस्य प्रस्तावनायाश्च प्रतीयते । एतत्पूर्वजानां यज्ञकर्मवृत्तिपरत्वान्मखीत्युपनाम प्रसिद्धिमाप । अस्य पिता नृसिंहरायस्त्र्यंबकदीक्षितस्य भ्राताऽसीत् । अयं नाटकविधाता राजनीतिकलाकलापेऽपि सुनिपुणः प्रगुणश्च बभूव, यतस्तञ्जौरनगरमहीपतेः शाहराजस्य मुख्यामात्यपदाधिरूढो धनाढ्यश्चासीत् ।

शाहमहीपश्च शरभापरनामा एकक्षितिपालवंशीयो महीपालः क्राइष्टस्य सप्तदशशताब्द्याः पूर्वार्धे तंजौरनगरं प्रशास्ति स्मेति स एवास्य कवेः समयः ।

अनेन विरचिता नाटकद्वयी लभ्यते विद्यापरिणयनं जीवानन्दनं चेति। द्वयोरप्यचेतनेषु चेतनव्यवहारसमारोपणपूर्वकं महाँस्तत्त्वपूर्णोपदेशः प्रभरितः। ईदृशालौकिकारोप्यारोपकभाववन्ति नाटकानि काल्पनिकानि (Allegorical plays) अभिधीयन्ते नाट्यकोविदैः। पूर्वस्मिन् नाटके विद्यानामतः सर्वशास्त्राणां संमेलनं, लक्ष्यतश्चैषां समन्वयोऽपि सुनिपुणं गूढव्यंग्यतया निबद्धो विदुषां प्रमोदावहोऽध्यात्मविद्याप्रणयिनाम्। द्वितीये च साहित्यज्ञानपूर्वं प्रतिघातिस्वरूपयक्ष्मणः सपरिवारस्य शिवभक्तिबलाद् रसगन्धकादिसिद्धौषधनिषेवणात्पथ्यं सेवमानस्य जीवस्य परमानन्दनैरोग्यशांतिसुखप्राप्तिरिति वर्णनीयमस्ति वस्तु। द्वयोरपि रचनाबहुलं संवादिनी। प्रस्तावना तु समानकल्पैव। इदं नाटकद्वयं शैवनाटकनाम्ना कथितं "कीथ"—पण्डितेन यूरोपीयेण स्वसंस्कृतनाटकानि इति नामके ग्रन्थे।

अत्र वीरो रसः प्रधानम्। अन्ये यथा प्रसंगमागता रसा तदङ्गानि। 'एक एव भवेदङ्गी शृंगारो वीर एव वा। अङ्गमन्ये रसाः सर्वे इति नाटकलक्षणेपूक्तत्वात्। नाटकलक्षणानि प्रायशः सर्वाणि यथायोगं समावेशितानि कविनेति तत्प्रसंगात् संक्षेपतः टिप्पणकारेणापि दर्शितानि, विशेषतः साहित्याकरग्रन्थेभ्यो बोध्यानि।

अत्र गुणवान् प्रख्यातवृत्तो नायकः जीवः। प्रसादप्रायो गुणः ओजोऽपि बहुस्थलेषु यथोपयोगम्। गौडीया रीतिः। भारती वृत्तिः। जीवस्य आनन्दनमाधिकृत्य कृतं नाटकं जीवानन्दनमिति नाम्न आन्वर्थ्यम्—इत्यादि सर्वमनवद्यम्।

भाद्र-पूर्णिमा
सं० १९९० विक्रमाब्दः

श्रीहरिशास्त्री दाधीचः
जयपुरस्थः।

श्रीः

श्रीमदानन्दरायमखिप्रणीतम्

जीवानन्दनम्

प्रथमोऽङ्कः ।

लक्ष्मीकैरवबन्धुकल्पतरुषूँल्लब्ध्वाऽप्यलब्धेप्सिते
भूयो मथ्नति देवदानवगणे दुग्धाब्धिमृद्धश्रमे ।
तस्यानन्दथुना समं समुदयन्कुम्भं सुधापूरितं
बिभ्राणः स्वकरे करोतु भवतां भद्राणि धन्वन्तरिः ॥१॥

श्रीगणेशाय नमः

कैलासो वृषभश्च देवसरितो वारिप्रवाहोऽप्ययं
गौर्य्या मे वपुरेतदेष च पुरः स्थायी मृगाणां पतिः ।
नीलिम्ना किममीवृता वयमिति भ्रांतामुमां सान्त्वयन्
कण्ठं स्वं पिदधत्करेण जयति श्रीनीलकण्ठो विभुः ॥ १ ॥
येषामाशीःप्रभावः प्रभवति हि जडान् वाक्पतित्वेऽभिषेक्तुं
ये चाऽऽयुर्वेदवाचां विशकलनविधौ दक्षमप्याक्षिपन्तः ।
आतङ्कोच्छेदकर्मण्यपि सुरभिषजौ शिक्षितुं[1] बद्धदीक्षाः
श्रीलक्ष्मीरामपादानवहितमनसा तान् गुरून् भावयामि ॥ २ ॥
काऽऽनन्दरायमखिनो वचसां प्रवाहः
क्वार्थावबोधविकलप्रसरा मतिर्मे ।
व्याख्यातुमुद्यतमना यदहं तथापि
तत्केवलं प्रभवतीह दया गुरूणाम् ॥ ३ ॥

---

(१) अन्तर्भावितण्यर्थोऽयं शिक्षतिर्ज्ञातव्यः ।

भारद्वाजकुलोत्तंसबुधश्रीमोहनात्मजः ।
नारायणः प्रकुरुते जीवानन्दरसायनम् ॥ ४ ॥

अथ विविधशास्त्रसमभ्यसनपरिपक्वमतिः श्रोत्रियधुरीणोऽप्यायुर्वेदापारपारावारपारदृश्वा महाकविरानन्दरायमखी प्रारिप्सितस्य चिकित्साशास्त्रविषयप्रधानस्यास्य नाटकस्य निर्विघ्नपरिसमाप्तिकामनयाऽऽयुर्वेदप्रधानाचार्य्यस्य भगवतो धन्वन्तरेराविर्भावनिदर्शनपूर्वकाशीर्विचनरूपं मङ्गलं शिष्याशिक्षार्थमष्टपदया नान्द्या निबध्नाति ।

लक्ष्मीकैरवबन्धुकल्पकतरूनित्यादि—लक्ष्मीः श्रीः, कैरवबन्धुश्चन्द्रः, कल्पकतरुः कल्पवृक्षः, तान् । अत्र बहुवचनबलादन्यान्यपि कामधेनुप्रभृतीनि रत्नानि बोध्यानि । लब्ध्वाऽपि न लब्धमीप्सितं येन तस्मिन्ननधिगताभीष्टे,अतएव ऋद्धश्रमे प्रवृद्धप्रयासे देवानां दानवानां च गणे भूयोऽपि दुग्धाब्धिं मथ्नति सति तस्य देवदानवगणस्यानन्दथुनाऽऽनन्देन समं सह समुदयन्नाविर्भवन्, उत्पूर्वात् ई गतौ इति धातोर्भौवादिकात् परस्मैपदिनः शतरि रूपमिदम् । किञ्च सुधया पीयूषेण पूरितं न तु शिष्टावकाशं । कुम्भं बृहत्पात्रं न तु करकं शरावं वा, स्वकरे बिभ्राणः प्रकाशं दधद्धन्वन्तरिर्भगवान् भवतां भद्राण्यारोग्यलक्षणश्रेयांसि कैवल्यञ्च 'चिकित्सा तु नैष्ठिकी या विनोपधा'मित्युक्तेः, करोतु ॥ लक्ष्मीप्रभृतीनि रत्नानि बहिश्चाकचिक्यमात्रेणाकर्षकाण्येव स्थूलविषयोपभोगसम्पादकानि वा, न त्वारोग्यसदृशं सर्वोत्तमं वस्तु दातुं शक्तानि, इति लब्धैरप्यमीभिर्महानयं दुग्धाब्धिमन्थनप्रयासो विफल एवेति, पुनरपि दुग्धाब्धिमन्थने बद्धपरिकरताऽऽसीत् ॥ आविर्भवन्तं भगवन्तं निरीक्ष्य देवा दानवाश्चाननन्दुः । अर्थाद्भगवतो धन्वन्तरेः समबुद्धित्वात्तस्मिन्नुभयेषामपि प्रीतिः समैवेति । यं दृष्ट्वा सात्विकास्तामसाश्च समं प्रसीदन्ति, यश्च पीयूषपाणिः स एव 'प्राणाभिसरशब्दार्ह' इति भावः । एतेन वैद्येन सर्वजनप्रीतिभाजनेन भवितव्यमितिदर्शितं भवति ॥ १ ॥

अपि च—

प्राग्जन्मीयतपःफलं तनुभृतां प्राप्येत मानुष्यकं
तच्च प्राप्तवता किमन्यदुचितं प्राप्तुं पुमर्थान् विना ।

तत्प्राप्तेरपि साधनं प्रथमतो देहो रुजा वर्जित-
स्तेनारोग्यमभीप्सितं दिशतु वो देवः पशूनां पतिः ॥२॥

प्राग्जन्मीयतपःफलमित्यादि—तनुभृतां प्राणिनां प्राग्जन्मसम्बन्धिनां तपसां तपश्चर्य्याणां फलस्वरूपं मानुष्यकं मनुष्यशरीरं प्राप्येत लभ्येत, तनुभृतेति शेषः। कर्मणि प्रत्ययः। तच्च प्राप्तवता पुरुषेण पुमर्थान् धर्मार्थकाममोक्षरूपान् पुरुषार्थान् विना किमन्यत्प्राप्तुमुचितं भवेत्। तस्य पुरुषार्थचतुष्टयस्य प्राप्तेरपि रुजा वर्जितो नीरोगो देह एव प्रथमत इति प्रथमं 'सार्वविभक्तिकस्तसि'रिति प्रथमान्तात्तसिः। सर्वोत्कृष्टं साधनम्। तेनेप्सितमभीष्टमारोग्यं, पश्यन्तीति पशवः प्राणिनस्तेषां पतिः पालको देवः शङ्करो वो युष्मभ्यं दिशतु ददातु॥ अत्र यावतां प्राणिनां पालक एवारोग्यप्रदाने शक्तो भवतीति भगवतः पशूनां पतिरिति साभिप्रायविशेषणात्परिकरालङ्कारः। अत्र नान्दीपद्ये महाकविः 'नान्दीपद्येषु कुर्वीत मनाक् काव्यार्थसूचन'मिति कविसमयमनुसृत्य बहुषु जन्मसु सञ्चितानां तपसां फलस्वरूपस्य मनुष्यजन्मनः पुरुषार्थचतुष्टयसिद्धिरेव प्रधानं फलम्। तत्प्राप्तेश्च नीरोगो देह एव साधनमिति आरोग्यमेव सर्वाधिकमीप्सिततमं भवतीति प्रतिपादनेन जीवराजयस्य श्रीगौरीपतिप्रसादाद्यक्ष्मादिनिखिलरोगनिर्जयपूर्वकमारोग्यमुपलभ्य सम्प्रज्ञातासम्प्रज्ञातसमाधिभ्यां परमपुरुषार्थप्राप्तिरूपं नाटकीयं वस्तु शब्दतोऽर्थतश्च ध्वनयति ॥ २ ॥

(नान्द्यन्ते) (क)

सूत्रधारः—मारिष, इतस्तावत्।

नान्द्यन्त इति—(क) नन्दयतीति नान्दी, शुभशंसनेन लोकानामानन्दजननान्नान्दीति संज्ञा, तदुक्तं—'देवद्विजनृपादीनामाशीर्वचनपूर्विका। नन्दन्त्यस्यां सुरा यस्मात्तस्मान्नान्दीति कीर्तिता' इति। इयं चाष्टपदा, द्वादशपदा, समपदा वा विधेया। तदुक्तं—सूत्रधारः पठेत्तत्र मध्यमं स्वरमाश्रितः। नान्दीं पदैर्द्वादशभिरष्टाभिर्वा पदैर्युताम्॥ पदैरथ समैरित्यादि पदनियमोऽप्यस्यामुक्तो यथा-'श्लोकपादः पदं केचित्सुप्तिङन्तमथा-

ऽपरे। परे वान्तरवाक्यञ्च पदमाहुर्विशारदाः' ॥ अत्र च पूर्वोक्तप्रकारेण समासोक्त्या काव्यार्थप्रकाशनात्पत्रावलीसंज्ञा नान्दी। तथा च नाट्यदर्पणकारः—'यस्यां बीजस्य विन्यासो ह्यभिधेयस्य वस्तुनः। श्लेषेण वा समासोक्त्या नाम्ना पत्रावली तु सा' इति। अथ 'रंगं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत्। भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः' इत्युक्तलक्षणवाग्व्यापारात्मकभारतीरूपां 'मारिष' इत्यारभ्य 'प्रस्तावना' इत्यन्तां प्रस्तावनामवतारयति। सूत्रधारो नाम सूत्रं सबीजं नाट्यानुष्ठानं धारयति प्रवर्तयति सः। तदुक्तं—'नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात्सबीजकम्। रंगदैवतपूजाकृत्सूत्रधार उदीरितः' इति। मातृगुप्ताचार्या अप्याहुः—"चतुरातोद्यनिष्णातोऽनेकभूषासमावृतः। नानाभाषार्थतत्वज्ञो नीतिशास्त्रार्थतत्ववित्। वेशोपचारचतुरः पौरेक्षणविचक्षणः। नानागतिप्रचारज्ञो रसभावविशारदः। नाट्यप्रयोगनिपुणो नाना शिल्पकलान्वितः। छन्दोविधानतत्वज्ञः सर्वशास्त्रविचक्षणः। तत्तद्गीतानुगलयकलातालावधारणः। अवधाय प्रयोक्ता च योक्तॄणामुपदेशकः। एवं गुणगणोपेतः सूत्रधारो निगद्यते।" इति॥ 'मारिष' इति सूत्रधारेण प्रयुक्तं पारिपार्श्विकं प्रत्यामन्त्रणम्। तदुक्तं 'सूत्रधारो मारिष' इति 'मान्यो भावः समुद्दिष्टः किञ्चिदूनस्तु मारिषः' इति च॥

(प्रविश्य)

पारिपार्श्विकः (क)—भाव ! एषोऽस्मि।

सूत्रधारः—रीतिः सुखपदन्यासा शारदीयं (या) विजृम्भते।
पूर्णचन्द्रोदयश्चायं निहन्ति ध्वान्तमामयम्॥ ३॥

(क) पारिपार्श्विको नाम स्थापकाख्यसूत्रधारकल्पो नटः। तल्लक्षणञ्चाह भरतः—सूत्रधारस्य पार्श्वे यः प्रवदन्कुरुतेऽर्थनाम्। काव्यार्थसूचनालापां स भवेत्पारिपार्श्विकः' इति॥ भाव इति पारिपार्श्विकप्रयुक्तं सूत्रधारं प्रत्यामन्त्रणम्। तदुक्तं—सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः'। तच्च नाट्योक्तौ बुधापरपर्यायम्॥

रीतिरित्यादि—इयं सुखेन पदन्यासो पादप्रक्षेपो वर्णविन्यासश्च यस्यां सा, शरदि भवा शारदीरीतिः पद्धतिर्विधा च 'रीयतेऽनयेति व्युत्पत्तेः' विजृम्भते शोभते । अयञ्च पूर्णचन्द्रोदयो रसविशेषश्चन्द्रोदयश्च ध्वान्तरूपमामयमामयरूपं ध्वान्तञ्च निहन्ति ॥ ३ ॥

अपि च—

क्रममाणेषु दिगन्ते जलधरजालेषु शङ्खधवलेषु ।
शान्तिमुपयाति सहसा कालुष्यदशा भृशं पयसाम् ॥ ४ ॥

क्रममाणेष्वित्यादि—शङ्खवद्धवलेषु जलधरजालेषु मेघवृन्देषु दिगन्ते क्रममाणेषु संचरत्सु सत्सु, पयसां जलानां कालुष्यदशा भृशमत्यर्थं सहसा शान्तिमुपयाति । अनेन वचनेन सूत्रधारस्य किञ्चिन्नाटयितुं महत्कुतूहलित्वं व्यज्यते ॥ ४ ॥

पारिपार्श्विकः—अतः किमाचरितव्यम् ।

सूत्रधारः—शृणु तावत् । अत्र तञ्जापुरे पौरजानपदा देशान्तरादागताश्च बृहदीश्वररथोत्सवदिदृक्षया संघीभूताः । (ख)

सरसकवितानाम्नो हेम्नः कषोपलतां गता,
विहरणभुवः षड्दर्शन्या विवेकधनाकराः ।
विदधति तपोलभ्याः सभ्या इमे मम कौतुकं,
तदिह हृदयं नाट्येनैतानुपासितुमीहते ॥ ५ ॥

(ख) बृहदीश्वरो नाम तत्रत्यः कश्चिच्छङ्करस्तस्य रथोत्सवस्य दिदृक्षा द्रष्टुमिच्छा तया, हेतौ तृतीया, संघीभूताः ॥

सरसकवितानाम्न इत्यादि—सरसा कविता नाम यस्य तस्य हेम्नः सुवर्णस्य कषोपलतां निकषत्वं गताः 'काव्यस्य सत्परीक्षका इति यावत्' तथा षण्णां वैशेषिकन्यायमीमांसासांख्यपातञ्जलवेदान्तलक्षणानां दर्शनानां समाहारः षड्दर्शनी तस्या विहरणभुवो विहारभूमयः 'समस्तदर्शनज्ञानशालिन इति भावः' तथा विवेकरूपस्य धनस्याकरा, इमे तपोलभ्याः सभ्या मम कौतुकं विदधति । तदिह मे हृदयं एतान्नाट्येनोपासितुमीहते चेष्टते ॥ ५ ॥

पारिपार्श्विकः—(सशिरः कम्पम्) कं पुनः प्रबन्धमवलम्ब्य ?

सूत्रधारः—नन्वस्ति मम वशे सहृदयजनहृदयचन्दनं (क) जीवानन्दनं नाम नवीनं नाटकमिति ।

पारिपार्श्विकः—कस्तस्य प्रबन्धस्य कविः ?

सूत्रधारः—विद्वत्कविकल्पतरुरानन्दरायमखी । य एष इह—

गुरुदेवद्विजभक्तो नैमित्तिकनित्यकाम्यकर्मपरः ।
दीनजनाधीनदयो विहरति समरे च विक्रमार्क इव ॥ ६ ॥

सहृदयेति—(क) सहृदयाः प्रशस्तमनसश्च ते जना तेषां हृदयस्य चन्दनमिवाह्लादकत्वात् ॥

गुरुदेवद्विजभक्त इत्यादि—गुरोर्देवानां द्विजानाञ्च भक्तः सेवकस्तथा नैमित्तिकानि राहूपरागे स्नानादीनि नित्यानि सन्ध्यावन्दनादीनि, काम्यानि पुत्रेष्टिप्रभृतीनि च तानि कर्माणि तेषु परः संलग्नस्तथा दीनजनेष्वधीना दया यस्य सः । समरे रणे विक्रमार्क इव विहरति ॥६॥

यः स्नातोऽजनि दिव्यसिन्धुसलिले यश्चात्मविद्याश्रितो
येनाकारि सहस्रदक्षिणमखो यः सद्भिराश्रीयते ॥
सोऽयं त्र्यम्बकराययज्वतिलको विद्वत्कवीनां प्रभो-
र्यत्तातस्य नृसिंहरायमखिनस्तुल्यप्रभावोऽनुजः ॥ ७ ॥

यः स्नात इत्यादि—यो दिव्यसिन्धुसलिले स्नातोऽजनि स्नातोऽभूत् तथा येन सहस्रं दक्षिणा यस्मिन्नेवंभूतो मखो यज्ञोऽकारि कृतस्तथा यः सद्भिराश्रीयते सतामाश्रयभूतः, स्पष्टमन्यत् ॥ ७ ॥

पारिपार्श्विकः—(सबहुमानम्) आः ज्ञायत एवायम् । किंत्वस्य सर्वलोकविदिता अप्येते गुणाः प्रबन्धनिर्वाहधूर्वहत्वमवबोधयितुं नेशते (क) यतः—

आराध्नोति यदेष भक्तिभरितो देवान् द्विजातीन् गुरून् ।
यच्च श्रद्धदातनोति समये नित्यादिकर्मत्रिकम् ।
यद्दीनेषु दयां करोति समरे शौर्य्यं यदालम्बते,
तत्सर्वं नरसिंहयज्वसुततालाभस्य लीलायितम् ॥ ८ ॥

(क) प्रबन्धनिर्वाहस्य धूर्वहत्वं ग्रन्थरचना-क्षमत्वमवबोधयितुं ज्ञापयितुम् ॥ आराध्नोतीत्यादि सुगमम् ॥ ८ ॥

इदन्तु श्रोतव्यम् ।
आनन्दरायमखिनो वाल्मीकेरिव योगिनः ।
अनन्यापेक्षितः (इतरापेक्षणात्) सारः स्वतः सारस्वतोदयः ॥ ९ ॥

आनन्दरायमखिन इत्यादि—आनन्दरायमखिनो योगिनो वाल्मीकेरिव सारस्वतस्य ज्ञानस्योदयो यस्मिन्नेवंभूतः, सारोऽभ्यर्हितं वस्तु, अनन्यापेक्षित इतरस्यापेक्षां न कुरुतेऽपि तु स्वतः । अयं भावोऽस्य पूर्वे जना विद्वदग्रगण्या एतावताऽसौ आनन्दरायमखी विद्वानिति न. अपि तु स्वतः ॥ ९ ॥

सूत्रधारः—(विहस्य) मारिष ! त्वं न जानासि यत एवं ब्रवीषि ।
शृणु तावत्—
आबाल्यादपि पोषितोऽजनि मया प्रेम्णा तथा लालितः
तेनासौ सरसामुपैतु कवितामानन्दरायाध्वरी ।
इत्येकक्षितिपालवंशजलधेर्देव्या गिरां जातया
श्रीशाहावनिनायकाकृतिभृता, नूनं प्रसादः कृतः ॥ १० ॥

आबाल्यादित्यादि—एको नाम कश्चित् क्षितिपालस्तस्य वंश एव जलधिस्तस्माज्जातया, श्रीशाहावनिनायकाकृतिभृता श्रीशाहराजरूपया गिरां देव्या सरस्वत्या इत्येष प्रसादः कृतस्तमेव दर्शयति—मयाऽसौ आनन्दरायमखी बाल्यादारभ्य पोषितः अजनि अत्र जनिर्भवत्यर्थेवधातव्यः । तथा प्रेम्णा लालितस्तेन हेतुनाऽसौ सरसां कवितामुपैतु इति ॥ १० ॥

अत एव—

कवीनां पूर्वेषां कथमपि च चित्तैरवहितै-
र्गृहीता या नासीत्सरसकवितासारपदवी ।
असौ तामाक्रामन्हरति नरसिंहाध्वरिकुल-
प्रदीपः, सूरीणां श्रवणयुगजाड्यान्धतमसम् ॥ ११ ॥

कवीनामित्यादि—अन्धं तम इति अन्धतमसं 'अवसमन्धेभ्यस्तमसः, इति समासान्तोऽच् प्रत्ययः । श्रवणयुगस्य जाड्यमेवान्धतमसमिति श्रवणयुगजाड्यान्धतमसम्, शेषं सुगमम् ॥ ११ ॥

पारिपार्श्विकः—श्रीशाहराज इति नाम दधत्याः सरस्वत्याः कियानानन्दरायमखिनि दयाविशेषः ? यतः—

पुष्यत्कौतुकपद्मसंभृतकरद्वन्द्वाङ्गुलीवेल्लन-
द्राङ्‌निष्पीडितचन्द्रमण्डलगलत्पीयूषधारासखैः ।
वाग्गुम्फैर्बलवैरिधारितशचीधम्मिल्लमल्लीसर-
स्फारामोदमदापहैश्च कवयत्यानन्दरायाध्वरी ॥ १२ ॥

पुष्यत्कौतुकेत्यादि—पुष्यत्कौतुकैरतिसंफुल्लैः पद्मैः संभृतं यत्करद्वन्द्वं तस्यांगुलीनां वेल्लनैर्वर्तनैर्द्राङ्‌निष्पीडिताच्चन्द्रमण्डलाद्गलन्ती या पीयूषधारा तस्याः सखिभिस्तत्सदृशमाधुर्य्यसौरभभाग्भिः । तथा बलवैरिणा इन्द्रेण धारितो यश्शची धम्मिल्ले इन्द्राणीकेशपाशे मल्लीसरो मल्लिकाहारस्तस्य यः स्फारो रमणीय आमोदस्तस्य मदापहैर्वाचां गुम्फैर्वचोविन्यासैरानन्दरायश्चासौ अध्वरी मखी कवयति ॥ १२ ॥

युक्तमुक्तं च भावेन "शाहभूपतिरूपेण गिरां देवी जाता" इति । कथमन्यथाऽनन्यसाधारणमस्य प्रागल्भ्यम् । तदिदानीमिदमुत्प्रेक्ष्यते ।

भर्तुं लालयितुं भुवि प्रथयितुं विद्वज्जनानाश्रिता-
श्रीशाहक्षितिपात्मना क्षितिगतां मत्वा गिरां देवताम् ।
आसिञ्चन्नसकृत्कमण्डलुजलैरङ्गानि पर्याकुलो
धाता वाहनहंसपक्षपवनैस्तापं किलापोहति ॥ १३ ॥

भर्तुमित्यादि—आश्रितान् विद्वज्जनान् भर्तुं, तथा लालयितुं, तथा भुवि प्रथयितुं प्रख्यापयितुं, गिरां देवतां सरस्वतीं श्रीशाहक्षितिपस्वरूपेण क्षितिगतां मत्वा पर्याकुलो व्याकुलो धाता ब्रह्मा असकृत् मुहुः कमण्डलुजलैरङ्गानि आसिञ्चन् अभिवर्षन् वाहनभूतानां हंसानां पक्षपवनैस्तापमपोहति ॥ १३ ॥

(ग) सूत्रधारः—तन्नियोजय भूमिपरिग्रहायास्मद्वर्ग्यं शैलूषगणम् ।

पारिपार्श्विकः—बाढम् । किन्तु सन्ति कथानायकस्य जीवस्य परिजना विज्ञानशर्मप्रभृतयः । प्रतिनायकस्य च यक्ष्मणः परिजनाः पाण्डुश्वासकासज्वरगुल्मातिसारप्रभृतयः । तेषां यद्यपि भूमिकाग्रहणपटवो (क) नटबटवः पुण्डरीककेयूरकमयूरकसारङ्गकतरङ्गकप्रभृतयः संनह्यन्ति । तथापि प्रयोगस्य बहुत्वेन दुरवगाहतया कथमभीप्सितार्थसिद्धिर्भविष्यतीति विचारेण व्याकृष्यत इव मे हृदयम् ।

सूत्रधारः—यत्किञ्चिदेतत् । महतामेषां सामाजिकानामनुग्रह एवास्माकमभीप्सितमर्थं समग्रयिष्यति । यतः—

जाड्यं भिनत्ति जनयत्यधिकं पटुत्वं
सार्वज्ञ्यमावहति संमदमातनोति ।
विद्वेषिवर्गविजयाय धृतिं विधत्ते
किं किं करोति न महज्जनं जनस्य ॥ १४ ॥

(ग) नेपथ्यग्रहणाय । शैलूषगणम् नटसमूहम् ॥

२

(क) भूमिका वेशरचनेति यावत् ॥

जाड्यं भिनत्तीत्यादि—सार्वज्ञ्यं सर्वज्ञतामावहति प्रापयति, तथा संमदं हर्षं तथा च कोशः 'मुत्प्रीतिप्रमदामोदसंमोदामोदसंमदाः । प्रमोदो हर्ष इत्येव हर्षपर्य्याय ईरितः' इति 'प्रमदसंमदौ हर्षे' इति पाणिनिसूत्रम् । आतनोति विस्तारयति । किञ्च विद्वेषिवर्गविजयाय स्पर्धावतां वर्गं विजेतुमिति यावत् 'तुमर्थाच्च भाववचना' दिति तुमर्थान्ताच्चतुर्थी । धृतिं साहसं विधत्ते । किमधिकं जनस्य जनकर्तृकं महतां भजनं सेवनं किं किं न करोति ? अपि तु सर्वं साधयतीत्यर्थः ॥१४॥

पारिपार्श्विकः—एवं च मन्ये त्वया सहस्पर्धमानोऽपि विकटनामा नटबटुरभिनयविद्यायां (ख) महदनुग्रहात्त्वयैव विजेष्यत इति ।

सूत्रधारः—विकटो नाम नटबटुर्मया सह स्पर्धत इत्यतत्त्वविदो वचनम् । शृणु तावत्—

अभिनयविद्याविषये दुरहङ्काराकुलीकृतो विकटः ।
स नटबटुर्मां वाञ्छत्यभिभवितुं जीवमिव यक्ष्मा ॥१५॥

(ख) अभिनयो नाम नटैरङ्गवचोवेशभूषादिभी रामयुधिष्ठिरादीनामवस्थानुकरणम् । स एव विद्या तस्याम् ।

अभिनयविद्याविषय इत्यादि सरलम् ॥ १५ ॥

(नेपथ्ये) (क)

अरे रे शैलूषापसद ! (ख) 'अभिभवितुं जीवमिव यक्ष्मा' इति किमसम्भावितमर्थं दृष्टान्तयसि ।

मयि जीवति जीवस्य स्वामिनो मन्त्रिणि प्रिये ।
दुर्बलो यक्ष्महतकः कथं वाऽभिबुभूषति ॥ १६ ॥

(क) सूच्यं हि वस्तु द्विविधं भवति दृश्यश्रव्यभेदात् । तदुक्तं—'सूच्यमेव भवेत्किञ्चिद्दृश्यं श्रव्यमथापरं' इति । तस्य चार्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत् । विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेश-

कैरिति नियमात्पञ्चधा प्रतिपादनं भवति, तत्रापि 'नेपथ्ये' इत्यादिना यत्प्रस्तूयते सा चूलिका 'अन्तर्जवनिकासंस्थैश्चूलिकाऽर्थस्य सूचन'-मिति तल्लक्षणात् ॥

(ख) शैलूषेषु नटेषु, अपसदो नीचः ॥

मयिजीवतीत्यादि—अभिबुभूषति अभिभवितुमिच्छति, अनधिकारचेष्टितमेतदेतस्येति भावः । स्पष्टमन्यत् ॥ १६ ॥

सूत्रधारः—(आकर्ण्य) मारिष ! जीवराजमन्त्रिणो विज्ञानशर्म्मणो भूमिकामादाय मम कनीयान्कलहंसो रङ्गभूमिमवतरति । तदावामप्यनन्तरकरणीयाय सज्जीभवावः । (ग)

(इति निष्क्रान्तौ)

(प्रस्तावना) (घ)

(ततः प्रविशति जीवमंत्री विज्ञानशर्मा)

विज्ञानशर्मा—("अरे रे शैलूषापसद !" इत्यादि पठित्वा विचिन्त्य) सर्वथा राजसमीपं गत्वा तदनुज्ञया यक्ष्मणः प्रवृत्तिमुपलब्धुं (क) चारान्प्रवेशयिष्यामि । अथवा 'तत्प्रवृत्त्युपलम्भाय प्रेषय धारणा'मिति मयोक्तो राजा तथा कुर्यात् (श्रुतिमभिनीय)

दिक्षूदञ्चति ताम्रचूडरसितं यद्ध्रस्वदीर्घप्लुत-
प्रायोवर्णनिभं ब्रवीति तदिदं व्युष्टा निशाभूदिति ।
स्त्रीणां निर्गमनं विहृत्य पतिभिर्ब्रूते विनैवाक्षरैः,
क्रीडावेश्मकपाटिकाविघटनक्रेंकारपारम्परी ॥ १७ ॥

(ग) अनन्तरकरणीयाय पश्चात्कर्तव्यकार्यकोटिनिर्वाहाय, सज्जीभवावः प्रयत्नं कुर्वः ।

(घ) प्रस्तावना नाम सा यत्र प्रस्तुतार्थ प्रत्यायकैः पात्र प्रवेशोपयुक्तैर्वाग्विशेषैः सूत्रधारपारिपार्श्विकप्रभृतयो मिथः संलपन्ते । सा

च प्रबन्धमुखापरपर्यायेति हृदयम्। उक्तञ्च यथा—'नटी विदूषकोवापि पारिपार्श्विक एव वा। सूत्रधारेण संयुक्ता संलापं यत्र कुर्वते॥ चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा'। इति। विधेर्यथैव संकल्पो मुखतां प्रतिपद्यते। प्रधानस्य प्रबन्धस्य तथा प्रस्तावना मता। इति च तस्याश्चोद्धात्यककथोद्धातप्रयोगातिशयप्रवर्तकावलगितेत्युक्तरूपाः पंचभिदा भवन्ति। इह तु कथोद्धातरूपभेदभिन्ना प्रस्तावनाऽवगन्तव्या। यतोऽत्र 'अभिभवितुं जीवमिव यक्ष्मा' इति सूत्रधारपठितवाक्यस्यार्थमादाय 'अरे रे शैलूषापसद' इत्यादि पठन् विज्ञानशर्मा प्रविशति, तल्लक्षणञ्च यथा—'सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा। भवेत्पात्रप्रवेशश्चेत्कथोद्धातः स उच्यते' इति॥

(क) प्रवृत्तिं वृत्तान्तं 'वार्ताप्रवृत्तिर्वृत्तान्तः' इत्यमरः। उपलब्धुमवबोद्धुम्।

दिक्षूदञ्चतीति—यद्ध्रस्वदीर्घप्लुता एव ह्रस्वदीर्घप्लुतप्राया ये वर्णास्तैर्निभं[१] सदृशं ताम्रचूडरसितं कुक्कुटध्वनिर्दिक्षु सर्वत उदञ्चत्युज्जृम्भते, तदिदं ताम्रचूडरसितं निशा व्युष्टाऽभूद्विभातप्राया रजनीति ब्रवीति। किञ्च क्रीडावेश्मकपाटिकानां लीलागृहकपाटानां यद्विघटनमुद्घटनं तस्मिन्सति या क्रेंकारपारम्परी कपाटोद्घाटनोत्थापितशब्दविशेषपरम्पराऽक्षरैर्विनैव पतिभिर्विहृत्य सुरतसुखमनुभूय स्त्रीणां निर्गमनं ब्रूते॥ १७॥

तदिदानीं देव्या प्रसन्नया बुद्ध्या सह राजा प्रतिबुद्ध्य निषसेत्। तदुपसर्पामि। (इति पुरोदृष्टिक्षेपमभिनयन्)

चञ्चत्खेटकृपाणकञ्चुकशिरस्त्राकल्पदृप्यद्भटा
 सादिव्यञ्जितवक्रमण्डलगतित्वङ्गत्तुरङ्गव्रजा।
गण्डद्वन्द्वगलन्मदाम्बुमुखरीभूतद्विरेफद्विपा
 दृष्टयोर्मे कुतुकाय राजभवनद्वारोपकण्ठस्थली॥१८॥

---

(१) स्वरव्यंजनयोर्वर्ण इति वर्णपदस्य उभयत्र साम्यादत्र वर्णपदेन स्वरा ग्राह्याः। तत्रैव ह्रस्वादिभेदसमुच्चारणसंभवात्।

चञ्चत्खेटेत्यादि—चञ्चन्त उल्लसन्तो ये खेटा अस्त्रविशेषाः कृपाणा असिधारा, कञ्चुकानि वर्माणि, शिरस्त्राणि शिरोरक्षणसन्नाहाः 'टोप' इति ख्याता, आकल्पा भूषणानि, तैर्दृप्यन्तो माद्यन्तो भटाः सैनिका यत्र, तथा सादिभिरश्वारोहैः, अश्वारोहास्तु सादिनः इत्यमरः। व्यञ्जिताः प्रकटिता वक्रा मण्डलाश्च या गतयस्ताभिस्त्वङ्गन्त उत्प्लवमानास्तुरङ्गव्रजा यत्र तथा। गण्डद्वन्द्वे गलता श्च्योतता मदाम्बुना मुखरीभूता द्विरेफा भ्रमरास्तैरुपलक्षिता द्विपा गजा यत्र, एवंभूता राजभवनद्वारस्योपकण्ठेऽन्तिके या स्थली सा मे दृष्ट्योः कुतुकाय हर्षप्रकर्षाय भवतीति शेषः ॥ १८ ॥

अपि च—

> प्रौढामात्यनिरुक्तमंत्रपदवीविश्रम्भसञ्चारिणो
>
> राज्ञो, दुःसहतेजसो निशमने यद्वद्धृतिं द्वेषिणः।
>
> प्रासादप्रातिहारवेदिषु तथा स्नेहाङ्कपात्रस्थिताः
>
> प्रत्यूषोपगमे प्रदीपमुकुलाः कान्तिं त्यजन्त्यञ्जसा ॥ १९॥

प्रौढामात्येत्यादि—प्रौढैरमात्यैर्मन्त्रिभिर्निरुक्ता समुपदिष्टा या मंत्रपदवी विचारपद्धतिस्तत्र विस्रम्भं यथा तथा सञ्चरितुं शीलं यस्य तस्य दुःसहतेजसो राज्ञो निशमने दर्शने द्वेषिणो नृपा यद्वद्यथा धृतिं त्यज्यन्ति, तथा प्रत्यूषोपगम उन्मिषत्यूषोरागे प्रादुर्भूते सतीत्यर्थः। प्रासादप्रतिहारवेदिषु राजभवनद्वारदेशे स्नेहाङ्कपात्रस्थितास्तैलपूरितपात्रस्थिताः प्रदीपमुकुला दीपशिखा अञ्जसा सहसा कान्तिं त्यजन्ति॥ १९ ॥

(पुरोविलोक्य) का पुनरियं तपश्चरणजनितप्रभुत्वगौरवेव ? मामभिवर्तते।

> गाढोन्नद्धजटाकलापकापिलश्रधूितबालातपा
>
> बिभ्राणा भसितानुलेपधवलच्छायां तनुं पावनीम्।
>
> भिक्षापात्रमयूरपिच्छचयभृत्पाणिद्वया मेऽधुना
>
> काषायाम्बरधारिणी कलयति स्वान्ते धृतिं तापसी ॥२०॥

गाढोन्नद्धेत्यादि—गाढमुन्नद्धः संयमितो यो जटाकलापस्तस्य कपिलया ईषत्पिङ्गलया श्रिया लक्ष्म्या धूतस्तिरस्कृतो बालातपो यया सा तथा। भसितस्यानुलेपेन धवला छाया कान्तिर्यस्याः सा तां, पावनीं तनुं बिभ्राणा, तथा भिक्षापात्रं कपालं मयूरपिच्छचयश्च तौ बिभर्त्येवंभूतं पाणिद्वयं यस्याः सा, काषायाम्बरधारिणी तापसी मे स्वान्ते चेतसि धृतिं कलयति उत्पादयति। कलिः कामधुक् इति शाब्दिकाः ॥२०॥

(निपुणं निरूप्य)

अस्यामक्षिभ्रुवं नासा रदपङ्क्ती रदच्छदः ।
चिबुकं मन्दहासश्च धारणायामिवेक्ष्यते ॥ २१ ॥

अस्यामिति—अस्यां तपस्विन्यां यदक्षिभ्रुवमक्षिणी च भ्रुवौ चेति विग्रहे 'अचतुरविचतुर' इत्यादिना समासान्तोऽच्। नासा, रदपंक्ती रदच्छदश्चिबुकं मन्दहासश्चेत्येतत्सर्वं धारणायाम् इव प्रतीयते इति भावः ॥२१॥

(ततः प्रविशति तापसीवेषा धारणा)

* धारणा—अहं खु पच्चत्थिराआभिसेणणसंणाहं (क)

१ अहं खलु प्रत्यर्थिराजाभिषेणनसंनाहं कस्यापि पुरुषस्य मुखाच्छ्रुतवता राज्ञा 'इमं वृत्तान्तं पुरं प्रविश्य जानीहि' इति प्रेषितास्मि। मयापि तापसीवेषया तथा ज्ञात्वा राज्ञः समीपे समागम्यते। एष विज्ञानशर्मा अमात्य आगच्छति। भवतु। वेषेण प्रतारयाम्येनम्। यद्यपि सर्वस्मिन्नपि कार्येऽस्यानुमतिं विना राजा न प्रवर्तते, तथापि यन्मम संशयो वर्त्तते तदेककस्य प्रकाशो न भवेत्।

---

* 'धारणानामाद्वितीयवस्तुनि अन्तरेन्द्रियधारणा'मिति वेदान्तसारः। 'ध्येये चित्तस्य स्थिरबन्धन'मिति हेमचन्द्रः। 'ध्येयान्न चलते यस्य मनोऽभिध्यायतो भृशम्। प्राप्यावधिकृतं कालं यावत्सा धारणा स्मृता।' इति गारुडे। 'देशबन्धश्चित्तस्य धारणा' इति पातञ्जलम्। (क) प्रत्यर्थिनः प्रतिद्वन्द्विनो राज्ञोऽभिषेणनस्याक्रमणस्य संनाहोऽध्यवसायस्तम्। (ख) अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतमिति। (ग) सर्वश्राव्यं प्रकाशं स्यादिति प्रकाशलक्षणम्।

कस्सावि पुरिसस्स मुहादो सुदवन्तेण रण्णा 'इमं उत्तन्तं पुरं पविसिअ जाणीहि' त्ति पेसिदह्मि। मए वि तावसीवेसाए तह जाणिअ रण्णो समीवे समागमीअदि । (अग्रतो दत्तदृष्टिः स्वगतम्) (ख) एसो विण्णाणसम्मा अमच्चो आअच्छादि। होदु। वेसेण पदारेमि णम्। जज्जवि सव्वास्सिं वि कज्जे इमस्स अणुमदिं विणा राआ ण पवट्टइ, तह वि जं मह संसओ वट्टइ ता एअकस्स पआसो ण भवे। (इति परिक्रामति)

मन्त्री—(दृष्ट्वा स्वगतम्) इयं तापसी राजप्रहिता प्रच्छन्ना किं धारणा भवेत्। भवतु। पृच्छामि। (प्रकाशम्) (ग) अये तापसि ! का त्वम् ? कुत आगच्छसि ?

धारणा—(स्वगतम्) ईमस्स पडिवअणं भासन्तरेण भणेमि। अण्णहा कहं वि मं जाणिस्सदि इअं सेति। (प्रकाशम्) अहं खलु गार्गी यत्नमणो राज्ञो वयस्या, देव्या गृहिण्याः स्नेहसर्वस्वभाजनं तदन्तःपुरादेवागच्छामि।

मन्त्री—(स्वगतम्) भवेदेवेयं धारणा तापसीवेषेण रिपुप्रवृत्तिमुपलभ्यागतवती । अयं स्वनामानुगुणमभिज्ञो वा (क) नवेति मां परीक्षितुं संस्कृतभाषया वेषानुगुणमपलपते। प्रतिपक्षकुले च पक्षपातमात्मनः सूचयति। भवतु। अहमप्यजानन्निवानुनयन्पृच्छाम्येनाम्। (प्रकाशम्) अये तापसि !

निखिलं जगतश्चरितं विज्ञातं ते समाधिनैव भवेत्।
तन्मे महाप्रभावा भाग्येनासादिता भवती ॥ २२ ॥

---

१ अस्य प्रतिवचनं भाषान्तरेण भणामि। अन्यथा कथमपि मां ज्ञास्यति इयं सेति।

(क) अयं विज्ञानशर्मा विविधं तथ्यातथ्यमृजुतयोपदिष्टं प्रवञ्चनापरिप्लुतं वा लौकिकं वस्तु, मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोरितिवक्ष्यमाणत्वात् विविच्य यथास्वरूपं ज्ञायतेऽनेनेति यथार्थनामधेयोऽस्ति नवेति, परीक्षितुमपलपते निह्नुते ॥

निखिलमित्यादि—निगमव्याख्यातम् ॥ २२ ॥

धारणा—(स्वगतम्) मं[1] तावसिं एव्व जाणिअ मह मुहादो पच्चत्थिराऊप्पउत्ति सुणिदुं अणुणअप्पआरो एसो । होदु । अहं वि अजाणन्तीव पुच्छामि । (प्रकाशम्) कस्त्वम् ? क्व गच्छसि ? सूनृतेन ते वचनेन साधुर्भवानिति पृच्छामि ।

मन्त्री—(स्वगतम्) इयमात्मानं गोपायति । अहमपि तथैवोत्तरयामि । (प्रकाशम्) कार्यविशेषेऽधिकृतं जानीहि, येनैवमाधिकृतस्तन्निकटे गच्छामि ।

धारणा—(स्वगतम्) एसा[2] विपक्खजणपक्खवादिणित्ति गोपणप्पआरो एसो । (प्रकाशम्) केनाधिकृतोऽसि ?

मन्त्री—भगवति ! त्वमेव जानासि । यतः प्रणिधानेन (क) योगिनः सकलमपि प्रत्यक्षयन्ति ।

धारणा—(स्वगतम्) कहं[3] एदं आपडिदम् । होदु । जोइणी विअ आसिअं करिअ अमच्चं वञ्चेमि । (इति ध्यानारूढा तिष्ठति) ।

मन्त्री—(स्वगतम्) एषा खलु,

---

१ मां तापसीमेव ज्ञात्वा मम मुखात्प्रत्यर्थिराजप्रवृत्तिं श्रोतुमनुनयप्रकार एषः । भवतु । अहमप्यजानतीव पृच्छामि ।

२ एषा विपक्षजनपक्षपातिनीति गोपनप्रकार एषः ।

३ कथमेतदापतितम् । भवतु । योगिन इवासिकां कृत्वाऽमात्यं वञ्चयामि ।

कृत्वा स्वस्तिकमासनं करयुगं विन्यस्य जानुद्वये
नासाग्रार्पिततारका नतमृजूकृत्यावलग्नं दृढम् ।
निःश्वासोच्छ्वसितोपरोधघटितस्तैमित्यपीनस्तनी
चित्ते मे कृतसंयमेव कुरुते धूर्ता महत्कौतुकम् ॥ २३ ॥

(क) प्रणिधानं संयमस्तेन । प्रत्यक्षयन्ति करबदरसदृशमवलोकयन्तीति यावत् ।

कृत्वेत्यादि—नासाग्रेऽर्पिते तारके यया सा, नतं निम्नमवलग्नं मध्यभागं 'मध्यमं चावलग्नञ्च' इत्यमरः । दृढमत्यर्थं यथा स्यात्तथा ऋजूकृत्य सरलीकृत्य स्थिता । किञ्च निःश्वासोच्छ्वसितयोरुपरोधेन निरोधेन घटितं यत्स्तैमित्यं निष्पन्दीभावस्तेन पीनौ स्तनौ यस्याः सा । धूर्ता प्रवञ्चनापट्वी मे चित्ते महत्कौतुकं कुरुते । शेषं स्पष्टम् ॥ २३ ॥

(प्रकाशम्) परिनिष्ठितं योगाभ्यसनं भवत्याः । (ख)

धारणा—(ध्यानाद्विरम्य सस्मितम्) जीवस्य राज्ञो मन्त्री विज्ञानशर्मा भवान् ।

मन्त्री—महाप्रभावा योगसिद्धिमती भवती । तथाहि—

बुद्ध्या महत्या कृतसाहचर्य्या देवे निजे दर्शितभूरिभक्तिः ।
परप्रवृत्तिं विदती महिम्ना साधारणा त्वं त्वहिते हिते च ॥२४॥

(ख) योगस्वरूपमुक्तं कठवल्ल्यां 'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् ॥ तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्' इति । तस्य योगस्याभ्यसनं परिशीलनं परिनिष्ठितं परिपक्वम् ।

बुद्ध्येति—महत्या विपुलयाऽन्यत्र महिष्या बुद्ध्या धियाऽन्यत्र जीवराजपत्न्या कृतसाहचर्य्या प्राप्तसाहाय्याऽन्यत्र बद्धसौहार्दा तथा निजे देवे इष्टदेवे स्वामिनि जीवे च, दर्शिता भूरिभक्तिर्यया सा, महिम्ना योगप्रभावेण प्रतिभया च, परस्य शत्रोरितरस्य च प्रवृत्तिं वार्त्तां विदती (?) आकलयन्ती अहिते हिते च साधारणा सामान्या तापसी इति शेषः । अन्यत्र सा प्रसिद्धा जीवप्रेष्या धारणा एतन्नामधेया ॥ २४ ॥

धारणा–(स्वगतम्) [1]किं जाणिदं ह्मि अमच्चेण जहत्थणामधेएण जं तावसीवण्णणव्वाजेण अहं जेव्व वण्णिदा। होदु । एव्वं भणामि । (प्रकाशम्) महान्खलु योगप्रभावः ।

मन्त्री–भगवति ! तव न किञ्चित्प्राणिनामन्तर्गतमविदितमास्ति । अतस्त्वां प्रार्थये । कथमस्माकं राजनि यक्ष्मा मन्यते । योगिन्यास्तव दुःखितेषु कथमेषां दुःखविमुक्तिः स्यादिति चित्तपरिकर्मविशेषः (क) करुणा भवत्येव । योगाङ्गेषु यमेषु (ख) वाङ्मनसयोर्यथार्थस्वरूपः सत्यं नाम द्वितीयो यमोऽपि तथा। अत इदं निर्विशङ्कं प्रार्थनापूर्वं पृष्टासि ।

धारणा–(स्वगतम्)[2]जक्खराजपक्खवादविसेसे वि जोइणीए पुच्छिदस्स जहत्थुत्तरं अभणिअ सक्कं ठादुं त्ति मण्णइ अमच्चो (ग) । (प्रकाशम्) किमन्यत् । पुरान्निष्क्रमयितव्योऽयमिति मन्यते।

मन्त्री–कथमेतदेतस्य संघटते । सामादिषु चतुर्षूपायेष्वेकैकस्यापि प्रयोगेण सुसाध्यो हि रिपुमनोरथभङ्गः ।

धारणा–नन्विमं दुष्करं पश्यामि ।

यक्ष्मणि विभौ प्रयोगं घटयन्ति न सामभेददानानि ।
दण्डः प्रभवेन्नु कथं प्रबलतरे रिपुजने स्वस्मात् ॥२५॥

(क) चित्तपरिकर्माणि नाम चित्तप्रसादनोपायास्तत्र विशेषोऽन्यतमः । तथा च योगसूत्रम् 'मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादन'मिति । (ख) यमास्तु

---

१ किं ज्ञातास्म्यमात्येन यथार्थनामधेयेन यत्तापसीवर्णनव्याजेनाहमेव वर्णिता । भवतु । एवं भणामि ।

२ यक्ष्मराजपक्षपातविशेषेऽपि योगिन्या पृष्टस्य यथार्थोत्तरमभणित्वा न शक्यं स्थातुमिति मन्यतेऽमात्यः ।

'अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः' इति पातञ्जले प्रतिपादिताः ॥ (ग) अयं भावो यक्ष्मराजपक्षपातितया रहस्यमपि मदनुयोगं यथार्थमपूरयित्वाऽस्या योगिनीत्वं न सिद्ध्यति । योगिन्याः सत्यवादिनीत्वात् । इति ।

यक्ष्मणीत्यादि—सामभेददानानि यक्ष्मणि प्रयोगं न घटयन्ति यक्ष्माणं वशीकर्त्तुमक्षमाणि, किंभूते यक्ष्मणि? विभौ, हेतुगर्भं विशेषणमेतत्। यतोऽसौ सर्वशक्तिमान् अतो नैतदिति भावः। अन्यत्सुगमम् ॥२५॥

मन्त्री—यथार्थमाह भवती । किं त्विदं पक्षपातवचनम् । केनेममस्मत्प्रबलतरं मन्यसे ।

धारणा—(स्वगतम्) एसो अत्तकेरअस्स पहुणो अमच्चो । ता पहुभुजअविसअणीए मन्तविचारसिद्धीए (क) परपक्खबलट्ठिदिं एदस्स जेव्व कहइस्सम् । (प्रकाशम्) सर्वरोगराजो यक्ष्मा निष्प्रतीकार इति सर्वजनविदितमेतत् । शृणु तावत् । परीवारा एतस्य रोगविशेषा भीमरूपा बहवः । तथा हि—

ज्वरपाण्डुप्रमेहार्शःशूलगुल्मभगन्दराः ।
कासश्वासावतीसारसंनिपाताश्मरीव्रणाः ॥ २६ ॥

(क) मन्त्रविचारसिद्धेरङ्गमिति शेषः ॥

ज्वरेत्यादि—सरलम् ॥ २६ ॥

किञ्च—

रोगा मूर्ध्नि शतं चतुर्नवतिरेवाक्ष्णोस्तथा नासिकां
प्रत्यष्टादश कर्णयोरपि तथा वक्त्रे चतुः सप्ततिः ।
पञ्चैवं हृदि किञ्च सन्ति बहवः सर्वेऽप्यमी दुस्तराः
प्राप्तौ कल्ककषायलेह्यवटकप्रायौषधानामपि ॥ २७ ॥

---

(१) एष आत्मीयस्य प्रभोरमात्यः । तत्प्रभुजनविषयिण्या मन्त्रविचारसिद्धेः परपक्षबलस्थितिमेतस्यैव कथयिष्यामि ।

रोगा मूर्ध्नि शतमिति—विशदमेतत् ॥ २७ ॥

तस्माद् दुर्जयो युष्माभिः ।

मन्त्री—(स्वगतम्) इयं किल भीत्या निसर्गकातरा प्रबल-परबलप्रवेशहृदया (क) मदीयप्रभावमजानती स्वबुद्ध्यनुरूपं किमपि प्रलपति । भवतु । किमनया वृथा संवादकदर्थनया । प्रस्तुतकार्य्यसाधनार्थमिमां तावदन्तरयामि (ख) । (प्रकाशं सोपहासं)

आलोक्य शात्रवबलं बहु धारणे ! त्वं
भीतासि सम्प्रति रसंप्रतिपन्नधैर्य्या ।
जीवस्य जीवितसमे मयि सत्यमात्ये
भूयात्कथं बत ! विरोधिशिरोधिरोहः ॥ २८ ॥

(क) प्रबलं यत्परबलं तस्य प्रवेशो यत्र एवंभूतं हृदयं यस्याः सा । शत्रुबलं बहुमन्यमानेति यावत् । (ख) अन्तरयामि विषयान्तरं प्रापयामि ।

आलोक्येत्यादि—रणे शात्रवबलं बहुधाऽऽलोक्याथवा हे धारणे ! त्वं बहु शात्रवबलं शत्रुसैन्यमालोक्य भीतासि, तथा न सम्प्रतिपन्नमवलम्बितं धैर्य्यं धृतिर्यया सा तथासि, किंभूता त्वं सम्प्रतिः । क्षमायामर्हत्तुल्या 'सम्प्रतिरित्येतत्कल्पान्तरीयार्हन्नाम' इति शब्दकल्पद्रुमः । विरोधिनां विद्विषां शिरसामधिरोह उन्नतिः, शिरोधीनां कन्धराणां रोहोऽनुच्छेदो वा । शिरोधिः कन्धरेत्यपि । इत्यमरः । स्पष्टमवशिष्टम् ॥२८॥

धारणा—(विहस्य) कधं जाणिदह्मि अमच्चेण । ता कहेमि

---

(१) कथं ज्ञातास्म्यमात्येन । तत्कथयामि विश्रब्धं यथार्थं शृणोत्वमात्यः । अहं खलु देव्या बुद्धेः सहचरी राज्ञा जीवेन तापसीवेषं कृत्वा रात्रौ पुरं प्रविश्य यदमराजस्य विचारणीयो व्यवसाय इति प्रेषितास्मि । तथैव विचार्यायं प्रतारयितुं प्रच्छन्नेव स्थितास्मि ।

विस्सद्धं जहत्थं सुणादु अमचो । अहं खु देईए बुद्धीए सहअरी रण्णा जीवेण तावसीवेसं करिअ रत्तिम्मि पुरं पविसिअ जक्खरा-अस्स विआरणीओ ववसाओ त्ति पेसिदह्मि । तहज्जेव विचारिअ अज्जं पदारेदुं पच्छण्णे वठिदह्मि ।

मन्त्री–युज्यत एतत् । अतो राजसमीपमेव गच्छावः ।

धारणा–तुमं जेव्व गदुअ इमं वुत्तन्तं भणाहि । रण्णो णिवेदणादो वि तुह पुरदो कज्जणिवेदणं अब्भहिदम् (क) । अहं उण दुज्जण संसग्गाकिदं कलुसं पक्खालेदुं महाणदिं ण्हादुं गच्छेमि । (इति निष्क्रान्ता)

मन्त्री–(सविचारम्) यद्यपि कुटिलप्रकृतयः स्वामिनि निबद्धदृढभक्तयो दुर्जया एव परसैनिकास्तथापि किमसाध्यं बुद्धि-विभवस्य । यतः—

दुर्जातेः सुमहत्यपि क्षितिपतेः शालीनतां संत्यज-
न्शत्रूञ्जेतुमथेप्सितं घटयितुं शक्नोत्युपायेन यः ।
प्रायो मन्त्रिपदं महोन्नतमतिः प्राप्तुं स एवार्हति
स्वोत्सेकी न तु पण्डितो भुवि जनो वाचा वदन्पौरुषम् ॥२६॥

(क) अभ्यर्हितं शोभनम् ।

दुर्जातेरित्यादि—क्षितिपते राज्ञः सुमहत्यपि दुर्जातेः शालीनतां गृहासिकां यद्यपि शालीनशब्दः शाब्दिकैः 'शालीनकौपीने अधृष्टाकार्ययोः ५।२।२० पा०' इति विनयवति निपातितस्तथापि अत्र शालाप्रवेश-मर्हतीत्यवयवार्थ एव गृहीतव्यः । तथा च चरकः 'ऋषयः खलु कदा-

(१) त्वमेव गत्वा इमं वृत्तान्तं भण । राज्ञो निवेदनादपि तव पुरतः कार्य-निवेदनमभ्यर्हितम् । अहं पुनर्दुर्जनसंसर्गकृतं कलुषं प्रक्षालयितुं महानदीं स्नातुं गच्छामि ।

च्छिालीना यायाबराश्च' इति। तत्र शालीना गृहस्था इति भावः। सन्त्यजन् विमुञ्चन् य उपायेन शत्रूञ्जेतुमथ चेप्सितं घटयितुं शक्नोति। अयं भावः, राज्ञा कृतेऽपि दुर्नीतिप्रयोगे यस्त्यक्तधैर्यो गृहे न तिष्ठति किन्तु स्वनीत्या तत्कार्यं साधयितुं प्रयतते, स एव मन्त्रिपदममात्यपदवीं प्राप्तुमर्हति। स्वोत्सेकी आत्मश्लाघी वाचा पौरुषं वदन्नतु क्रियात्मकत्वे परिगमयन् पण्डितोऽपि सकलकलाकलितो बुधोऽपि मन्त्रिपदमलं कर्तुं नार्हति ॥ २९ ॥

अत इदानीम्—

संचिन्तयामि कञ्चन सम्प्रति समयोचितं जयोपायम्।
येनास्माकं श्रेयो भविता सहसा पराजयो द्विषताम् ॥ ३० ॥

सञ्चिन्तयामीति—सर्वं स्पष्टम् ॥ ३० ॥

(इति ध्यानं नाटयन्) आः चिन्तितोऽयमबाधितोपायः। तथा हि—

प्रथन्ते यास्तिस्रः प्रबलजडतीक्ष्णाः प्रकृतयो
वशीकारे तासां जगति सदुपायाः परममी।
क्रमात्स्नेहास्ते ते कुशलमतिभिः सद्भिरुदिता-
स्तथा तीक्ष्णोपाया नियतमुपचाराश्च मधुराः ॥ ३१ ॥

प्रथन्त इत्यादि—याः प्रबलजडतीक्ष्णास्तिस्रः प्रकृतयः सन्ति, तासां वशीकारे विद्वद्भिरमी त्रय उपायाः प्रतिपाद्यन्ते। तत्र प्रबलासु स्नेहप्रयोगः प्रेम्णा व्यवहरणम्। जडासु तीक्ष्णः प्रयोगः, तीक्ष्णासु मधुरः प्रयोगः इति। प्रकृते तु प्रबलवातप्रकृतौ तैलादिप्रयोगः तीक्ष्णायां पित्त-प्रकृतौ स्वादुरसोपयोगः, तथा जडायां श्लेष्मप्रकृतौ तीक्ष्णकटुरसादि-प्रयोग इति ॥ ३१ ॥

तस्मात्प्रबलजड़तीक्ष्णप्रकृतीनां वातपित्तकफानां (क) मध्ये प्रबलो यो वातः स तु बहुविधस्नेहविशेषप्रयोगेण वशीकार्यः। तदनुगतस्य पित्तस्य मधुरोपचारेणैव सुकरो वशीकारः। उभय-

विरुद्धो जडो यः कफस्तत्रेतरोपायस्याप्रसरात्तीक्ष्णप्रयोगेणैव स वशमानेतव्यः । एवञ्च तत्तत्समुचितैरुपायैः सर्वामयनिदानेषु वातादिषु स्वाधीनेषु, तज्जनितानामितरेषामुन्मेष एव दूरतोऽपास्तः । किञ्च—

सर्वास्मिन् विषये निरंकुशतया यद्दुर्निरोधं मनः
प्रायो वायुरिव प्रकृष्टबलवत्सर्वात्मना चञ्चलम् ।
तत्कामादिभिरुद्धतैरुपहतं सम्प्रेरितैर्यद्दमणा
तत्सौहार्दमुपेत्य यद्यपि पुनर्नः प्रातिकूल्यं चरेत् ॥ ३२ ॥

(क) वातपित्तश्लेष्माणश्च किं स्वरूपा इत्यपेक्षायां कश्चिदेवं निर्धारयति । तथाहि—"शरीरोत्पत्तौ 'खादयश्चेतनाषष्ठाः धातवः पुरुषः स्मृतः' इत्यत्र पञ्चमहाभूतान्येव शरीरोपादानकारणत्वेनोक्तानि। अन्यत्रापि 'तत्र शरीरं नाम चेतनाधिष्ठानभूतं पञ्चमहाभूतविकारसमुदायात्मकं समयोगवाहि' इत्यनेन पञ्चभूतानामेव शरीरोपादानकारणत्वं प्रत्यपादि । पञ्चमहाभूतविकारेषु च प्रसादत्वं मलत्वञ्चेति द्वैविध्यं स्वीकृतम् । तच्च द्वैविध्यं धातुत्वेनैव गृह्यते, शरीरे धात्वतिरिक्तपदार्थाभावात् । धातुषु यदा पोषकता तदा प्रसादत्वं, यदा च तद्बाधकरत्वं तदा मलत्वमिति पञ्चभूतेष्वेव कक्षात्रयं वातपित्तकफा इति स्वीकृतम् । तत्र अप्पृथिव्योर्विकारेषु, श्लेष्मणः स्नेहनरोपणपूरणबलस्थैर्यकृत्वादिकमुपलभ्य "श्लिष्यति श्लिष्टो भवति श्लेषयति वेति व्युत्पत्त्या श्लेष्मत्वम्" । वाय्वाकाशविकारेषु रौक्ष्यलाघवखरत्वसूक्ष्मत्वचलत्वसौषिर्य्यादिकमवेत्य "वाति गच्छति गमयति वा (अर्थात्स्वयं गतिमानन्यत्र च गतिमादधाति यः स वातः) इति व्युत्पत्त्या वातत्वम्' एवं तैजसविकारेषु रागपक्तिप्रकाशोष्मादिकमुपलभ्य तपनकर्तृत्वात्पित्तत्वं सांकेतिकं स्थापितमिति ॥" अस्मदीय गुरुचरणास्तु कलिकातावैद्यसम्मेलनसभापतिपदमलंकुर्वन्तो वातपित्तश्लेष्मस्वरूपविषये विपक्षोत्थापितशङ्कानामित्थं समाधानमकार्षुः । तत्रेत्थं विपक्षप्रत्यवस्थानम्—"यत् 'हृदययकृत्प्लीहान्त्ररक्तादिषु शारीरभावेषु यद्वै-

कृत्यमुपजायते तद्बाह्यान्निदानादेव । एतेष्वेव च भावेषु सञ्चलनादि-क्रिया पृथक् पृथक् विभज्यमाना प्रत्यक्षतो वाऽनुमेया वा दृश्यते। नहि या हृदयस्य क्रिया सैव यकृतोऽन्त्रस्य वा तयोर्वा तस्य । शिराध-मनीनां या रक्तसञ्चलनादिक्रिया न साऽऽमाशयस्येति व्यवस्थितौ वास्तविकीं शारीरस्थितिमपरिच्छिद्यैवासत्कल्पनामूलकोऽयं वातपित्त-कफप्रपञ्च इति कृतमन्तर्गडुनाऽमुना इति ।' इदञ्च प्रतिविधानम्— 'रक्तार्शः प्रदररक्तपित्तशिराव्यधव्रणादिषु रक्ते, कासश्वासक्षययक्ष्मा-दिषु च कफे, स्तन्यरोगेषु स्तन्ये, मेहादिषु मूत्रे, ज्वरातिसारपाण्डूद-रादिविविधरोगपरिगृहीतेषु नानारोगेषु, विण्मूत्रत्वङ्नखनेत्रादिषु, वैवर्ण्यरौक्ष्यकार्कश्यविविधवर्णत्वपाकशोथक्लेदोपलेपादयो नानाविधा विकृतयो दृश्यन्ते। तत्त्वतो विविच्यमानास्तास्त्रिविधा एव सम्पद्यन्ते। आग्नेय्यः सौम्या वायवीयाश्चेति । तत्र निखिलेष्वपि शारीरभावेषु रौक्ष्यलाघवशैत्यखरत्वसौक्ष्म्यसंचलनादयः, स्रंसव्यासादयो वा, या विकृतयस्ता वायवीयाः। यास्तु औष्ण्यतैक्ष्ण्यविस्रतासरत्वशुक्लारुणवर्ज-वर्णता। कटुकाम्लरसादयो दाहकोथादयश्च ता आग्नेय्यः। याश्च स्निग्ध-त्वगौरवमाधुर्य्यमात्स्न्यादयः, श्वैत्यशैत्यकण्डूस्थैर्य्यगौरवस्तम्भसुप्ति-क्लेदोपदेहचिरकारित्वादयस्ताः सौम्याः। एवं ताः सर्वा विविधा विकृत-योऽन्याश्चानुक्ताः स्वयमूह्यमाना अप्येतास्वेवान्तर्भवन्ति त्रिविधासु । यतश्च लोके रौक्ष्यादयो गुणाः स्रंसव्यासादयश्च वायौ, औषध्यादयो दाहादयश्च वह्नौ, स्निग्धत्वादयश्च जलेऽनुभूयन्ते । अतः शरीरेऽपि रौ-क्ष्यादयो वातस्य, औष्ण्यादयः पित्तस्य, स्निग्धत्वादयश्च श्लेष्मण एव निर्धार्य्यन्ते । तत्रापि शरीरे पृथिवीजलपरिणामः श्लेष्मा, आकाशवा-य्वोर्वातः, तेजसः पित्तम् । तथा च तत्समानगुणबहुलैर्द्रव्यगुणकर्म-भिरेते (वातपित्तकफाः) उत्पद्यन्ते विवर्धन्ते च, तद्विपरीतगुणैश्च शाम्यन्ति । अर्थात् वातपित्तकफप्रत्यनीकैरेवौषधान्नविहारैः सर्वा अपि विकृतयः प्रायो निवर्तन्ते। अतोऽप्यनुमीयते सर्वासामासां विकृ-तीनां कारणं वातपित्तकफा एवेति' । पुनश्चान्यत इत्यवोचन् । 'यच्चोक्तं प्रत्यक्षेण' 'यन्त्रसाहाय्येन' अनुमानतो वा हृदादिष्वेव वैकृत्यं, सञ्चलनादिक्रियाश्च पृथक् पृथग्विभज्यमाना दृश्यन्ते, तेष्वेव चिकि-त्सयाऽन्यथाऽऽपादनेन स्वास्थ्यमुपलभ्यते, नातो वाताद्यपेक्षालेशतो-

ऽपीति । तत्रोच्यते हृदादियन्त्रेषु यत्किमपि संस्फुरणादि दृश्यते नैतत्तेषां, तानि हि स्थानानि, नहि स्थाने जायमाना क्रिया स्थानस्य, किन्तु तदधिष्ठातुः । तथाहि—या कस्मिन्नपि शारीरयन्त्रे क्रिया जायते सा तद्यन्त्रस्य वा, तत्स्रोतःपरिवाहिनो रसरक्तादिधात्वन्तरस्य वा, तदधिष्ठातुर्वातपित्तकफान्यतमस्य वेति मीमांसायाम्, न तावत्तद्यन्त्रस्य, प्रायस्तत्क्रियाया अन्यत्रापि दर्शनात् । न वा धात्वन्यतमस्य तत्क्रियाणां प्रीणनं जीवनमित्यादिना परिगणितत्वात् । तथा च पारिशेष्यात्तदधिष्ठातुर्वातपित्तकफान्यतमस्यैव । न हि वाष्पपरिचालितयन्त्रक्रिया तस्य, प्रत्युत तत्परिस्पन्दनाऽऽधायकवाष्पस्यैवेति को नाम न स्वीकर्तुमुत्सहेत ? इति' ।" । "केश्चिदेतेषां मूर्तत्वममूर्तत्वं वेत्यपि विवेचितम् । तथाहि—'तत्र वायुस्तावदमूर्तः पित्तश्लेष्माणौ तु मूर्तामूर्तौ' इति, तथा चोक्तम्—

ते च प्रसादा द्विविधा सूक्ष्मस्थूलविभेदतः ।
तत्र वायुः सदा सूक्ष्मः इतरौ तु द्वयात्मकौ ॥
मलभूतौ तु नियतं स्थूलौ पित्तकफौ स्मृतौ ।
ते प्राकृताः प्रसादाः स्युर्विकृता मलसंज्ञकाः ॥

अयमभिप्रायः । सूक्ष्मत्वं नाम इहातीन्द्रियत्वं, स्थूलत्वन्तु इन्द्रियगोचरत्वं दृश्यत्वं वा । तत्र वायुः सदा प्रसादभूतासु मलभूतासु वा सर्वास्ववस्थासु सूक्ष्मोऽप्रत्यक्षो विद्युच्छक्तिवत्, अचिन्त्यातीन्द्रियशक्तिस्वरूपः, क्रियामात्रानुमेयश्च । इतरौ पित्तश्लेष्माणौ तु प्रसादभूतौ द्वयात्मकौ, सूक्ष्मरूपतः स्थूलरूपतश्च वर्तेते शरीरे । तत्रापि पाचकपित्तभिन्नान्यन्यानि चत्वार्यपि पित्तान्यतीन्द्रियाण्येव, पाचकपित्तन्तु आमाशयेऽम्लरसम् । ततश्च पच्यमानाशयात्प्रभृति कटुरसमुपलभ्यते । दृश्यमपि तत् सद्यो विपाटितोदरस्य शरीरे । या तु रसरक्तादिधातुविपरिणामिनी क्रिया, सन्तापशोषणादानादिका च, सा सूक्ष्मरूपस्य पाचकपित्तस्यैवेति द्वैविध्यमेव तस्य । अथ * श्लेष्मा सूक्ष्मप्रायो यः किल शिरसि सौम्यगुणानादधत् सर्वाणीन्द्रियाणि तर्पयति इति क्लेदका-

* श्लेष्मा पुनः स्थूलप्राय उदकगुणभूयिष्ठः । तत्रापि तर्पकः ।

ख्यश्चामाशये विद्यमानः स्थूल एव । किन्तु तस्यापि सूक्ष्मो भागः सर्वशरीरचरः सर्वधातुष्वाप्यभागयोजक इति द्वैविध्यं तस्यापि, अवलम्बकरसकश्लेषकाख्यास्तु स्थूला एव । तत्रावलम्बकः श्वासपथादेरभ्यन्तरतः स्वाभाविकार्द्रताप्रदः । रसको जिह्वादेरार्द्रतासम्पादकः स्वाभाविकलालारूपः स्वादग्रहणसहायः । श्लेषकस्तु सन्ध्यन्तः, स्नेहवत्पिच्छिलपदार्थमय इति । मलभूतयोस्तु पित्तकफयोर्नियतं स्थूलरूपत्वमेव । तथा च वमनादिषु मुखादिनिर्गतमम्लरसं कटुरसं वा पित्तम्, प्रतिश्यायादिषु नासादिस्रुतः श्लेष्मा चेति द्वयमपि किट्टरूपं स्थूलमेव । वायुस्तु मलावस्थायामपि सूक्ष्म एवेति । अत्र मलभूतस्य वायोर्यदतीन्द्रियत्वं स्थापितं तच्चिन्त्यमेव । उद्गारापानवाय्वोः, त्वगिन्द्रियग्राह्यत्वस्य सर्वैरनुभूयमानत्वात् । इत्यलं पल्लवितेन ।

सर्वस्मिन्नित्यादि–यन्मनो निरंकुशतयाऽनर्गलतया, सर्वस्मिन्विषये दुर्निरोधं नियन्तुमशक्यम् । किञ्च वायुरिव प्रकृष्टबलवत्तथा सर्वात्मना सर्वतोभावेन चञ्चलञ्च । तद्यक्ष्मणा प्रेरितैरुद्धतैर्धूर्तैः कामादिभिः कामक्रोधलोभदम्भमदमत्सरैरुपहतं स त्तसौहार्दं यक्ष्मणा सह मैत्रीमुपेत्य नः प्रातिकूल्यं चरेत्, यद्यपि, इति संभाव्यते । इति भावः ॥ ३२ ॥

अतस्तदपि महाधिकारेण वशीकृत्य महति व्यापारे विनियोज्य (क) तैरपि दुर्भेदं करिष्यामि । यद्यपि मद्विरोधिचेष्टोऽज्ञानशर्मा मदसंनिधाने राज्ञ उपजापेन कार्य्यभेदमेव जनयेत्तथापि जाग्रति फलकर्मैव । (?)

सर्वानर्थनिदाने यक्ष्माणि तस्मिन् समूलमेव मया ।
उन्मूलिते ततो नः कर्तव्यं नावशिष्यते किञ्चित् ॥ ३३ ॥

(क) महाधिकारेण योगशास्त्रोक्तयमनियमाद्यष्टाङ्गप्रयोगेण, महति व्यापारे साम्बशिवोपासनास्वरूपे विनियोज्य सङ्गमय्य ॥

सर्वानर्थनिदान इत्यादि—सर्वं स्पष्टम् ॥ ३३ ॥

तथा कर्तुमेव तावद्राजनिकटमेव गच्छामि (इति कतिचित्प-

दानि गत्वा पुरो विलोक्य) इदं तद्राजभवनम्। यावत्प्रविशामि।
कः कोऽत्र भोः !

(प्रविश्य)

प्रतीहारः—मन्त्रिन् ! किमाज्ञापयसि ।

मन्त्री—प्राण दौवारिक ! सम्प्राप्तं मां राज्ञे निवेदय ।

प्राणः—तथा । (इत्यन्तःपुरं प्रविष्टः)

मन्त्री—(परितो विलोक्य) इह खलु—

संमृज्य शोधिनीभिश्चत्वरवेदीतलेषु रम्येषु ।
रचयन्ति रङ्गवल्लीरन्तः पुरचारिका एताः ॥ ३४ ॥

संमृज्येत्यादि—सुगमम् ॥ ३४ ॥

गृह्णन् वेत्रलतां वसत्यवसरापेक्षी जरत्कञ्चुकी
राजा मामवलोकयेदिति समं वत्सेन गौस्तिष्ठति ।
वादित्रध्वानिमण्डलीकृतगरुद्बर्हीं नटत्यङ्गणे
देव ! त्वं विजयी भवेति गुणयन्नास्ते शुकः पञ्जरे ॥३५॥

गृह्णन्निति—अवसरापेक्षी राजनियोगं प्रतीक्षमाणो जरत्कञ्चुकी 'अन्तःपुरचरो राज्ञो वृद्धो विप्रो गुणान्वितः। उक्तिप्रत्युक्तिकुशलः कञ्चुकीत्यभिधीयते॥' इति दशरूपकोक्तलक्षणलक्षितो वृद्धो, वेत्रलतां गृह्णन् वसति । तथा वादित्रध्वनिभिर्वाद्यध्वानैर्मण्डलीकृतानि मण्डलाकारमारोपितानि गरुन्ति पिच्छानि येन तथाभूतो बर्हीं मयूरोऽङ्गणे नटति । किञ्च, पञ्जरे शुको 'देव ! त्वं विजयी भवे'ति गुणयन्नाम्रेडयन्नसकृदुच्चरन्नितियावदास्ते। शेषं स्पष्टम् ॥ ३५ ॥

(प्रविश्य)

दौवारिकः—(मन्त्रिणं प्रति) स्वामिन् ! भवन्तं द्रष्टुं बुद्ध्या (ख) देव्या सह भद्रासनमधिवसति राजा (ग)।

मन्त्री—अतिपरिचयेऽपि राज्ञो बिभेमि, सहसोपगन्तुमभ्यर्णम् ।
येनाग्नेरिव तेजः स्फुरदस्याराન્निवर्तयति ॥ ३६ ॥

(ख) बुद्धिर्हि 'निश्चयात्मिकाऽन्तःकरणप्रवृत्तिः' इति वेदान्तसारः। 'सविकल्पज्ञान'मिति चण्डीटीकायां नागेशभट्टः । अस्याः स्वरूपं यथा—'बुद्धिर्विवेचनारूपा सा ज्ञानजननी श्रुतौ' इति ब्रह्मवैवर्ते ॥

(ग) हैमं वा राजतं ताम्रं क्षीरिवृक्षमयञ्च वा । भद्रासनं प्रकर्तव्यं सार्धहस्तसमुच्छ्रितम् ॥ सपादहस्तमानञ्च राज्ञो माण्डलिकान्तरा,-दिति ।

अतिपरिचय इति—सहसा राजसमीपोपसर्पणे भयं हेतुना दर्शयति, येनेति । यतोऽस्य राज्ञोऽग्नेरिव तेजः स्फुरच्चाकचिक्येन देदीप्यमानमाराद् दूरादेव 'आराद् दूरसमीपयोः' इत्यमरः । निवर्तयति । स्पष्टमवशिष्टम् ॥ ३६ ॥

(विचिन्त्य) परपक्षं प्रति प्रतिविचारणाय प्रेषितां धारणां प्रतीक्षमाण इव लक्ष्यते । भवतु तदेतदहं वक्ष्यामि ।

(ततः प्रविशति बुद्ध्या देव्या सह राजा जीवः) (घ)

मन्त्री—(उपसृत्य) विजयतां महाराजः ।

राजा—इतो निषीदतु भवान् । (इति मन्त्रिणे आसनं निर्दिशति)

मन्त्री—(आसने उपविश्य स्वगतम्) एष खलु-

गण्डूषोदकशोधितेऽपि वदने ताम्बूलरक्ताधरः
स्नानापोहितचन्दनेऽपि वपुषि प्रोद्दामतत्सौरभः ।
निर्णिक्ते सिचये धृतेऽपि, कनकाकल्पेन पीताम्बरः ।
सोऽयं सत्यपि न प्रमाद्यति सदाचारादतिप्राभवे ॥ ३७ ॥

(घ) जीवो हि शरीरेन्द्रियसत्वात्मसंयोगस्वरूपः । तार्किकास्तु 'प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तर्विकाराः सुखदुःखेच्छा-

प्रयत्नाश्चात्मनो लिङ्गानि'। वै० ३।२।४। इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ।' न्या० द० १।१।१०। इति पूर्वोक्तविशेषणविशिष्टो जीव इति प्रतिपादयन्ति । महामुनिश्चरकोऽपि तथैव समर्थयते—'प्राणापानौ निमेषाद्या जीवनं मनसो गतिः । इन्द्रियान्तरसंचारः प्रेरणं धारणञ्च यत् ॥ देशान्तरगतिः स्वप्ने पंचत्वग्रहणं तथा। दृष्टस्य दक्षिणेनाक्ष्णा सव्येनावगमस्तथा ॥ इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः। बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः ॥ यस्मात्समुपलभ्यन्ते लिङ्गान्येतानि जीवतः । न मृतस्यात्मलिङ्गानि तस्मादाहुर्महर्षयः।' इति ॥ वेदान्तनये तु 'गुणान्तरेण कलुषीकृतप्रकाशात्मकसत्त्वगुणबहुलायामविद्यायां प्रतिबिम्बत्वेन स्थितश्चिदात्मा एव जीवः' । अथवा 'लिङ्गदेहकल्पनाधारभूतं यच्चैतन्यं, यश्च तत्र कल्पितो लिङ्गदेहः, यश्च तत्र लिङ्गदेहे वर्तमानाश्चिदाभासः, तेषां त्रयाणां समूह एव जीवः'। तदुक्तं विद्यारण्येन 'चैतन्यं यदधिष्ठानं लिङ्गदेहश्च यः पुनः। चिच्छाया लिङ्गदेहस्था, तत्सङ्घो जीव उच्यते' इति ॥ सांख्यसिद्धान्ते तु 'अव्यक्तं बुद्धिरहङ्कारः पञ्चतन्मात्राणि, इत्यष्टौ प्रकृतयः । एकादशेन्द्रियाणि, पञ्च महाभूतानि, इति षोडश विकाराः, इति चतुर्विंशतिस्तत्त्वानि पञ्चविंशः पुरुषः, इति मिलित्वा पञ्चविंशतितत्त्वात्मको जीवः।' इति। आयुर्वेदस्य तु सांख्यप्रतिपादितसिद्धान्त एव स्वरसः। तथा च भावमिश्रः 'एवं चतुर्विंशतिभिस्तत्त्वैः सिद्धे वपुर्गृहे। जीवात्मा नियतेर्निघ्नो वसति स्वान्तदूतवान्'। इति ॥

गण्डूषोदकेत्यादि—गण्डूषोदकेन शोधितेऽपि वदने ताम्बूलेनेव रक्तोऽधरो यस्य, स इव शोभत इति शेषः। तथा स्नानेनापोहितं दूरीकृतं चन्दनं यस्मादेवंभूतेऽपि वपुषि, प्रोद्दाम प्रकर्षेणोल्लसत्तस्य चन्दनस्य सौरभं गन्धो यस्य सः। अस्य राज्ञोऽधरलालिमा शरीरसुरभिता च नैसर्गिकी, इति भावः। तथा धृते सिचये वसने निर्णिक्ते धौते शुक्लेऽपीति भावः। कनकाकल्पेन काञ्चनाभूषणेन पीताम्बरः, कनकाभरणप्रभाया मुकुरेष्विव स्वच्छवसनेषु सङ्क्रान्तत्वादिति भावः। सोयं नृपोऽतिप्राभवे प्रशस्यप्रभुत्वे सत्यपि न प्रमाद्यति ॥ ३७ ॥

(प्रकाशम्) महाराजेन प्रहिताया धारणाया मुखात्तत्रत्यः

सर्ववृत्तान्तो विदित एव । सा पुनर्दुर्जनसंसर्गदोषपरिहाराय नदीं स्नातुं गता । तया च मयि संक्रमितस्तत्रत्यवृत्तान्तः । (क)

राजा—(सोत्कण्ठम्) (ख) कथमिव ।

देवी—[1]अहं वि अवहिदह्मि ।

मन्त्री—(स्वगतम्) इयं हि देवी

किमपि नियमिताग्रैः कुन्तलैः स्निग्धनीलैः
परिलसदपराङ्गा धारयन्ती दुकूलम् ।
धवलमुपरि भर्तुश्चामरं धूयमानं
विरमयति करेण व्यक्तमाकर्णनाय ॥ ३८ ॥

(क) सङ्क्रमितो मह्यं निवेदितः ।

(ख) उत्कण्ठा नाम, 'औत्सुक्यापरपर्य्यायो वाञ्छितार्थप्राप्तौ कालक्षेपासहिष्णुतारूपो मानसो विकारः' तमभिनयन्निति तत्त्वम् ॥

किमपीति—इयं राज्ञी किमपि नियमिताग्रैरीषदाकुञ्चिताग्रभागैः स्निग्धैर्नीलैश्च कुन्तलैः केशपाशैः परिलसत् शोभां वहत्पराङ्गं यस्याः सा, आनितम्बमायतकेशीति भावः । स्पष्टमन्यत् ॥ ३८ ॥

(प्रकाशम्) श्रोतव्यमिदं धारणावचनम् । यद्दमहतकः पुरान्निष्क्रामणमेवास्माकमिच्छतीति ।

राजा—किमत्र प्रतिविधातव्यम् ।

देवी—(सोद्वेगम्) (ग) [2]दाणिं किं कुम्मो ।

मन्त्री—देवि ! मा भैषीः । प्रतिविधानप्रकारोऽपि धारणया विदितः ।

---

१. अहमप्यवहितास्मि ।

२. इदानीं किं कुर्मः ।

राजा—कथमिव ।

मन्त्री—(कर्णे) एवमेवम् ।

राजा—कथमिदं धारणया निर्धारितम् ।

मन्त्री—रसगन्धकप्रयोगमन्तरेण सपरिवारोऽहमजय इति यक्ष्मराजस्य हृदयं (क) विश्वसनीयया तापसीवेषया धारणया गृहीतम् ।

देवी—(साश्वासम्) जंइ एव्वं ता कहं अह्मेहिं रसगन्धआ संपादणिज्जेति ।

राजा—शंभोर्वीर्यं रसो नाम शर्वाण्या नाम गन्धकः ।
ताभ्यामेव प्रसन्नाभ्यां तौ ग्राह्याविति मे मतिः ॥३६॥

(ग) अपकारिजनाद्भयमुद्वेगः ।

(क) हृदयमभिप्रेतम् । तात्स्थ्यात्तद्गतवस्तुनोऽपि तेनैव निर्देशादिति भावः ।

शंभोरित्यादि—सुगमम् ॥ ३६ ॥

देवी—केणं उण उवाएण ताणं पसादो संपादणिज्जो ।

मन्त्री—उपासनयैव ।

राजा—युक्तमुक्तं भवता । श्रूयते हि पुरा मृकण्डुरुमापतिमुपास्य पुत्रं लेभे । तत्पुत्रोऽपि तदुपासनया मृत्युमुखान्मुक्तो दीर्घमायुरलभतेति ।

मन्त्री—सम्यगवगतं महाराजेन । यतः खल्वेष—

पादाघातत्रुटितयमुनाभ्रातृबाह्वन्तरोद्य-
द्रक्तस्रोतःसमुपशमिताशेषशोकाश्रयाशम् ।

---

(१) यद्येवं तत्कथमस्माकं रसगन्धकौ सम्पादनीयौ, इति ।

(२) केन पुनरुपायेन तयोः प्रसादः सम्पादनीयः ।

मार्कण्डेयं व्यतनुत यदा सर्वभूतैस्तदादि-
स्तुत्यं मृत्युञ्जय इति यशः स्फारमीशः प्रपेदे ॥४०॥

पादाघातेत्यादि—यदा ईशो मार्कण्डेयं, पादाघातेन त्रुटितं भिन्नं यद्यमुनाभ्रातुर्यमस्य बाह्वोरन्तरं वक्षस्तस्मादुद्यतोच्छलता रक्तस्रोतसा समुपशमितोऽशेषः शोकाश्रयाशः शोकानलो यस्य एवं भूतं व्यतनुत। तदारभ्य सर्वभूतैः स्तुत्यं 'मृत्युञ्जय' इति स्फारं रमणीयं यशो विरुदं प्रपेदे प्राप ॥ ४० ॥

राजा—पुरा खलु देवदानवैरमृतार्थिभिर्महोरगयोक्त्रपरिवेष्टितवि-कृष्यमाणमन्दरमन्थानदण्डैः(क)र्मथ्यमाने दुग्धसागरे, गरलमुद्भट-मुत्थितमसहमानेषु भुवनेषु विनष्टप्रायेषु, पलायनाभिमुखे चतुर्मुखे (ख), विगलितौजसि विडौजसि (ग) । भगवानेवैष विषमश्नन् जगदनुचकम्पे । तथा हि—

मेघाक्रान्तदिगन्तदर्शरजनीमूर्च्छत्तमोमेचकं
तापद्रावितदेवदानवनरं यः कालकूटं गरम् ।
जग्ध्वा जम्बिव बालकस्त्रिभुवनत्राणं ततानाञ्जसा
तस्य द्राङ्महिमा न वाङ्मनसयोः पन्थानमारोहति ॥४१॥

(क) महोरग एव योक्त्रं नेत्रं मन्थदण्डवेल्लनरज्जुरिति सरलो भावः । तेन परिवेष्टितस्ततो विकृष्यमाणश्च मन्दर एव मन्थानदण्डो यैस्तैरमरैः ।

(ख) चतुर्मुखे ब्रह्मणि पलायनाभिमुखे पलायितुं प्रक्रान्ते सति ।

(ग) विडौजसिन्द्रे विगलितमोजो यस्य तस्मिन्निस्तेजसि जाते ।

मेघाक्रान्तेति—मेघैराक्रान्ता दिगन्ता यस्यामेवंभूता या दर्शरजनी अमारात्रिस्तस्यां मूर्च्छत्प्रवर्द्धमानं तमः, तद्वत् मेचकं नीलवर्णम् । अत्र तिमिरसादृश्येनैव परं मेचकत्वे सिद्धे तमसो दर्शरजन्यां मूर्च्छना, दर्शरजन्याश्च मेघाक्रान्तदिगन्तेति वर्णनात्, हालाहलस्य अनिर्वाच्या

मेचकतेति सूचितम्। तापेनोष्मणा द्राविताः पलायिता देवा दानवा नराश्च येन तं कालकूटं गरं हालाहलं बालको जम्ब्वाः फलं जम्बु, तदिव जग्ध्वा यः त्रिभुवनत्राणमञ्जसाऽनायासेन ततान, तस्य शिवस्य महिमा वाङ्मनसयोः पन्थानं द्राक् झटिति नारोहति ॥ ४१ ॥

मन्त्री—किमुच्यते महिमेति । श्रूयतां तावत् । त्रिपुरविजयप्रसक्तावसक्त इव स्वयं तदर्थं कतिचित्साधनानि सम्पाद्य तान्यपि वितथीकृत्य स भगवान्निजमेव महिमानमभिव्यक्तवान् । तथा हि—

सूर्याचन्द्रमसौ रथाङ्गयुगलं सूतो विधाता स्वयं
रथ्याश्वा निगमाश्च यस्य रथमारूढेन भूमीमयम् ।
मेरुं धन्व विषक्तवासुकिगुणं कृत्वा शरं चाच्युतं
तिस्रस्तेन पुरः स्मितेन तु परं दग्धाः सुरद्वेषिणाम् ॥४२॥

सूर्याचन्द्रमसाविति—यस्य शंभोः सूर्य्याचन्द्रमसौ रथाङ्गयुगलं रथचक्रद्वयम्, तथा विधाता स्वयं सूतः सारथिः, किञ्च निगमा वेदाः रथ्याश्वा आसन्निति शेषः । तेन भूमीमयं रथमारूढेन सता विषक्तः संलग्नो वासुकिरूपो गुणो ज्या यत्र तं मेरुं धन्व धनुः (धनुःपर्यायोऽयं धन्वन् शब्दः) अच्युतं हरिञ्च शरं कृत्वा सुरद्वेषिणां तिस्रः पुरो दग्धाः ॥ ४२ ॥

राजा—एवमपरिमितान्याश्चर्य्यचरितानि देवस्य ।

देवी—किं[1] अच्चरिअं । महेसरस्स जह जह जारिसो उपासनं करेदि तह तह तारिसं सो तं तं फलं पावेदि ।

मन्त्री—एवमेतत् ।

राजा—एवमनिर्धारणीयनानास्वरूपा भगवती । वरमेतत् ।

---

(१) किमाश्चर्यं । महेश्वरस्य यथा यथा यादृशं उपासनं करोति तथा तथा तादृशं स तत्तत् फलं प्राप्नोति ।

परन्तु भगवतो दयारूपैवेयम् । अत एव लोकरक्षणार्थो प्रवृत्तिरेतस्याः । श्रूयतां तावत् ।

भक्तिप्रह्वमहेन्द्रमुख्यमखभुक्प्रारब्धभूरिस्तव
प्रादुर्भावितनिर्भरप्रमदया कारुण्यभाजा यया ।
निद्राभङ्गमवापितेन हरिणा दीप्तौजसा घातया-
मासाते मधुकैटभावतिबलौ सा केन वा वर्ण्यते ॥४३॥

भक्तिप्रह्वेति—भक्त्या प्रह्वा नम्रा ये महेन्द्रमुख्या इन्द्रप्रभृतयो मखभुजो देवास्तैः प्रारब्धेन भूरिस्तवेन प्रादुर्भावितो निर्भरप्रमदो हर्षातिशयो यस्या एवंभूतया यया देव्या निद्राभङ्गमवापितेन प्रबोधितेन हरिणा मधुकैटभौ घातयामासाते घात्येते स्म, सा भगवती केन वर्ण्यताम्, अनिर्वाच्यमाहात्म्येति भावः ॥ ४३ ॥

मन्त्री—राजन् ! तथ्यमेवाह भवान् । अस्याः किल भक्तवात्सल्यमनन्यतुल्यं पश्यामि ।

दूरोद्धूतविषाणकोटिघटनाचूर्णीकृताम्भोधरं
प्रेङ्खत्पादचतुष्टयीखुरपुटप्रक्षुण्णपृथ्वीतलम् ।
कल्पान्ताभ्रकठोरकण्ठनिनदत्रस्तात्रिलोकीजनं
विक्रान्तं महिषासुरं युधि पुरा चिच्छेद शूलेन या ॥४४॥

दूरोद्धूतेति—दूरमत्यर्थमुद्धूतोत्क्षिप्ता या विषाणकोटिः शृङ्गाग्रं तस्या घटनयाऽऽघट्टनेन चूर्णीकृताः क्षुण्णा अम्भोधरा मेघा येन तं, तथा प्रेङ्खन्ती इतस्ततः क्षिप्यमाणा, या पादचतुष्टयी, तस्याः खुरपुटैः प्रक्षुण्णं, खातप्रायं, पृथ्वीतलं येन तथा, कल्पान्ते योऽभ्रः प्रलयमेघस्तस्येव कठोरेण कंठनिनदेन गर्जनेन, त्रस्तास्त्रिलोक्यां जना येनैवंभूतं महिषासुरं या देवी शूलेन चिच्छेद ॥ ४४ ॥

देवी—सा खु परमेसरी बहुबिहदेवश्रासत्तिरूश्रावश्रवा पअण्डपरक्कमखण्डिश्रचण्डमुण्डधुम्मलोश्रणरत्तवीजप्पहुदिदाणवमण्डला सुणीश्रदि चण्डिश्रा णामधेएत्ति ।

राजा—तदपि ज्ञायते । यथा खलु

शस्त्रच्छिन्नसुरारिसैन्यपिशितग्रासग्रहप्रीतिम-
त्कङ्कक्रोष्टरि सङ्गरे सुरवधूमुक्तप्रसूने स्थितम् ।
देव्या शुंभनिशुंभदानववधप्रक्लिन्नचित्तस्तुव-
द्रुद्रेन्द्राग्निकृतान्तनैर्ऋतजलाधीशानिलश्रीदया ॥४५॥

शस्त्रेत्यादि—शस्त्रैश्छिन्नं यत्सुरारिसैन्यं, तस्य पिशितस्य मांसस्य, ग्रासग्रहणे प्रीतिमन्तः कङ्का गृद्ध्राः, क्रोष्टारश्च यत्र तथा, सुरवधूभिर्मुक्तानि प्रसूनानि यत्र, तत्र संगरे युद्धे देव्या स्थितम् । किंभूतया ? शुंभनिशुंभयोर्दानवयोर्वधेन प्रक्लिन्नं प्रीत्यार्द्रं चित्तं येषान्ते, अतएव स्तुवन्तो रुद्रश्चेन्द्रश्चाग्निश्च कृतान्तो यमश्च, नैर्ऋतश्च जलाधीशो वरुणश्चानिलो वायुः श्रीदः कुबेरश्च यां सा तया ॥ ४५ ॥

मन्त्री—राजन् ! एवं भक्तवत्सलयोरनादिदम्पत्योरुपासनया सम्पादनीया सिद्धिः । किञ्च—

सामर्थ्यसिद्ध्यै रसगन्धकानां संयोजनार्थं सकलौषधीश्च ।
सम्पादयामोऽथ तदाश्रितस्य सर्वौषधीशस्य विधोः प्रसादात् ॥४६॥

सामर्थ्येत्यादि—स्पष्टम् ॥ ४६ ॥

देवी—कदमं उण देसं पविसिश्र उवासणिज्जा एदे ।

मन्त्री—पुण्डरीकपुरं प्रविश्य । (क)

---

(१) सा खलु परमेश्वरी बहुविधदेवताशक्तिरूपावयवा प्रचण्डपराक्रमखण्डितचण्डमुण्डधूम्रलोचनरक्तबीजप्रभृतिदानवमण्डला श्रूयते चण्डिका नामधेयेति।

(२) कतमं पुनर्देशं प्रविश्योपसनीयावेतौ ।

देवी—कंहं तत्थ पवेसो ।

मन्त्री—देवि !

शक्यं तत्खलु पुण्डरीकनगरं गन्तुं मनोद्वारतः
तत्रास्ते शिवभक्तिरित्यनुपमा कापि प्रमोदास्पदम् ।
दृष्ट्वा तां प्रथमं तथा परिचयस्तस्या विधेयस्त्वया
चत्वारोऽपि भवन्ति ते करतलं प्राप्ताः पुमर्था यथा ॥४७॥

(क) पुंडरीकपुरम्—तदिदं पुण्डरीकपुरमुक्तं छान्दोग्ये दहरोपासनायाम् 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वेश्म, दहरोऽस्मिन्नन्तरमाकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्य'-मित्यारभ्य 'एतत्सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिताः । एष आत्माऽपहतपाप्मा विरजो विमृत्युर्विशोकोऽविचिकित्सोऽपिपासः सत्यकामः सत्यसंकल्प' इति । तैत्तरीयेऽपि 'दहरं विपाप्मं परमेशभूतं हृत्पुंडरीकं पुरमध्यसंस्थम् । तत्रापि दह्रं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्य'मिति । तथा शैव एकादशरुद्रसंहितायाम् 'दहरं विपाप्मं परमेश्वरस्य यद्वेश्मभूतं सकलं पुरस्थम् । तत्रापि दह्रं गगनं विशोकं तदेव नित्यं सकलैरुपास्य' मिति । पुरुषस्यान्तरन्वेषणमुक्तं याज्ञवल्क्येन 'ब्रह्म ब्रह्मपुरे गार्गि ! दहराब्जे खमध्यमे । अभ्यासात्तं प्रपश्यन्ति सन्तस्त्वञ्च तथा कुरु' । तद्वानेन मोक्षप्राप्तिरप्युक्ता श्वेताश्वतरे अतः परं ब्रह्मपरं बृहन्तं यथानिकायं सर्वभूतेषु गूढम् । विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वाऽमृता भवन्ति । ब्रह्माण्डपुराणे शैवे च—'स्वराडाख्यस्य देवस्य हृदयाम्भोजमध्यमे । उमासहायो भगवान्नीलकण्ठस्त्रिलोचनः । यश्च नृत्यत्यसौ नित्यं परमानन्दचिद्घनः तं दृष्ट्वा मनुजः सर्वो विमुक्तो भवतीति हि' ॥

शक्यमित्यादि—तस्याः शिवभक्तेस्तथाभूतः । परिचयोऽभ्यासस्त्वया विधेयो यथा चत्वारोऽपि पुमर्था धर्मार्थकाममोक्षाख्याः करतलं प्राप्ता भवन्ति । इति । शेषं स्पष्टम् ॥ ४७ ॥

---

(१) कथं तत्र प्रवेशः ।

राजा—(सोत्कण्ठम्)

तामद्वैतां स्वरूपेण भक्तिं हृदयरञ्जिनीम् ।
स्वीकृत्याहं भविष्यामि प्राप्ताखिलमनोरथः ॥ ४८ ॥

तामद्वैतामित्यादि—स्वरूपेणाद्वैतामद्वितीयां सर्वोत्कृष्टामित्यर्थः । हृदयरञ्जिनीं, तस्या अनुरागरूपतयोपपद्यते हृदयरञ्जनमिति । भक्तिं स्वीकृत्याश्रित्य प्राप्ताखिलमनोरथो भविष्यामि । अत्र भक्तिः—'पूज्येष्वनुरागो भक्तिः' इत्युपदेशः । 'साचेश्वरे पराऽनुरक्तिरूपा' इति शाण्डिल्यसूत्रम् । उपास्याकाराकारितचित्तवृत्त्यावृत्तिरूपा परिपक्वनिदिध्यासनाख्या श्रवणमननाभ्यासफलरूपाऽनुरक्तिः । अर्थान्नहीष्टदेवात्परमस्ति किञ्चिदितिपूर्विका चित्तवृत्तिः । 'भक्तिर्वात्सल्यमद्भुतोत्कर्षापेक्षमहेतुकाराधनपर्यवसायि' इति । आचार्य्य रामावतारः । सा च भक्तिर्नवधा । तदुक्तं भागवते नवमस्कन्धे—'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदन'मिति ॥ ॥ ४८ ॥

देवी—(सासूयमिव स्वगतम्) कहं[१] सव्वपुरुसत्थप्पसवित्तिआ सेत्ति सुणिअ सुदघणाघणगज्जिदो मोरो व्विअ उक्कण्ठिदो अज्जउत्तो । होदु । ता मए वि तहिं गन्तव्वम् । (प्रकाशम्) अज्जउत्त[२] ! अहं वि आगमिस्सम् ।

राजा—(स्वगतम्) कथमनयाऽप्यागन्तव्यम् । विचिन्त्य) भवतु । (प्रकाशम्) अयि भद्रे ! भक्तिपराधीनं साम्बमुपास्यावामभिलषितमर्थं साधयावः । (मन्त्रिणं प्रति)

---

(१) कथं सर्वपुरुषार्थप्रसवित्री सेति श्रुत्वा श्रुतघनोद्घनगर्जितो मयूर इव उत्कण्ठित आर्यपुत्रः । भवतु तन्मयापि तत्र गन्तव्यम् ।

(२) आर्यपुत्र ! अहमपि आगमिष्यामि ।

राज्यं त्वयि समारोप्य योग्ये सर्वाङ्गसंहितम् ।
देव्या सह शिवं साम्बमुपास्तुं यामि तत्पुरम् ॥ ४६ ॥

राज्यमित्यादि सरलम् ॥ ४६ ॥

मन्त्री—यथा रोचते देवस्य ।

(इति निष्क्रान्ताः सर्वे) (क)

इति प्रथमोऽङ्कः ॥ (ख)

(क) अत्र बहुवचनान्तपाठात्तद्दिवसीयाभिनयसमाप्तौ सभ्यादयोऽपि निष्क्रान्ताः इत्यर्थः ॥ (१)

(ख) अङ्कलक्षणमुक्तं साहित्यदर्पणे 'प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः । भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः ॥ विच्छिन्नावान्तरैकार्थः किञ्चित्संलग्नबिन्दुकः । युक्तो न बहुभिः कार्यैर्बीजसंहृतिमान्न च ॥ नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् । आवश्यकानां कार्याणामविरोधाद्विनिर्मितः ॥ नानेकदिननिर्वर्त्यकथया सम्प्रयोजितः । आसन्ननायकः पात्रैर्युक्तस्त्रिचतुरैस्तथा ॥ दूराह्वानं बधो युद्धं राज्यदेशादिविप्लवः । विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा ॥ दन्तच्छेद्यं नखच्छेद्यमन्यद्व्रीडाकरञ्च यत् । शयनाधरपानादि नगराद्युपरोधनम् ॥ स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः । देवीपरिजनादीनाममात्यवणिजामपि ॥ प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः । अन्ते निष्क्रान्तसकलपात्रोऽङ्क ईरितः' इति ।

इति श्रीजीवानन्दरसायनाख्यसंक्षिप्तटिप्पणे प्रथमोऽङ्कः ।

द्वितीयोऽङ्कः ।

(ततः प्रविशति चेटः कासः)

कासः—अहं खलु स्वमन्त्रिहतकोपदिष्टं किमपि रहस्यं शृण्वञ्जीवो नाम प्रतिराजा स्वस्मिन्किमपि चेष्टितुमन्तर्मुखस्तिष्ठतीति चारमुखादवगतवता संभ्रान्तेन महाराजेन यच्दमणा, किमयं वृत्तान्तः श्रुतस्त्वया न वेति, युवराजं पाण्डुं पृष्ट्वाऽऽगच्छेति प्रेषितोऽस्मि । अतस्त्वरन्नितो युवराजसमीपं गच्छामि । अहो महाराजस्य युवराजे महती प्रीतिः । यतः—

यद्यज्ज्ञातं स्वयं तत्तद्युवराजोऽपि वेत्ति चेत् ।
तदा राज्याधिकारेऽस्य शक्तिः स्यादिति मन्यते ॥ १ ॥

यद्यज्ज्ञातमित्यादि—पद्यं सुगमम् ॥ १ ॥

(पार्श्वतो विलोक्य) कथमियं छर्दिः । यैषा—

प्रवालमृदुलाधरप्रतत (प्रकर) चारुबिम्बप्रभा
(हृता) मदाहतविलोचनाञ्जनविशेषदृश्यानना ।
मयूरपदकस्फुरत्कठिनतुङ्गपीनस्तनी-
तरङ्गयति कौतुकं तरुणिमाश्रिया चेतसि ॥ २ ॥

प्रवालेत्यादि—प्रवालवत् मृदुलेऽधरे प्रतता विस्तृता चार्वी-बिम्बप्रभा यस्यास्तथा, मदेन आहत आघूर्णिते विलोचने यस्यास्तथा, अञ्जनेन विशेषेण दृश्यं मनोरममाननं यस्यास्तथा, मयूरस्येव पदकं—मयूरपदकं नखाघातः, तदुक्तं शब्दमालायाम् (तथा बककोली च नखाघाते च मुण्डनम् मयूरपदकम्) इति । तेन स्फुरन्तौ

लावण्यधरौ कठिनौ तुङ्गौ पीनौ स्तनौ यस्याः एवम्भूता सा चेतसि तरुणिमश्रिया तरुणस्य भावः तरुणिमा तरुणिम्नः श्रीः शोभा इति तरुणिमश्रीः तया यौवन कान्त्या, कौतुकं तरङ्गयति बर्धयति ॥ २ ॥

(स्मरणमभिनीय)

श्लथजलधरजालश्लिष्टशीतांशुबिम्बा-
नभिनवमुकुराविर्भूतमुक्ताकदम्बान् ।
दरतरलितचक्रद्वन्द्वखेलन्मृणाला-
न्विवशहृदयमस्या विभ्रमानन्वभूवम् ॥ ३ ॥

श्लथेत्यादि—पुरुषायितवर्णनमेतत् । श्लथेन शिथिलेन जलधरजालेन केशकलापेन श्लिष्टं सम्पृक्तं आच्छादितमित्यर्थः, शीतांशुबिम्बं मुखं येषु तथा, अभिनवे स्वच्छे मुकुरे ललाटपट्टे आविर्भूत उद्भूतो मुक्ताकदम्बः स्वेदोदबिन्दुचयो येषु तथा, दरमीषत् तरलितं कम्पितं यच्चक्रद्वन्द्वं कुचयुगलं तत्र खेलन् दोलायमानो मृणालो हारो येषु, एवम्भूतानस्या विभ्रमान् पुरुषायितबिलासान् विवशहृदयं यथा तथाऽन्वभूवम् ॥ ३ ॥

अत्र जलधरजालकेशकलापयोः, शीतांशुविम्बवदनयोः, मुकुरललाटयोः, चक्रद्वन्द्वकुचयुगलयोः, मृणालहारयोश्च भेदेऽपि सादृश्यनिबन्धनाभेदारोपरूपा अतिशयोक्तिः[1] । तथा च—

कथमुपरि कलापिनः कलापो
विलसति तस्य तलेऽष्टमीन्दुः ।
कुवलय युगलं ततो विलोलं
तिलकुसुमं तदधः प्रवालमस्मात् ॥

(क) पुरुषायितम्—तत, यत्र प्रहणनादि व्यापारेण परिश्रान्ते नायके नायिका पुरुषमधो निपात्य पुरुषवदाचरेत्, इति जयमङ्गलायां यशोधरः ।

---

(१) रूपकातिशयोक्तिरिति ध्येयम् ।

(सभयम्) तदियं मामवलोकयति चेदिदानीं विभ्रममूल्यमनुपयुज्य मां निरुन्धीत ततो गमनविघ्नः स्यात् । (इत्युत्तरीयपटेन मस्तकमवगुण्ठयन्नन्यतो गच्छति)

(प्रविश्य)

छर्दिः—अएं सठ ! रत्तिम्मि मुत्ताफलं परिपणीकदुअ पुरुसाइदं (क) मए कारविअ दाणिं मं पेक्खिअ ओगुण्ठितसीसो बद्धकटी कुदो पलाएसि । (इति कासं हस्ते गृह्णाति)

कासः—मुञ्च मुञ्च । (इति हस्तं धुनोति)

छर्दिः—(दृढं हस्तमवलम्ब्य) हदास[2], मह पीडएणादं दाऊण गच्छेहि ।

कासः—हञ्जे यावदागत्य दास्यामि ।

छर्दिः—कुदो[3] आगमिअ ।

कासः—धिङ्मूर्खे, नायमवसरः । पश्चात्कथयिष्यामि ।

छर्दिः—जइ[4] दाणिं ण कहेसि अहं वि ण मुञ्चेमि ।

कासः—तर्हि गृहाण मुक्ताफलस्य प्रतिनिधिमिमामूर्मिकाम् । (इत्यङ्गुलीयकं विमुच्य प्रयच्छति)

छर्दिः—इदं होदु कुदो आगमिअ त्ति कहेहि ।

कासः—किं मम वधमिच्छसि । यतः—

---

(१) अये शठ ! रतौ मुक्ताफलं परिपणीकृत्य पुरुषायितं मया कारयित्वा इदानीं मां प्रेच्यावगुण्ठितशीर्षो बद्धकटिः कुतः पलायसे ? ।

(२) हताश ? मम प्रतिज्ञातं दत्वा गच्छ ।

(३) कुत आगत्य ।

(४) यदिदानीं न कथयसि अहमपि न मुञ्चामि ।

(५) इदं भवतु कुत आगत्येति कथय ।

कार्यं राज्ञां मन्त्रिभिर्मन्त्रितं यत्सर्वेषां तत्सर्वथा गोपनीयम् ।
येऽभिव्यञ्जन्त्येतदुद्यत्प्रमादाः शीर्षच्छेद्यांस्तन्वते तान्नरेन्द्राः ॥४॥

कार्यं राज्ञामित्यादि—सुगमम् । शीर्षच्छेद्याः बधार्हाः, इत्यर्थः । शेषं स्पष्टम् ॥ ४ ॥

छर्दिः–जहं तह होदु । एदं दाव कहेहि ।

कासः–(स्वगतम्) अहो दास्याः स्नेहपरिपाकः । यः परमनर्थाय संपद्यते । तथा हि—

स्त्रियः स्वार्थपराः प्रायः परदुःखं न जानते ।
अप्रष्टव्यं यदप्राक्षीद् गृहिणी कैकयाधिपम् ॥ ५ ॥

स्त्रियः स्वार्थपराः—इति स्पष्टम् ॥ ५ ॥

(प्रकाशम्) राजकौलीनमेतत् इति न कथयामि । मुञ्च । (इति त्वरयति)

छर्दिः–मा भयाहि तुमं । जं मञ्जूसा क्खु अहं राजकज्जाणं । अदो ण पआसेमि ।

कासः–(विहस्य) छर्दिका किल त्वं प्रकृत्या । तत्कुतो न प्रकाशयासि ।

छर्दिः–(विहस्य) भसणसीलस्स कुक्कुरस्स विअ तुह जाआ अहम् । होदु । एदं कहेहि पत्थुदम् ।

---

(१) यथा तथा भवतु । इदं तावत्कथय ।

(२) मा बिभेहि त्वम् । यन्मञ्जूषा खल्वहं राजकार्याणाम् । अतो न प्रकाशयामि ।

(३) भषणशीलस्य कुक्कुरस्येव तव जायाऽहम् । भवतु । एतत्कथय प्रस्तुतम् ।

कासः—(स्वगतम्) इयं राजकार्यकथननिर्बन्धान्न मुञ्चति माम् । का गतिः ? (प्रकाशम्) हञ्जे, कथयामि । शृणु तावत् ।

छर्दिः—ओहिदम्हि[1] ।

कासः—मया कटकप्रवेशः कर्तव्यो युवराजस्य पाण्डोर्दर्शनाय ।

छर्दिः—ता[2] किं विचारीअदि । अम्हकेरभडक्कन्ते सुगमो सत्तुणो पुरे मग्गो तुज्झ । सान्द्णक्खत्ते णहे इन्दुणो व्विअ ।

कासः—त्वं पुरोपरोधमात्रं जानासि । तत एवं ब्रवीषि ।

छर्दिः—किं[3] अण्णं वि तत्थ कडए पउत्तं जं मए ण जाणीअदि ।

कासः—श्रूयताम् ।

अस्मत्सैन्यैर्निरोधं कृतमगणयता स्वे पुरे सूपदिष्टं
जीवोऽमात्येन योगं स किल निशमयन् प्रापदन्तर्मुखत्वम् ।
इत्यस्माकं निशम्य प्रभुरतिविशदं चारवक्रात्कुमारं
गत्वा प्रच्छ त्वयेदं विदितमथ नवेत्याकुलः प्राहिणोन्माम् ॥६॥

अस्मदित्यादि—जीवः स्वे पुरेऽस्मत्सैन्यैः (यक्ष्मराजसैन्यैरिति यावत्) कृतं निरोधमुपरोधमवगणयता तिरस्कुर्वता अमात्येन विज्ञानशर्ममन्त्रिणा सूपदिष्टं योगं निशमयन् शृण्वन् अन्तर्मुखत्वमन्तर्वृत्तित्वं प्रापत् । इत्येतत् चारमुखाद् दूतद्वारा अतिविशदं निपुणं यथा तथा निशम्य अस्माकं प्रभुर्यक्ष्मा "त्वया (कुमारेणेत्यर्थः) इदं विदितं नवेति कुमारं युवराजं गत्वा प्रच्छ" इति हेतोः, आकुलो मां प्राहिणोत् ॥६॥

---

(१) अवहिताऽस्मि ।

(२) तत्किं विचार्यते ? अस्मदीय भटाक्रान्ते सुगमः शत्रोः पुरे मार्गस्तव । सान्द्रनक्षत्रे नभसि इन्दोरिव ।

(३) किमन्यदपि तत्र कटके प्रवृत्तं यन्मया न ज्ञायते ।

छर्दिः—जुवराएण पण्डुणा विदिदं णवेत्ति णत्थि संदेहो। जेण एदं एव्व सुणिअ सअलसामन्तचक्केण सह सिद्धसेणिओ रहस्सागारे णिद्दाभङ्गकसाइदलोअणो चिन्तापज्जाउलोए जुवराओ चिट्ठदि। तुए वि तत्थ गच्छीअदु। णाह, पञ्चवि तुह वअस्सा सास सिवातप्परा तह जेव्व वट्टन्दि।

कासः—कथमिदं ज्ञातं त्वया।

छर्दिः—तुह[2] पुव्वगिहिणीए कण्ठकण्डूए परिदेवण (क) मुहेण देइए विसूचीए संणिहाणे सव्वं राअकज्जं णिवेदिदम्। तहिंसंणिहिदथम्भन्तरिदाए मए सुदम्।

कासः—कुतः कीदृशं च परिदेवनं तस्याः?

छर्दिः—जं[3] तुए मं कामअन्तेण पुव्वगिहिणीये ताए पणअभङ्गो किदे तेण कादव्वं परिदेवणं क्खु ताए। तह खु कण्ठकण्डू देवीए कहिदवदी जं किल भट्टिणि। एदं मह दुज्जादं पण्डुगिहिणीए णिवेदिदुं गदम्हि। सा उण कालन्तरे एदं होदुत्ति जह तह मह अस्सुप्पमज्जणं किदवदी। तं जह—(स्मरणमभिनीय सभयम्, संस्कृतमाश्रित्य)।

---

(१) युवराजेन पाण्डुना विदितं नवेति नास्ति संदेहः। येनैतदेव श्रुत्वा सकलसामन्तचक्रेण सह सिद्धसैनिको रहस्यागारे निद्राभङ्गकषायितलोचनश्चिन्तापर्याकुलो युवराजस्तिष्ठति। त्वयापि तत्र गम्यताम्। नाथ! पंचापि तव वयस्याः श्वासाः सेवातत्परास्तत्रैव वर्तन्ते॥

(२) तव पूर्वगृहिण्याः कण्ठकण्डूत्याः परिदेवनमुखेन देव्याः विसूचिकायाः संनिधाने सर्वं राजकार्यं निवेदितम्। तत्र संनिहितस्तम्भान्तरितया मया श्रुतम्।

(३) यत्त्वया मां कामयमानेन पूर्वगृहिण्यास्तस्याः प्रणयभङ्गः कृतः। तेन कर्तव्यं परिदेवनं खलु तया। तथा खलु कण्ठकण्डूर्देव्यै कथितवती यत्किल भट्टिनि?, एतन्मम दुर्जातं पाण्डुगृहिण्यै निवेदितुं गतास्मि। सा पुनः कालान्तरे एतद्भवत्विति यथा तथा ममाश्रुप्रमार्जनं कृतवती। तद्यथा।

अस्यात्याहितकर्मणो व्यपगमे कासेन भर्त्रा समं-
(संधास्येत्यवर्ती) संधास्ये भवतीं तु तत्प्रियसखान्संप्रेषयन्ती रहः।
इत्थं श्वासविलासिनीरुपगताः पञ्चापि हिक्काः सुखी-
कृत्य द्रागुपसान्त्व्य पाण्डुदयिता मां प्राहिणोत्कामला ॥ ७ ॥

(क) परिदेवनम्—नाम विलापः। विलापः परिदेवनमित्यमरोक्तेः।

अस्यात्याहितेत्यादि—अस्य जीवकृतान्तमुखत्वलक्षणस्य अत्याहितकर्मणो भयावहकार्यस्य व्यपगमे विनाशे तस्य कासस्य प्रियसखान् रहः संप्रेषयन्ती, भर्त्रा कासेन समं, भवतीं सन्धास्ये सङ्गमयिष्ये इत्यर्थः (णयर्थस्यान्तर्भावितत्वात्) स्पष्टमन्यत् ॥ ७ ॥

तत्थं वि मन्दभाइणी अहम् हदमणोरहा जादेत्ति।

कासः–(विचिन्त्य) मा बिभेहि। ज्ञातस्तव भावः। त्वयि प्रणयस्य भङ्गे कंठकण्ड्वा यत्नः क्रियत, इति गच्छामि तत्रैव तानपि वशीकुर्याम्। तेऽपि मद्बुद्ध्यैव पुष्टाः कथं मह्यं द्रुह्येयुः ?

छर्दिः–गच्छेहि कज्जसिद्धीए अहं वि देईए सकासं गमिस्सम्।

इति निष्क्रान्तौ।

प्रवेशकः। (क)

(ततः प्रविशति रहस्यागारस्थः सुप्तोत्थितः सचिन्तः पाण्डुः)

पाण्डुः–कः कोऽत्र भोः !!!

(प्रविश्य)

दौवारिकः–विजयतां देवः।

(पाण्डुर्निद्रालसो जृम्भते)

दौवारिकः–(आत्मगतम्) एष किल

---

(१) तत्रापि मन्दभागिन्यहं हतमनोरथा जाता।

(२) गच्छ कार्यसिद्ध्यै, अहमपि देव्याः सकाशं गमिष्यामि।

आरक्तसंकुचदपाङ्गमुदग्रदंष्ट्रं
व्यादाय वक्त्रमुरुपाटलदीर्घजिह्वम् ।
उच्चैर्भुजौ वलयितौ ग्रथिताङ्गुलीकौ
कुर्वन् सशब्दमिह जृम्भणमातनोति ॥ ८ ॥

(क) प्रवेशकः—चेटरूपकासप्रवेशोत्तरमारब्धः सन्दर्भः प्रवेशकपदेनाभिधीयते । तल्लक्षणं तु—अधमपात्रेण पात्राभ्यां वा सूच्येतिवृत्तसूचनं प्रवेशकः । यदाह धनिकः—

तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः ।
अंकद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥ इति ॥

तद्वदेवेति विष्कम्भकलक्षणोक्तं भूतभविष्यदर्थज्ञापकत्वं संक्षिप्तार्थत्वं चात्रातिदिशति । अंकद्वयस्यान्तरित्युक्त्या प्रथमाङ्केऽस्य निषेधः ।

आरक्तेत्यादि आरक्तो ईषद्रक्तो संकुचन्तो अपाङ्गो नेत्रप्रान्तो यस्मिंस्तथा, उदग्रा उद्गता दंष्ट्रा यस्मिन्, किञ्च उरुपाटला अत्यर्थरक्तवर्णा दीर्घा विस्तृता जिह्वा रसना यस्मिंस्तत् एवम्भूतं वक्त्रं व्यादाय प्रसार्य, ग्रथिताङ्गुलीकौ संश्लिष्टकरशाखौ भुजौ बाहू, उच्चैरुन्नतं वलयितौ मण्डलाकारौ कुर्वन् इह सशब्दं जृम्भणमातनोति ॥ ८ ॥

अपि च—

जृम्भावसरे दारुणमाननबिम्बं सजिह्वमेतस्य ।
निपतितदीर्घकपाटं पातालद्वारमिव पश्यामि ॥ ६ ॥

जृम्भावसरेत्यादि—दीर्घश्चासौ कपाटः दीर्घकपाटः निपतितः ॥ स यस्य तत् । शेषं स्पष्टम् ॥ ६ ॥

(प्रकाशम्) देवस्य कीदृशो मयि नियोगः ।

पाण्डुः—गलगण्ड, सेनापतीनाहूय मम निकटं प्रवेशय ।

(गलगण्डो निष्क्रम्य त्रयोदशप्रकारान्संनिपातान्प्रवेशयति । सर्वे प्रविश्य प्राञ्जलयस्तिष्ठन्ति)

तत्र एकः—सविचार इव दृश्यते युवराजः। तत्क्षणं जोषमास्यताम् (क) यदेषः—

खट्वामङ्गविवर्तनेन लुलितक्षौमास्तरामावसन्
वीटीं भृत्यकरार्पितामगमयन्वक्त्रं गृहीतामपि।
उत्तानस्तिमिते दृशावपि चिरादुच्चैर्विताने ऽर्पय-
न्नत्यर्थं श्वसितोद्गमैर्विवृणुते चिन्तां निजान्तर्गताम् ॥१०॥

(क) जोषमास्यताम्—तूष्णीमास्यताम् ॥

खट्वामङ्गेत्यादि—अङ्गविवर्तनेन इतस्ततः परावर्तनेन लुलितः क्षौम आस्तरः परिच्छदः यस्यास्तां खट्वां आवसन्, तथा भृत्यकरार्पितां गृहीतामपि, वीटीं ताम्बूलवीटिकां वक्त्रमगमयन्, एवमुत्तानस्तिमिते दृशौ उच्चैर्विताने चिरात् चिरकालम् अर्पयन्, अत्यर्थं श्वसितोद्गमैर्निजान्तर्गतां चिन्तां विवृणुते ॥ १० ॥

किंच पूर्वमपि—

न स्नाति वारिषु चिरं त्वरितं दुकूलं
वस्ते विलम्बसहनो न कदापि भुङ्क्ते।
भूषागणं वहति किंच विपर्ययेण
राजा युवैष हृदि कार्यविचारकृष्टः ॥ ११ ॥

न स्नाति वारिष्वित्यादि—स्पष्टम् ॥ ११ ॥

गलगण्डः—(दण्डेनभूमिमाघट्टयन्) देव, सेनापतयः प्राप्ताः।

पाण्डुः—(विलोक्य) भो भोः सन्निपाताः, प्रतिराजस्य जीवस्य सकाशादस्मदीयराजस्य यक्ष्मणोऽधुना पराभवः संभावयिष्यते, इति श्रूयते। स यथा न भवेत्तथा सैन्यैः सह संनद्धव्यं भवद्भिः।

(१) उपरि समास्तीर्णे पटमण्डपे दृष्टिं ददान इति भावः।

सन्निपातः—अस्मादृशेषु बलशालिषु सैनिकेषु
राजन्नलं प्रभुपराभवचिन्तया ते ।
स्यात्किं वसन्तदिवसेषु विसृत्वरेषु
पद्माकरस्य तुहिनाभिभवप्रसक्तिः ॥ १२ ॥

अस्मादृशेष्वित्यादि—प्रभोर्यदमणः पराभवो विपत्ततो निकारस्तस्य चिन्ता, तया अलम्, न कार्येति यावत्। अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः। तदेव भङ्गयन्तरेण दृढ़यति—विसृत्वरेषु प्रसरणशीलेषु यथोत्तरं वृद्धिमुपगच्छत्सु वसन्तदिवसेषु पद्माकरस्य तुहिनकृतो योऽभिभवस्तस्य प्रसक्तिः प्रसङ्गः किं स्यात्, अपि तु न। अयं भावः—शिशिरेऽवश्यायप्रपातेन सरोरुहाणि विशीर्यन्ते, वसन्ते पुनस्तान्येव विकासं भजन्ते तदानीं हिमस्यापगतत्वात् ॥ एवमेवास्मासु भवद्भिरवधेयमिति ॥ १२ ॥

कति कत्यस्मदीयाः सैनिकाः। तत्रैकैकस्य पराक्रमवतो युद्धाय न पर्याप्तमखिलं शत्रुसैन्यम्। किं पुनः सर्वेषाम्। श्रूयन्तां तावदस्मदीयाः।

अष्टौ कुष्ठा दश च बलिनः प्लीहगुल्मास्तथाष्टौ
षट्चोन्मादा, वसति दशकं पञ्चकं च व्रणानाम् ।
अर्शोभेदाः षडपिधृतयो विंशतिश्च प्रमेहाः
कृच्छ्राश्मर्यो दश पुनरहो सन्ति सप्तातिसाराः ॥ १३ ॥

अष्टौ कुष्ठा इत्यादि—दोषजन्यास्त्रयः प्लीहानः पञ्चगुल्मा इति मिलित्वा अष्टौ भवन्ति। अपगता धृतिर्येभ्यस्तेऽर्शोभेदाः षट्। प्रमेहाः विंशतिः। व्रणानां दशकं पञ्चकं च वसति, पञ्चदश व्रणा इत्यर्थः। पृथक् त्रीणि, सन्निपातजमेकं, विड्विघातजमन्यदपरं शुक्रजमिति षट् कृच्छ्राणि, चतस्रोऽश्मर्यः इति मिलित्वा दश। अत्राघातजन्यस्य कृच्छ्रस्य

(१) "किच्छ्राश्मर्यो दश दश पुनः" इति वा पाठः।

वातकृच्छ्रेऽश्मरीजन्यस्य चाश्मर्यां प्रवेशात् कृच्छ्रषट्कत्वमविरुद्धम् । सतातिसारास्तु रक्तजमतीसारं पृथक्कृत्योक्ताः ॥ १३ ॥

(गलगण्डं प्रति) स्वामिनः कुमारस्य संनिधिं प्रापय सर्वानपि सैनिकान् ।

गलगण्डः—तथा । (इति निष्क्रम्य सर्वैः सह प्रविशति)

(सर्वे पाण्डुं प्रणम्य साञ्जलयस्तिष्ठन्ति)

पाण्डुः—एवं प्रवृत्ते राजकार्ये किं भवन्तो मन्यन्ते ।

तत्रादौ कुष्ठाः—कार्या न चेतसि कुमार ! कदापि चिन्ता
स्थास्यन्ति के वद पुरः प्रतिगर्जतां नः ।
शत्रोः प्रविश्य पुरमीक्षितुमप्ययोग्यं
कुर्मो वयं तनुभृतामतिकुत्सनीयम् ॥ १४ ॥

कार्या न चेतसि कुमारेत्यादि—सुस्पष्टम् ॥ १४ ॥

उन्मादाः—सर्वे सैनिकास्तिष्ठन्तु । ज्ञायतामस्माकमभिप्रायः ।
कोपाध्मातककुत्स्थपुंगवकरव्याकृष्टगर्जद्धनु-
ज्यानिर्गत्वरमार्गणानलशिखादीने नदीने भृशम् ।
पाठीनान्कमठैः समं विलुठतः सर्वेऽनुकुर्वन्तु ते
शार्दूला इव शम्बरान् सरभसं यानद्य गृह्णीमहे ॥१५॥

कोपाध्मातेत्यादि—वयमद्य यान् शार्दूलान् शम्बरानिव सरभसं गृह्णीमहे, ते कोपेन क्रुधा आध्मातः उद्दीपितो यः ककुत्स्थपुंगवो रामः, तस्य करेण व्याकृष्टं आरोपितं, अत एव गर्जद्यत् धनुः तस्य ज्यातो निर्गत्वराः निर्गमनशीलाः ये मार्गणा बाणास्तेषां या अनलशिखा अग्निज्वाला तया दीने दुःखिते नदीने समुद्रे, कमठैः कच्छपैस्समं भृशमत्यर्थं विलुठतः परिवर्तमानान् पाठीनान् मत्स्यविशेषान् अनुकुर्वन्तु[1] ॥ १५ ॥

---

(१) अस्माभिराक्रान्ता (जीवाश्रयदेहावयवाः) प्रकुपितराघवबाणाग्निज्वालाव्याकुलाम्बुधौ सदुःखं विलुठन्तः पाठीना इव विषीदन्तीति भावः ।

व्रणाः—स्वामिन्कुमार ! प्रथमं पुरमेव बाधितव्यम् । तद्बाधया शिथिलीभविष्यत्यन्तर्मुखतापि जीवस्य । अत इदानीम् ।

प्रचण्डमदपाण्डवप्रहितकाण्डवर्गत्रुट—
त्तरत्तुकरिकेसरिप्रियकशल्यशार्दूलकम् ।
अरण्यमिव खाण्डवं घनसरण्यतीतद्रुम—
व्रजं दहनहेतयः पुरमरेर्दहामो वयम् ॥ १६ ॥

प्रचण्डमदपाण्डवेति—प्रचण्डमदो मदमत्तो यः पाण्डवोऽर्जुनस्तेन प्रहितो यः काण्डवर्गः बाणसमूहस्तेन त्रुट्यन्तो नश्यन्तस्तरत्तवो मृगविशेषाः, करिणो गजाः, केसरिणः सिंहाश्च, प्रियकाश्च शल्याश्च शार्दूलकाश्च ते यस्मिँस्तथा, घनसरणिमाकाशम् अतीता अतिक्रान्ताः द्रुमव्रजा, यस्मिँस्तदेवम्भूतम् खाण्डवमरण्यम्, दहनहेतय अग्न्यायुधा इव वयं अरेः शत्रोः पुरं (नगरं कायं चेति व्यज्यते) दहामः ॥१६॥

सर्वेऽपि अर्शोभेदाः—स्वामिन्, यदुक्तं व्रणैस्तदस्मभ्यमपि रोचते । तेन वयं च निरुद्धमूलद्वाराः ।

गृह्णीयाम व्यथयितुमरेस्तत्पुरं येन सर्वे
व्याघ्राक्रुष्टा इव हि पशवः प्राणिनोऽस्मद्गृहीताः ।
स्थातुं गन्तुं शयितुमशितुं यातुमाभाषितुं वा
नापेक्षन्ते मनसि दधतो दुःखमात्रानुभूतिम् ॥ १७ ॥

गृह्णीयामेत्यादि—स्पष्टम् ॥ प्रबलार्शोगृहीतानामीदृश्येवदशा भवतीतिवेद्यं वैद्यैः ॥ १७ ॥

प्रमेहाः—स्वामिन् ! अस्मासु विधेयेषु पुरोवर्तिषु किमर्थमन्येषां प्रस्तुतकार्यं प्रति प्रेषणम् । तत्क्रियतामस्मदुक्तिश्रवणादरः ।

पाण्डुः—वक्तव्यानि वो विवक्षितानि ।

प्रमेहाः—संप्रस्रावात्परिणतिमसृङ्मांसमेदोऽस्थिमज्ज्ञां ।
व्यातन्वन्तो वयमनुदिनं तत्पुरं शोषयामः ।
क्वान्तर्वक्त्रो भवतु विधुरीभूय जीवः, क्व मन्त्री
तत्साहाय्यं कलयतु भवांस्तद्विषादं जहातु ॥१८॥

संप्रस्रावादित्यादि—असृङ्मांसमेदोऽस्थिमज्ज्ञां संप्रस्रावात् मूत्रमार्गेण प्रस्रावणात् अनुदिनं परिणतिं परिणामम्[1] व्यातन्वन्तो वयम् तस्य पुरम् शोषयामः नीरसं विदध्मः । एवं सति जीवो विधुरीभूय खिन्नो भूत्वा क्व कस्मिन् प्रदेशे अन्तर्वक्त्रो भवतु अन्तर्वृत्तिःस्यात् । क्व च मन्त्री विज्ञानशर्मा तत्साहाय्यं कलयतु संपादयेत्, तत्तस्मात् भवान् विषादं जहातु ॥ १८ ॥

अश्मर्यः—सर्वे सैनिकाः स्वस्वबलानुरूपं गर्जन्ति ।
स्वामिन् ! न वयं गर्जनपराः । किं तु भूतार्थवादिन्यः (क)
वर्धिष्यते न यावत्सहितः सर्वैर्निजैर्भटैर्वैरी ।
तावन्निग्रहणीयः श्रेयस्कामेन पुरुषेण ॥ १९ ॥

(क) भूतार्थवादिन्यः, युक्तार्थकथनशालिन्य इति यावत् ।

वर्धिष्यते नेत्यादि—स्पष्टम् ॥ १९ ॥

तथाहि—

वेलालङ्घिप्रसर्पत्तटविटपिसमुत्पाटनाटोपमूर्च्छ-
त्कल्लोलाक्रान्तपृथ्वीवलयजनलयोल्लेखसंत्रस्तलेखः ।
अम्भोधिर्मा जनीति प्रतिकलमुदयद्वारि भूरीभविष्य-
न्चूषत्यह्नाय वह्निर्विघाटितवडवावक्त्ररन्ध्रादुदञ्चन् ॥२०॥

वेलालङ्घिप्रसर्पत्तटविपीत्यादि—प्रतिकलम् प्रतिक्षणम् उदयद्भिः 'अयतेर्भौवादिकस्य शतरिरूपमिदम् । निर्गच्छद्भिः वारिभिर्जलैः भूरी

---

(१) अन्तं विनाशमिति वा कुर्वन्तः, इति भावः ।

भविष्यन् वार्धिष्यमाणः अम्भोधिस्सागरः वेलाम् लङ्घति व्याप्नोति वेलालङ्घी ताच्छील्येणिनिः । अतएव प्रसर्पन्[1] तटविटपिनां कूलवृक्षाणां समुत्पाटनेन उन्मूलनेन यः आटोपः संरम्भः तेन मूर्छन्तः प्रवृद्धाः ये कल्लोलास्तरङ्गास्तैः आक्रान्तम् यत् पृथ्वीवलयं भूमण्डलं तत्र यो जनलयः लोकसंहारः तस्योल्लेखेन अंकनेन संत्रस्ताः भयं प्रापिताः लेखाः देवाः । अन्तर्भावितण्यर्थोऽयम् । येन स चासौ एवम्भूतो मा जनि मा भूत् माङि लुङ्, न माङ्योगे इत्यडागमप्रतिषेधः । इति हेतोर्विघटितम् । स्फारितं यद्वडवावक्त्रं तदेवरन्ध्रं छिद्रं तस्मादुदञ्चन् उद्गच्छन् वह्निः अह्नाय झटिति चूषति आचामति ॥ २० ॥

पाण्डुः—युक्तमुक्तं भवद्भिः ।

अतीसाराः—स्वामिनः कृपयैव भुजप्रतापं दर्शयन्तो वयं विजेष्यामह इति किमत्र चित्रम् । अतः किमपि ब्रूमः । विदांकरोतु स्वामी ।

नेत्रे मज्जयितुं, मुखं ग्लपयितुं, जत्रुद्वयं व्याञ्जितुं
पार्श्वास्थ्नां गणनीयतां गमयितुं, सत्त्वं भृशं लुण्ठितुम् ।
सप्तत्वेऽपि निजे स्थिते घटयितुं पञ्चत्वमेवाङ्गिनां
शङ्कान्नः प्रहिणोषि यत्र तरसा तत्साधयामो वयम् ॥ २१ ॥

नेत्रे मज्जयितुमित्यादि—विशदम् । अस्माकं सप्तत्वेऽपि अङ्गिनां पञ्चत्वं (मरणम्) घटयितुं वयं शक्ताः, इत्यर्थः ॥ २१ ॥

पाण्डुः—((सबहुमानम्)

अतिसारा इति स्पष्टं विष्टपत्रयविश्रुतम् ।
युष्मन्नामैव युष्माकं ब्रूतेऽतिशयितं बलम् ॥ २२ ॥

---

(१) इदं विशेषणं समुद्राटोपस्येति समवधेयम् ।

अतिसारा इति—अति अत्यर्थं सारो बलं[1] येषां, ते इति युष्माकं नामैव युष्मद्बलं ब्रूते। वस्तुतस्तु अतिसरतीति अतिसारः इति कर्तरि घञ् विष्टपत्रयविश्रुतम् लोकत्रये प्रसिद्धम् इति, शेषं स्पष्टम् ॥२२॥

गुल्मप्लीहानः—श्रूयतां स्वामिना।

अस्मासु प्रविशत्सु शात्रवपुरं पीड़ाकरेषु द्रुतं
कार्याकार्यविवेक एव न भवेदल्पोऽपि तस्मिन्क्षणे।
आस्तामेतदिदं वचो निशमय क्षन्तुं व्यथामक्षमो
विज्ञानेन च मंत्रिणा सह पुराज्जीवः पलायिष्यते ॥२३॥

अस्मासु प्रविशत्सुशात्रवपुरमित्यादि—स्पष्टम् ॥ २३ ॥

पाण्डुः—अस्मत्सैनिकोपरुद्धे पुरे पिपीलिकापि न प्रसरीसरीति, कुतः पुनरियं तस्य पलायनशङ्का। परन्तु सर्वैरिदमाकर्णनीयम्। नीतिशास्त्रानुसारिणि मन्त्रिणि तदनुरक्ते विक्रमाभिमानरक्षणैकपरे द्विजदेवपोषणैकतानमानसे राजनि तस्मिन्निपुणं किमपि प्रतिविधानमनुसंधेयम्। अतः प्रागेवातर्कयं किंचिदत्याहितहेतुस्तदीयान्तर्मुखतेति। (क)

(क) तदीयान्तर्मुखता जीवस्यान्तर्वृत्तिता समाहितचित्ततेति यावत्, सा किंचिदत्याहितस्याश्रेयसो हेतुः ॥

कुष्ठेष्वेकः—(स्वगतम्) प्रागस्माभिः प्रेषितः शत्रुशिबिरं प्रविष्टः कर्णमूलोऽद्यापि नागतः किं तैर्गृहीतः स्यात् ?।

(ततः प्रविशत्यध्वश्रान्तः कर्णमूलः)

कर्णमूलः—(दृष्ट्वा) एतत्खलु।

---

(१) सारो बले स्थिरांशे चेति विश्वः।

तत्तत्कार्यनिवेदनार्थमिलितान्योन्यानभिज्ञस्पश–
प्राप्तव्यावसरप्रतीक्षणकृतद्वाःपार्श्ववेद्यासिकम् ।
अन्तर्मन्दिरनिःसरज्जनवचोविज्ञाप्यमानप्रभु
व्यापारश्रवणेप्सुबाह्यमनुजं पश्यामि पाण्डोर्गृहम् ॥२४॥

तत्तत्कार्येत्यादि—अहह पाण्डोर्गृहमेवम्भूतं पश्यामि तदेव दर्शयति । तत्तत्कार्याणां निवेदनार्थं विज्ञापनार्थं मिलिता ये अन्योन्यानभिज्ञाः स्पशाश्चारास्तैः प्राप्तव्यस्यावसरस्य प्रतीक्षणे कृता द्वाःपार्श्ववेद्यां अलिन्दसीम्नि आसिका उपवेशनं यस्य[1] तत्तथा, अन्तर्मन्दिरात् गृहान्तरात् निःसरन्तो ये जनास्तेषां वचोभिर्विज्ञाप्यमानः निवेद्यमानो यः प्रभुव्यापारः तस्य श्रवणे ईप्सवो अभिलाषुका बाह्यमनुजा यत्र तत्[2] इति ॥ २४ ॥

(द्वाःस्थं प्रति) गलगण्ड ! कथय कर्णमूलं संप्राप्तं माम् ।
(गलगण्डः प्रविश्य निष्क्रम्य कर्णमूलेन सहान्तः प्रविशति)

कर्णमूलः–(आत्मानं दृष्ट्वा स्वगतम्)

श्रमाम्भः संसिक्तालिक(ल)लुलितपुण्ड्राङ्कवदनो
द्रवद्वर्मोपानद्दृढपिहितपाचञ्चलपटः ।
समुद्यन्निश्वासप्रसरपरिशुष्काधरपुटो
विलङ्घ्याहं दीर्घां सरणिमगमं पाण्डुसविधम् ॥२५॥

(द्रवच्चर्मोपानद्दृढापिहितपाचञ्चलपटः)

श्रमाम्भः संसिक्तालिकेत्यादि—श्रमाम्भोभिः स्वेदोदबिन्दुभिः संसिक्तमलिकं ललाटं यस्मिन् अत एव लुलितं पुण्ड्राङ्कं यस्मादेवम्भूतं

---

(१) स्वस्वकर्तव्यनिवेदनाय राजदर्शनावसरवाञ्छया, यत्रालिन्देषु दूता निषीदन्तीति भावः ।

(२) अन्तरतो निर्यातसेवकमुखाद्राजव्यापारं श्रोतुकामाश्चयत्र बाह्यपुरुषाः इति तात्पर्यम् ।

षदनं यस्यासौ तथा द्रवत् स्वेदार्द्रं, वर्म कञ्चुकं यस्य तथा, समुद्यता निःश्वासप्रसरेण श्रमश्वासवेगेन परिशुष्कोऽधरपुटो यस्य स एवं विधोऽहं, दीर्घां सरणिं मार्गं विलङ्घ्य पाण्डुसविधमगमम् । शेषं सुगमम् ॥ २५ ॥

(पाण्डुं दृष्ट्वा) कुमार, विजयी भव ।

पाण्डुः—भद्र, किम् ? किंचिदुपलब्धं तत्र भवता प्रविष्टेन ।

कर्णमूलः—किं सफलो न भविष्यति कुमारनियोगो विशेषोपलम्भेन ?

पाण्डुः—कथय ।

कर्णमूलः—श्रूयताम् । उपरुद्धमस्मत्सैनिकैः पुरम् ।

पाण्डुः—किमेतत्परिज्ञानाय प्रेषितोऽसि ? विदितं खल्विदं सर्वेषाम् ।

कर्णमूलः—(सर्वतो विलोक्य) एतदेव प्रस्तोतुमयमवसरः ।

पाण्डुः—विस्रब्धं कथय । किं न जानासि अस्मच्छरीराण्येव किलैते ।

कर्णमूलः—देव ! भवदाज्ञया प्रविष्टोऽस्मि पुण्डरीकपुरम् । तत्राद्राक्षं च सन्निरीक्षणैकपरे ईक्षणे । निगमार्थश्रवणप्रसिते च श्रवसी । शिवनिर्माल्यगन्धसन्तर्पितं घ्राणम् । विघसामृतास्वादनैकतानां रसनाम् । त्रेताभस्मावगुण्ठितां त्वचम् । धर्मार्थसंग्रहीतारौ करौ । तदर्थं कृतसंचरणौ चरणौ । चिरन्तनसरस्वतीचिकुर-

(१) विघसो नाम यज्ञशिष्टमन्नं तदेवामृतं तस्यास्वादने एकतानां तत्पराम् ॥

(२) सरो नाम वाग्विलासः सोऽस्यास्तीति सरस्वान्ब्रह्मा, तस्य शक्तिः सरस्वती चिरन्तना चासौ सा, तस्याश्चिकुराणां केशानां यो परिमलस्तस्य आमोदस्य सदनं स्थानमिति ॥

परिमलामोदसदनं वदनं च । तद्दर्शनेन क्वचिदपि स्थलमलभमानः स्थातुमपि नाशक्नुवम्, किंपुनर्देवस्याज्ञां परिपालयितुम् ।

कुष्ठः–(विहस्य) अनासारवर्षणमजागलस्तनसमवस्थं तव गमनागमनं च ।

सन्निपातः–कुष्ठ ! सावशेषमिव तव वचनम् ।

कुष्ठः–स्वामिपोषितस्वकलेवरनिरर्थकता च ।

कर्णमूलः–जाग्रति मच्छिरसि महाराजपादपङ्कजरेणौ कथमेतद्भविष्यति ।

पाण्डुः–ततस्ततः ।

कर्णमूलः–ततश्च–

तस्मिन्पुरे स्थानमहं विवेक्तुं, चरन्समन्तात्क्वचिदप्यपश्यम् ।

त्रिष्वाशयेषु स्थितिमत्स्वशङ्कं संचारितं केन च पङ्गुयुग्मम् ॥२६॥

अनासारेत्यादि—अविद्यमानः आसारः अवसारो यस्यासौ अनासारः, तत्र वर्षणं वृष्टिः । अजायाः गले यः स्तनः इति अजागलस्तनस्तेनसमं समानं अवस्थीयत इति अजागलस्तनसमवस्थम्,॥ व्यर्थमेव तव गतमागतं च जातमिति भावः ।

तस्मिन्पुरेत्यादि—त्रिष्वाशयेषु—आमपित्तपक्वाभिधेषु, शेषं स्पष्टम् ॥ २६ ॥

पाण्डुः–(स्वगतम्) वायुसंचार्यमाणं कफपित्तयोर्युगं तद्भवेत् । (प्रकाशम्) ततस्ततः ।

कर्णमूलः–तस्मादन्तःपुरचारिणः पङ्गुयुग्मात्तत्संचारयतः पुरुषाच्च प्रवृत्तिरुपलब्धुं शक्येति तत्र तं चोपासर्पमहम् । स च तत्र मयि दृष्टमात्रे—

भद्र गच्छ परिसर्पमाकुतो देशतस्त्वमसि नान्विहागतः ।

कस्य वा वद परिग्रहो भवानित्यपृच्छदथ सोऽपि तत्र माम् ॥२७॥

भद्र गच्छेत्यादि—स च चालयिता वातः तच्च चालितं पङ्गुयुग्मम् कफपित्ते इत्यर्थः । शेषं स्पष्टम् ॥ २७ ॥

भो भो भद्रमुखाः ! परिग्रहतया कस्यापि नाहं स्थितो
रात्रिं नेतुमिहागतोऽस्मि नियतं सायाह्नि भिक्षामटन् ।
स्थानं मे यदि शक्यते वसतये भ्रात(अपगतये भ्रान्तः)स्तदा दीयताम्
इत्युक्ते तु मया तदन्तरुदभूदन्योन्यमालोचना ॥ २८ ॥

भो भो भद्रमुखाः इत्यादि—भो भो भद्रमुखाः ! मान्याः ! नाहं कस्यापि परिग्रहतया संबन्धित्वेन स्थितः किन्तु सायाह्नि भिक्षामटन्निह रात्रिं नेतुं यापयितुमागतोऽस्मि, नियतं सत्यमेतत्, शेषं सुगमम् ॥२८॥

अनन्तरं च कार्यान्तरव्यापृते च राजनि नूतनपुरुषपरिमार्गणपरे च नागरिके, भिक्षो ! रात्रौ नावसरस्त्वादृशामत्र शयितुमित्युक्तवत्सु तेषु, क कार्ये राजाव्याप्रियते कुत एवं भिक्षुकाणामप्युपरोध इति पृष्टवानस्मि ।

पाण्डुः—ततस्ततः ।

कर्णमूलः—तेऽपि मां भद्रेत्यामन्त्र्य समकथयन् ।

पुण्डरीकपुरे मन्त्रिप्रेरितः परमेश्वरम् ।
आराद्धुं गतवान् राजा मनोद्वारेण तिष्ठति ॥२९॥

पुण्डरीकपुरेत्यादि—सुगमम् ॥ २९ ॥

किं च—

शत्रुनिरुद्धे च पुरे परिसर्पाशङ्कया नगरगुप्त्यै ।
नागरिकशिक्षणमिति प्रावोचन्मां तदानीं ते ॥३०॥

शत्रुनिरुद्धे चेत्यादि—परिसर्पो नाम शत्रुसम्बन्धिगुप्तचरप्रवेशस्तस्य शंका तया । शेषं सुगमम् ॥ ३० ॥

अत्रान्तरे विजृम्भमाणं यामिककलकलमशृणवम्। श्रुत्वा च कथंचिल्लब्धावकाशः स्वामिकार्यगौरवादागतोऽस्मि।

पाण्डुः–(आकाशे लक्ष्यं बद्ध्वा सोपहासम्) रे रे मन्त्रिहतक! अस्मज्जयार्थं सहजवैरिणं रसं साधयितुं किल तव प्रयत्नः। तर्हि पश्य।

साधितोऽपि स किं कुर्याद्रसः पथ्यक्रमं विना।
जिह्वाचापलमुद्भाव्य स एव ध्वंसयिष्यते ॥ ३१ ॥

साधितोऽपि स किमित्यादि—स्पष्टम् ॥ ३१ ॥

किं च, भक्त्या तद्धटयित्वा चतुरोऽपि पुमर्थांस्तस्य साधयितुं किलायमपरो यत्नस्तत्रापि प्रतिविधास्यते ॥

कर्णमूलः—(सप्रश्रयम्) देव! युगविगमसमय(क) समसमुदित(ख)मार्तण्डमण्डलस्येवाखण्डितप्रतापस्य तवापि कियान् स रसशोषणे (सरसः शोषणः इव तस्य तव किं) महिमातिशयः। तथा हि—

दृष्ट्वा वैरिचमूसमूहमवशादुद्वेलमुज्जृम्भित
क्रोधात्संगररंगसीमानि भवत्यद्धा निबद्धादरे।
जीवः क्व (कः) क्व च तस्य मन्त्रिहतको विज्ञानशर्मा पुन-
र्दृश्येरन्क तृणाग्नितुल्यमहसस्तस्याल्पसारा रसाः ॥ ३२ ॥

(क) युगविगमसमयः प्रलयकालः।

(ख) रसः पारदः सलिलञ्च तस्य शोषणे पराभवे आकर्षणे चेति, शेषं सुगमम्।

दृष्ट्वा वैरिचमूसमूहेत्यादि—अवशात् हठात् उद्वेलं उच्छृङ्खलं वैरिचमूसमूहं दृष्ट्वा उज्जृम्भितक्रोधात् समृद्धक्रुधा संगरो युद्धं स एव रंगसीमा नाट्यभूमिस्तस्मिन्विषये भवति त्वयि अद्धा वस्तुतो

निबद्धादरे दत्तावधाने सति जीवः क्व, किं च तस्य जीवस्य मन्त्रि-हतकोऽमात्यापसदो विज्ञानशर्मा क्व, शस्त्रपाणौ भवत्येव भवत्युभावेतौ पलायेतामित्यर्थः। तथा तृणाग्नितुल्यमहसोऽल्पसाराः रसाश्च क्व दृश्येरन्। राज्ञि राजमन्त्रिणि च पलायिते का कथा सैनिकानामिति भावः॥ ३२॥

पाण्डुः—आः, अस्त्वेतत्। भद्र, कथय कीदृशी प्रकृतीनां प्रवृत्तिः।

के स्वामिनि दृढभक्ताः के प्रबलाः के च दुर्बला नगरे।
अरिमित्रोदासीनाः के पुनरङ्ग! त्वया दृष्टाः॥३३॥

के स्वामिनीत्यादि—स्पष्टम्॥ ३३॥

कर्णमूलः—कथयामि देव! श्रूयताम्।

तत्र प्रकृतयस्तिस्रो वातपित्तकफात्मकाः।
तत्र यः प्रबलो वातः स तु स्नेहैर्वशीकृतः॥ ३४॥

तत्र प्रकृतयः इति—स्नेहैस्तैलादिभिः सौहार्दैश्च वशीकृतः आनुकूल्यं नीतः, शेषं सुगमम्॥ ३४॥

किं च—

तदनुगतं यत्पित्तं मधुरमयैस्तद्विजेयमुपचारैः।
पङ्गुर्यस्तत्र कफस्तीक्ष्णोपायैर्वशं स चानीतः॥३५॥

तदनुगतमित्यादि—स्पष्टम्॥ ३५॥

पाण्डुः—अथ कीदृशो मनसो वृत्तान्तः।

कर्णमूलः—

उद्दामबुद्धिविभवेन मनस्तु तत्र
विज्ञानशर्मसचिवेन वशीकृतं सत्।
कार्ये महत्यधिकृतं हितकारि राज्ञः
सर्वात्मनाऽप्यनुसरत्यधुना तमेव॥ ३६॥

उद्दामेत्यादि—तत्र मनस्तु उद्दामबुद्धिविभवेन उत्कृष्टप्रज्ञाशालिना विज्ञानशर्मसचिवेन वशीकृतं, तथा महति कार्येऽधिकृतमेवञ्च राज्ञो जीवस्य हितकारि सत् अधुना तमेव राजानं सर्वात्मनाऽनुसरति अनुगृह्णाति ॥ ३६ ॥

पाण्डुः—अथ विज्ञानशर्मस्पर्धिनो ज्ञानशर्ममन्त्रिणः कीदृशः प्रकारः ?

कर्णमूलः—

विज्ञानमन्त्रिमन्त्रैर्विविधैरसकृद्विधूतनिजशक्तिः ।
स ज्ञानशर्ममन्त्री तिष्ठति केवलमसौ स्वरूपेण ॥ ३७॥

विज्ञानेत्यादि—असौ केवलं स्वरूपेण तिष्ठति—केवलं मन्त्रिपदमेवालङ्करोति न किञ्चिदात्मनो मन्त्रशक्त्या कर्तुं पारयतीति भावः। शेषं सुगमम् ॥ ३७ ॥

एवं विधविविधविचित्रचरित्रविस्मापितसकललोकस्य स्वामिहितकरणैकतानस्य मन्त्रिणः पारे खलु वाङ्मनसोश्चरिताद्भुतानि । तथा हि—

तत्तद्दुर्घटराजकार्यघटनाव्यापारपारीणया
शक्त्या दुष्प्रसहस्य तस्य वचनैर्नानोपपत्त्यन्वितैः ।
निर्द्वन्द्वोपि स निर्गुणोऽपि च निराकारोऽपि निर्लेपनो-
ऽप्याः कष्टं, प्रतिपक्षतामुपगतो जीवो विचेष्टेत नः ॥३८॥

तत्तद्दुर्घटेत्यादि—तेषां तेषां दुर्घटराजकार्याणां या घटना व्यवस्था तत्र यो व्यापारः साधनानां विनियोगस्तत्र पारीणया पारङ्गतया शक्त्या प्रभावोत्साहमंत्ररूपया हेतुभूतया, दुष्प्रसहस्यासह्यस्य तस्य विज्ञानशर्मणो नानोपपत्तिभिर्बहुविधयुक्तिभिरन्वितैर्वचनैर्निर्द्वन्द्वोऽपि सुखदुःखरहितोपि निर्गुणोऽपि सत्त्वादिविरहितोऽपि निराकारोऽपि निरवयवोऽपि निर्लेपनोऽपि निर्वासनोऽपि, जीवो नोऽस्माकं प्रतिपक्षतां विरोधितामुपगतो विचेष्टेत इति कष्टम् ॥ ३८ ॥

तस्मादेवं स्थिते प्रकृतिमण्डले दुर्भेद्ये च शत्रुपक्षे महदत्याहितमापतिष्यति । (इति भयं नाटयति)

पाण्डुः—(विचिन्त्य) मा बिभीहि । तत्रापि काचिदस्त्यबाधिता नीतिः ।

कर्णमूलः—कीदृशी ?

पाण्डुः—श्रूयताम् ।

यच्चञ्चलं प्रकृत्या विषयेषु मनो निसर्गदुर्दान्तम् ।
तत्कामादिभिरेतैर्भेदयितुं शक्यते शनकैः ॥ ३९ ॥

यच्चञ्चलमित्यादि—निसर्गदुर्दान्तमिति स्वभावत एवाऽसुकरवशीकारमिति, शेषं सुगमम् ॥ ३९ ॥

तस्मिन्त्सर्वविषयाधिष्ठाने मनसि स्वाधीने सुकर एव कार्यशेषः । किं च याः किलाद्यास्तत्र तिस्रः प्रकृतयस्तासु यस्तीक्ष्णोपायैः संयमितवृद्धिः श्लेष्मा, तस्योपचयं केनाप्युपायेन विधाय तेनैव तावपि क्षोभयितुं शक्येते ।

विज्ञानोऽयं यद्यपि स्वामिभक्तस्तत्राप्यस्यासंनिधाने विविक्ते ।
भेदो राज्ञस्तस्य तैस्तैरुपायैः शक्यः कर्तुं ज्ञानशर्मोपजापैः ॥ ४० ॥

विज्ञानोऽयमित्यादि—अस्य विज्ञानशर्मणोऽसंनिधाने परोक्षे । विविक्ते विजने । विविक्तौ पूतविजनौ इत्यमरः । शेषं सुगमम् ॥ ४० ॥

एवं राजमन्त्रिणोर्विरोधेन विश्लिष्टे प्रकृतिमण्डलेऽचिरादेव हस्तगता महाराजस्य यक्ष्मणो जयलक्ष्मीः ।

कर्णमूलः—(सहर्षम्) साधु चिन्तिता मन्त्रिवर्येण राजतन्त्रनीतिः ।

पाण्डुः—भद्र ! नाद्यापि महाराजनिकटगतोऽत्रायाति कासः ।

(प्रविश्य)

गलगण्डः—देव ! महाराजपादमूलात्कासः प्राप्तः ।

पाण्डुः—त्वरितं प्रवेशय ।

(ततः प्रविशति गलगण्डेनानुगम्यमानः कासः)

(कासो जानुभ्यां प्रणम्य किंचिदुपसर्पति)

पाण्डुः—भद्र ! कीदृशो मयि राजनियोगः ?

कासः—(करपिहितमुखः । कर्णे) एवमेवम् ।

पाण्डुः—भद्र ! तदर्थमेवेयं बद्धपरिकरता । तिष्ठ त्वमत्रैव । राजानमिममुदन्तमन्यमुखेन प्रापयिष्ये ।

(नेपथ्ये यामप्रहारध्वनिः)

पाण्डुः—(श्रुत्वा सैनिकान्प्रति) तदहमिदानीं कार्यशेषं निर्वर्त्य प्रकृतकार्यार्थं संनह्यामि । भवन्तोऽपि तावत्—

बिभ्राणास्तान्युपमितमहाभोगिभिर्बाहुदण्डै-
　　र्येषां येषां दधति निजतां यानि यान्यायुधानि ।
स्वस्वस्थानेष्ववहितमनोवृत्तयस्त्यक्तशङ्काः
　　सर्वे तिष्ठन्त्वरिपुरमभिव्याप्य सैन्याः प्रवीराः ॥४१॥

बिभ्राणास्तान्युपमितेत्यादि—यानि यान्यायुधानि येषां येषां निजतां दधति येषु येषु स्वामित्वं स्वीकुर्वते तानि उपमिताः महाभोगिनो यैस्तैर्महोरगसहोदरैः, बाहुदण्डैर्बिभ्राणास्तथा स्वस्वस्थानेषु अवहितमनोवृत्तयः सावधानास्त्यक्तशङ्काश्च सर्वे सैन्याः प्रवीराः अरिपुरमभिव्याप्य तिष्ठन्तु शत्रुनगरमुपरुन्धन्तु ॥ ४१ ॥

(इति निष्क्रान्ताः सर्वे)

इति द्वितीयोऽङ्कः ।

इति श्रीजीवानन्दरसायने संक्षिप्तटिप्पणे द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः ।

(ततः प्रविशति पश्चाद्बद्धं पुरुषं किंकरेण विकर्षन् विचारो नागरिकः)

नागरिकः—अङ्ग ! गद, कस्त्वमसि ?

पुरुषः—(स्वगतम्) किमहं ज्ञातोऽस्म्यनेन गद इति ।

नागरिकः—किं विचारयासि ? यदि सत्यं गदोऽसि, ततो मोच्यसे ।

पुरुषः—(स्वगतम्) नाहमनेन ज्ञातः ।

बिभ्राणो मुखबाहुवक्षसि कृतं पुण्ड्रत्रयं भस्मना
हस्तोपात्तविशुद्धताम्रकलशो रुद्राक्षमाली गले ।
धृत्वा वैदिकवेषमाविशमिह स्वस्वामिना प्रेरितो
हृद्रोगोऽहमरेरवेक्षितुमना जीवस्य राज्ञः स्थितिम् ॥ १ ॥

बिभ्राणो मुखबाहुवक्षसिकृतमित्यादि—मुखञ्च बाहू च वक्षश्च एषां समाहारस्तस्मिन्, भस्मना भूत्या कृतं विहितं पुण्ड्रत्रयं तिलकं बिभ्राणः दधानः, हस्तेन करेण उपात्तः गृहीतः विशुद्धः निर्मलः ताम्रकलशः ताम्रघटः येन स तथोक्तः, गले कण्ठे रुद्राक्षमाली रुद्राक्षाणां माला अस्यास्तीति, एवं वैदिकवेषं धृत्वा सन्धार्य अहं स्वस्वामिना प्रेरितः सन् अरेः जीवस्य राज्ञः स्थितिमवेक्षितुमना अहं हृद्रोग इह आविशम् ॥ १ ॥

अनन्तरमनेन नागरिकेण संयमितः । भवतु । एवं ब्रवीमि । (प्रकाशम्) आर्य, मुञ्च माम् । विप्रश्निकतामुपजीव्येदं जठरहतकं पुष्णामि ।

---

(१) विप्रश्निकता नाम दैवज्ञत्वं-भाविफलवक्तृतामाजीविकां कृत्वेति भावः । जठरहतकं दुग्धोदरम् ।

नागरिकः—अस्त्वेतत् । कुतो रात्रिसंचारः ।

पुरुषः—यस्य कस्यचिद्यत्किंचिद्भावि फलमुक्त्वा पारितोषिकं गृह्णामीति ।

नागरिकः—किं दिवसस्ते तत्कर्मणो न पर्याप्तः ?

पुरुषः—बाढम् । श्रूयताम् ।

यामो यात्यविलम्बितं दिनमुखे स्नानादिभिः कर्मभिः
पश्चाद्भिक्षितुमारभे प्रतिदिनं धान्यानि वा तण्डुलान् ।
तैरन्नाद्युपपाद्य धूर्जटिमुखान्देवान्निवेद्यातिथी—
न्संतर्प्याशनत एव याति दिवसः शेषः कुतः संचरः ॥२॥

यामो यात्यविलम्बितमित्यादि—दिनमुखे स्नानादिभिः कर्मभिर्यामः अविलम्बितं यथा स्यात्तथा याति, पश्चात् धान्यानि तण्डुलान् वा भिक्षितुमारभे, तैः अन्नाद्युपपाद्य धूर्जटिमुखान् शिवप्रभृतीन् देवान्निवेद्य, अतिथींश्च सन्तर्प्य अशनतः खादत एव मे शेषः अवशिष्टः दिवसः याति, संचरः कुतः ? स्यात् ॥ २ ॥

किंकरः—अयेः, युक्तमिदम् । इह तु यामादूर्ध्वं रुध्यते नगरसंचारः ।

पुरुषः—यदीदानीं यामादूर्ध्वं कालस्तर्हि न संचरामि स्वप्स्यामि ।

किंकरः—कुत्र निद्रास्थानम् ।

पुरुषः—धर्मशालायाम् ।

नागरिकः—किमिदं राजमन्दिरं तव धर्मशाला ? अत्र हि—

नोंकारः पवते न गीतिरटति स्वाहेति न श्रूयते
न न्यायव्यवहारतारवचसः संघीभवन्ति द्विजाः ।
नात्युच्चैः पृषदाज्यहोमसुरभिर्धूम्या जरीजृम्भते
भक्ताः पञ्चजनाः स्वपन्ति परितो न स्त्री कुमारो न च ॥३॥

नोङ्कारः पवते न गीतिरटतीत्यादि—ओंकारः प्रणवोच्चारणं न पवते न पुनाति, न वा गीतिः सामगानमटति, न वा स्वाहा इति ध्वनिः, श्रूयते। न वा न्यायव्यवहारे धर्मोपदेशे ताराणि शुद्धानि वचांसि येषां ते एवम्भूताः द्विजाः न संघीभवन्ति। न चात्युच्चैर्धूम्या धूमसंहतिः जरीजृम्भते प्रकाशते किंभूता? पृषदाज्यहोमसुरभिः पृषद्भिः दधिविन्दुभिः सहितमाज्यं दधिमिश्रितघृतमित्यमरः किञ्च "तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्" इति ऋग्वेदमन्त्रभाष्ये "पृषदाज्यं दधिमिश्रमाज्यं" इति सायणाचार्यः तस्य होमः तेन सुरभिः न च भक्ताः पञ्चजनाः पञ्चभिर्भूतैर्जन्यतेऽसौ पञ्चजनाः पञ्च + जन् + कर्मणि घञ्। (जनिवध्योश्च) ७।३।३५। इति न वृद्धिः। "पञ्चजनः पुरुषः। इत्यमरः"। यद्वा "गन्धर्वाः पितरो देवा असुरा रक्षांसि पञ्चजनपदवाच्यानि भवन्ति" इति चिन्तामणिः। परितः स्वपन्ति न च स्त्री न वा कुमार इति॥३॥

पुरुषः—अस्त्विदं राजमन्दिरं तथापि सुप्रवेशमस्माद्दशामिति श्रुतमस्ति।

नागरिकः—सुप्रवेशमिति कस्मात्त्वया श्रुतम्?

पुरुषः—आर्यमिश्रेभ्य एव।

नागरिकः—हन्त, किमस्माभिरिदं कथितम्।

पुरुषः—नहि नहि। अन्यजनैः।

नागरिकः—कैस्ते कथितम्। यदिदं परिचितजनस्यापिराजशासनमन्तरेण दुष्प्रवेशम्, किं पुनरपरिचितस्य ते।

किंकरः—विसंस्थुलेवास्य वचनव्यक्तिः गृहीत इव चोरस्तरलतारकविलोचनः पश्यन्नयं वक्तुं न शक्तः प्रत्युत्तरं ततश्चर इव लक्ष्यते।

नागरिकः—तर्हि शिक्षयतु भवानिमाम्।

---

(१) राजशासनमन्तरेण राजाज्ञां विना।

(२) विसंस्थुलेव—परस्परमसम्बद्धा इव, वचनव्यक्तिः वाक्यविन्यासः, तरलतारके विलोचने यस्य सः।

किंकरः—अरे, कथय तथ्यम् । मृषावादिनस्तव वैदिकता राजशासनस्य न प्रतिरोधिनी । (इति कशामुद्यच्छति)

पुरुषः—मा ताडय । तथ्यं वदामि ।

नागरिकः—यदि तथ्यं वदसि तदा विज्ञानमन्त्रिणं दर्शयित्वा संभावयिष्यामि ।

किंकरः—प्रतीहार्या धारणया सह प्रासादमधिरूढो मन्त्री । तत्संनिधौ त्वमपि नेष्यसे ।

पुरुषः—(स्वगतम्) तथा चेन्मम दुर्लभमेव जीवितम् (प्रकाशं भीतिमभिनीय) अभयं मे दीयतां, यदि तथ्यमेव श्रोतव्यम् । (इति प्रणमति)

नागरिकः—दत्ताभयोऽसि । कथयात्मानम् ।

पुरुषः—(उत्थाय प्राञ्जलिः) हृद्रोगोऽस्मि । विसृज मां दयया ।

नागरिकः—चर एवायं वैदिकवेषमवलम्ब्यागतो दत्ताभयश्च ।

किंकरः—तर्हि किं कर्तव्यम् ।

नागरिकः—'सर्वमिदं राजकार्यं त्वया कस्मैचिदपि न कथनीयम्' इति शपथं गृहीत्वा पुराद्बहिर्विसृज्यताम् । अथवा किमनेन वराकेण कथनीयम् । दत्ताभयोऽयमिति मन्त्रिणे निवेद्य कथंचिन्मोचयितव्यः ।

किंकरः—तथा करोमि । (इति निष्क्रान्तः)

(नेपथ्ये कुक्कुटध्वनिः)

नागरिकः—(आकर्ण्य) कथं रजनीविरामः ।

(पुनर्नेपथ्ये)

वैतालिकः—

पत्यावस्तं व्रजति विगलच्चञ्चरीकाञ्जनाश्रुं
त्रासान्मीलद्दलदृशमितो रागमर्कः क्रमेण ।
द्रागालिङ्गेदपि कुमुदिनीमित्यपन्यायशङ्की
कूकूशब्दं विसृजति जवात्कुक्कुटः पूर्वमेव ॥ ४ ॥

पत्यावस्तमित्यादि—पत्यौ चन्द्रेऽस्तं व्रजति गच्छति सति, विगलन्ति चञ्चरीका भ्रमरा एव अञ्जनाश्रूणि यस्याः सा तां, किं च त्रासात् परपुरुषस्पर्शभीत्या मीलन्त्यौ दलान्येव दृशौ यस्यास्तामेवंभूतां कुमुदिनीं कैरविणीं, क्रमेण रागं अरुणिमानमनुरागं च, इतः प्राप्तः अर्कः सूर्यः द्राक् झटिति आलिङ्गेदिति उत्क्रमेण अपन्यायं शङ्कमानः कुक्कुटः पूर्वमेव सूर्योद्गमनात् कालात् स्पर्शाच्च प्रागेव कूकूशब्दं विसृजति ॥ ४ ॥

द्वितीयो वैतालिकः—

रागं मुखेन दरदर्शिततारकेण
मां व्यञ्जतीमपि समेत्य करेण गाढम् ।
आलिङ्ग्यते कुमुदिनीति रुषापराद्रिं
यातां निशां द्रुतमनुव्रजतीव चन्द्रः ॥ ५ ॥

रागं मुखेनेत्यादि—दरदर्शितास्तारका यस्मिन्तेन ईषत्प्रकटितकनीनिकेन ईषद्दर्शितोडुगणेन च मुखेन, रागमनुरागं अरुणिमानञ्च व्यञ्जतीमपि प्रकटयन्तीमपि, मां निशां रात्रिं करेण हस्तेन किरणेन च समेत्य संगत्य कुमुदिनी कैरविणी गाढं आलिङ्ग्यते आश्लिष्यते चन्द्रेणेतिशेषः—इति रुषा क्रुधा अपराद्रिं अस्ताचलं यातां गतां निशां, चन्द्रोऽनुव्रजतीवेत्युत्प्रेक्षा ॥ ५ ॥

अपि च—

प्रातर्जातमिति द्रुतं प्रशिथिलं बद्ध्वा दुकूलं दृढं
धम्मिल्लं च्युतमाल्यमप्युपवनान्निर्गत्वरीरित्वरीः ।

आकृष्यांशुकपल्लवे कठिनयोरालिङ्ग्य वक्षोजयो-
राघ्रायाननपङ्कजे च कथमप्युज्झन्त्यहो कामिनः ॥ ६ ॥

प्रातर्जातामित्यादि—प्रातर्जातमिति हेतोः द्रुतं शीघ्रं प्रशिथिलमितस्ततो अपन्यस्तं दुकूलं वासः दृढं बद्ध्वा, किञ्च च्युतमाल्यं प्रभ्रष्टकुसुमं धम्मिल्लं केशपाशं दृढं बद्ध्वा, उपवनात् आरामात् स्वसेङ्केतस्थानात् निर्गत्वरीः निर्गन्तुमनसः ईत्वरीः अभिसारिका परनारी वा एति परपुरुषं प्राप्नोति इति । ई+क्वरप्+ङीष् । 'अभिसारिका' इति हेमचन्द्रः । अंशुकपल्लवे आकृष्य कठिनयोर्वक्षोजयोः कुचयोः आलिङ्ग्य आश्लिष्य आननपङ्कजे च आघ्राय कामिनः अहो कथमप्युज्झन्ति मुञ्चन्ति इति ॥ ६ ॥

नागरिकः—तदधुना राजकार्ये चावहितस्तिष्ठामि ।

(इति निष्क्रान्तः)

शुद्धविष्कम्भकः

(ततः प्रविशति प्रसादाधिरूढः प्रतीहार्या धारणया दर्शितमार्गो मन्त्री)

मन्त्रीः—संप्रति हि—

सोपानानि हिरण्मयानि परितः प्रत्युप्तरत्नान्यहं
पादाभ्यां समतीत्य किंकरगणालम्बी स्वयं पाणिना ।
भित्तिष्वालिखितैर्वृतं खगमृगस्त्रीपुंसवृक्षाचलै-
रारूढं निटिलाक्षशैलधवलं प्रासादमभ्रंलिहम् ॥ ७ ॥

सोपानानीत्यादि—पाणिना स्वयं किङ्करगणालम्बी अहं परितः समन्ततः प्रत्युप्तानि खचितानि रत्नानि येषु तानि हिरण्मयानि सुवर्ण-

(१) स च इह मध्यमपात्रैः प्रयोज्यत्वेन शुद्धो ज्ञेयः । तल्लक्षणं चोक्तं साहित्यदर्पणे— वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भ आदावंकस्य दर्शितः ॥ मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः । शुद्धः स्यात् स तु संकीर्णो नीचमध्यमकल्पितः ।

घटितानि सोपानानि आरोहणानि "आरोहणं स्यात्सोपानमित्यमरः" पादाभ्यां समतीत्य अतिक्रम्य भित्तिषु कुड्येष्वालिखितैरङ्कितैः खगाश्च मृगाश्च स्त्रीपुंसौ च (स्त्री च पुमांश्च इति विग्रहे "अचतुरेत्यादिना निपातनात्) वृत्ताश्चाऽचलाश्च तैर्वृतं संकुलं निटिले ललाटेऽक्षि यस्याऽसौ निटिलाक्षः शिवः, तस्य शैलः कैलासः, स इव धवलः शुभ्रस्तमभ्रं लेढि इति अभ्रंलिहस्तं नभश्चुम्बिनं प्रासादं भवनं "प्रासादो भूभुजां गृहमित्यमरः" आरुक्षमारूढवान् ॥ ७ ॥

(विचिन्त्य स्वगतम्) अहो दुरन्तता राजधर्माणाम् ।

आत्मानं परिरक्ष्य दुष्करतपोवृद्धद्विजाराधनै-
दानीयेषु च भक्तिपूर्वमसकृद्दानप्रदानैरपि ।
दण्डं दण्डयितव्यमात्रविषयं कृत्वा धरित्रीतले
राज्ञा धर्मपथे मतिं क्रमयता संरक्षितव्याः प्रजाः ॥८॥

आत्मानमित्यादि—दुष्करैर्दुःखेन क्रियमाणैस्तपोभिः वृद्धाः समृद्धाः ये द्विजास्तेषामाराधनैः प्रसादनैः किञ्च दानीयेषु दानपात्रेषु भक्तिपूर्वं सबहुमानमसकृत् बहुशो दानप्रदानैरपि आत्मानं परिरक्ष्य तथा दण्डयति दाम्यति वाऽपराधिनमनेन तम् दण्डं राज्ञां चतुर्थोपायं दण्डयितव्या अपराधिन एव विषयाः यस्य तमेवं विधङ्कृत्वा धरित्रीतले भूमण्डले धर्मपथे सुकृतमार्गे मतिं क्रमयता अवदधता राज्ञा प्रजाः प्रकृतयः संरक्षितव्याः रक्षणीयाः ॥ ८ ॥

किं बहुना—

स्वश्रेयसार्थं यततेऽनिशं यो राज्ञा किलानेन पृथग्विमर्शः ।
स्वस्मिन्नमात्येषु सुहृत्सु राष्ट्रे दुर्गेषु कोषेषु बलेषु कार्यः ॥९॥

स्वश्रेयसार्थमित्यादि—यः स्वस्यात्मनो (राज्ञ इत्यर्थः) श्रेयसार्थं हितायानिशं निरन्तरं यतते प्रयस्यति अनेन सह राज्ञा स्वस्मिन्नात्मनि विषये, अमात्येषु विषये, सुहृत्सु, राष्ट्रे, दुर्गेषु, कोषेषु, बलेषु, सैन्येषु विषये, पृथग्विमर्शो नाम विचारः कार्यः ॥ ९ ॥

निर्ज्ञातसर्वतन्त्रेषु विगूढामोघमन्त्रेषु मन्त्रिषु विन्यस्तसमस्तकार्यभरस्य तु राज्ञो निश्चिन्ततैव । परन्तु तेषां व्याकृष्यन्ते दुरन्तया चिन्तया हृदयानि ।

सामन्ता विनमेयुरित्युपचयः कोषस्य सिद्ध्येदिति
स्थानेषु द्विषतां स्थितीरपि चराः पश्येयुराप्ता इति ।
स्यादायोपगमो यथेति विभवैस्तुष्टाः प्रवीरा भटा
वर्तेरन्निति मा मलिम्लुचगणाद्भूरुद्विजेतेति च ॥ १० ॥

सामन्ता विनमेयुरित्युपचयः कोषस्येत्यादि—सामन्ताः मण्डलिनो नृपाः विनमेयुः नम्रास्स्युरिति दुरन्तया चिन्तया तेषां हृदयानि व्याकृष्यन्ते इति पूर्वेण गद्येन सम्बन्धः एवं सर्वत्रोत्तरोत्तरम् । तथा कोषस्य उपचयो वृद्धिः सिद्ध्येदिति । तथा आप्ताश्चराः दूताः द्विषतां शत्रूणां स्थानेषु स्थितीरपि पश्येयुः इति । किञ्च यथाऽऽयोपगमो लाभोदयस्स्यात् इति । तथा प्रवीरा भटा विभवैस्तुष्टाः वर्तेरन् स्युरिति । एवं मलिम्लुचगणात् भूमी उद्विजेत उद्विग्ना माभूदिति "मलिम्लुचोऽग्निश्चौरो वेति शब्दकल्पद्रुमः" ॥ १० ॥

अहमपि राज्ञा विन्यस्तसमस्तकार्यभारतया यत्सत्यं व्याकुल इव । तथा हि—

कार्येषूक्तेषु राज्ञा कतिचिदपि मया साधितान्येव पूर्वं
साधिष्यन्ते परस्तात्कतिचन कतिचिच्चापि साध्यन्त एव ।
किं चानुक्तेषु सद्यः किमपि किल कुशाग्रीययात्मीयबुद्ध्या
पर्यालोच्यैव तत्तत्समयसमुचितं कर्तुमुत्कण्ठितोऽस्मि ॥ ११ ॥

कार्येषूक्तेष्वित्यादि—राज्ञा उक्तेषु निर्दिष्टेषु कार्येषु मध्ये कतिचिन्मया पूर्वमेव साधितानि, कतिचन परस्तात्साधिष्यन्ते, अपि च कति-

---

(१) निःशेषं ज्ञातानि सर्वतन्त्राणि यैस्तेषु तथा, विगूढाः गुप्ताः अमोघा अव्यर्थाः मन्त्रा येषास्तेषु मन्त्रिषु विन्यस्तो निहितः समस्तकार्यभरो येन तस्य ।

त्विदिदानीं साध्यन्त एव । किंचानुक्तेऽपि कुशाग्रमिव कुशाग्रीया तया तीव्रयाऽऽत्मीयबुद्ध्या समयसमुचितं किमपि सद्यः पर्यालोच्यैव कर्तुमुत्कण्ठितोऽस्मि किल ॥ ११ ॥

अत एव सर्वत्र तत्र तत्र व्यापृते मया पुरगुप्त्यै मत्सदृश एव कोऽपि विनियुक्तो विचार(१)नामा नागरिकः । तत्प्रकृतकार्ये व्यापृतव्यम् । कः कोऽत्र भोः ।

(प्रविश्य)

दौवारिकः—विजयतां देवः ।

मन्त्री—भद्र, मद्वचनेनानुशासनीयाः पौरा नगरालंकाराय ।

आलिप्यन्तां सुधाभिः पुरसदनगता भित्तयो भृत्यवर्गैः,
रम्भास्तम्भाः क्रियन्तां कपिशफलभृतः पार्श्वयोर्द्वारभूमेः ।
बध्यन्तां तोरणानि श्रितनवमणिभिर्दामभिः सन्तु रथ्याः
संमृष्टाश्चाम्बुसिक्ताः प्रतिगृहमुपरि ग्रथ्यतां केतनाली ॥ १२ ॥

आलिप्यन्तामित्यादि—भृत्यवर्गैः पुरसदनगता भित्तयस्सुधाभिः आलिप्यन्तां सुधालेपैस्संस्क्रियन्तामित्यर्थः, तथा द्वारभूमेः पार्श्वयोः कपिशफलभृतः कपिशानि कृष्णपीतवर्णानि फलानि बिभ्रति ते रम्भास्स्तम्भाः कदलीस्तम्भाः क्रियन्तां बध्यन्तां, तथा श्रिताः नवा नूतना मणयो येषु तैर्दामभी रज्जुभिस्तोरणानि बध्यन्तां 'तोरणं नाम द्वाराग्रे निखातस्तम्भयोरुपरि निबद्धं नानावस्त्ररत्नादिमयं धनुराकारं यल्लक्ष्यते तदिति शब्दकल्पद्रुमः । तथा रथ्याः संमृष्टाः संमार्जिता अम्बुसिक्ताश्च उक्षिताश्च सन्तु, एवं प्रतिगृहमुपरि केतनाली पताका ग्रथ्यतामारोप्यताम् ॥ १२ ॥

---

(१) विचारो नाम विशेषेण चरणं पदार्थादिनिर्णये ज्ञानं 'तत्वनिर्णयः' इति व्यवहारतन्त्रम् । संदिग्धे वस्तुनि प्रमाणैस्तत्वपरीक्षेति गोपीचन्दः । प्रमाणैरर्थपरीक्षणमिति केचित् । विचारो युक्तवाक्यैर्यदप्रत्यक्षार्थसाधनमिति साहित्यदर्पणे ।

यतः संप्रत्येव सिद्धप्रतिज्ञो राजा समागमिष्यति ।

दौवारिकः–यदाज्ञापयत्यार्यः । (इति निष्क्रान्तः)

मन्त्रीः–(सदृष्टिक्षेपं परिवृत्त्यावलोक्य च) अहो रिपूणां पुं-रावस्कन्दनप्रकारः । तथा हि । पाण्डुना प्रेरिता रोगाः,

मूर्धानं व्याप्तुकामाः शतमथ नवतिर्लोचने चाधिचत्वाः
नासामष्टादशास्यं खलु चतुरधिका सप्ततिर्हृच्च पञ्च ।
वक्षोजौ पञ्चशूलैः सह समगणनैः कुक्षिमष्टौ च गुल्माः
स्वार्हस्थानान्युपेतं त्रिगुणगणनया पञ्चकं च व्रणानाम् ॥१३॥

मूर्धानमित्यादि—शतं रोगाः मूर्धानं शिरः व्याप्तुमाक्रान्तुं इच्छा येषान्ते तथा, किञ्च चत्वारोऽधिका यस्यां सा अधिचत्वा नवतिः चतुरधिकनवतिसंख्याका रोगा लोचने व्याप्तुकामा, एवं नासामष्टादश, चतुरधिका सप्ततिः चतुःसप्ततिसंख्याका रोगा आस्यं, पञ्च च रोगा हृत् हृदयं, पञ्च वक्षोजौ स्तनौ, तथा समगणनैरष्टभिः शूलैः सहाष्टौ गुल्माः (यद्यपि पृथग्दोषैः सन्निपातेन रक्तेन च पञ्च गुल्मा भवन्ति तथापि द्वन्द्वजानां त्रयाणां समावेशादष्टत्वं कल्पनीयम्) कुक्षिं व्याप्तुकामाः । किञ्च व्रणानां त्रिगुणगणनया पञ्चकं पञ्चदशसंख्या इत्यर्थः स्वार्हस्थानानि स्वोचितान् तांस्तान् शरीरप्रदेशानित्यर्थः, उपेतमाक्रम्य स्थितम् ॥

निदानसंग्रहे शिरोरोगा एकादश, नेत्ररोगाः षट्सप्ततिः, मुखरोगाः सप्तषष्टिः, नासारोगा एकत्रिंशत्, किन्तु प्रकृतपद्ये शिरसि शतं नेत्रयोः चतुर्नवति, मुखं च चतुःसप्ततिः, नासायामष्टादश रोगा निर्दिष्टाः तत्सङ्गतये तन्त्रान्तरानुसरणमेव शरणम् । इति ॥ १३ ॥

अथ च स्वयमेव मन्त्रिभूतस्य युवराजस्य पाण्डोः पुरोपरोध-

(१) नगरोपरोधप्रकारः ।

वैचित्री वाचामतिवर्तते पन्थानम् । (सामर्षं सावहित्थं[1] चाकाशे) साधु मन्त्रिधुरीण, साधु । अनया गुप्तप्रयोगप्रकारगौरवया धिषणया शौर्येण च दैत्यगुरुं वृषपर्वाणं चाधिशेषे । (सोपहासम्) मयि—(इत्यर्धोक्ते विरमति)

धारणा—(सस्मितम्) अमच्चस्य वाक्यसेसेण तक्कीअदि धीरोदत्तत्तणम्[2] । (क)

अमात्यः—अस्खलितासाधारणकार्यावधारणधौरेयस्खलितानि[3] तव मनीषितानि भवन्ति (इति पुरो विलोक्य) अहोनगरालङ्कारचातुरी पौराणाम् ।

कीर्णान्यम्बुपृषन्ति किंकरगणैरभ्यन्तरे ताडिता-
न्यातोद्यानि निकेतकेकिनटनप्रारम्भमूलानि च ।
बद्धा मन्दिरमार्गसीमसु हसन्नाथापनीतांशुक-
व्यक्तोरोजसलज्जसिद्धयुवतिव्याकृष्टचेला ध्वजाः ॥१४॥

(क) अमात्यस्य वाक्यशेषेण तर्क्यते धीरोदात्तत्वम् ।

कीर्णान्यम्बुपृषन्तीत्यादि—किङ्करगणैः अभ्यन्तरेऽम्बुपृषन्ति अम्भः कणाः कीर्णानि उत्क्षितानि तथा निकेतकेकिनां गृहमयूराणां नटनप्रारम्भे नृत्यारम्भे मूलानि कारणभूतानि आतोद्यानि वाद्यविशे-

---

(१) अवहित्था—

भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ।
व्यापारान्तरसक्त्यन्यथावभाषणविलोकनादिकरी ।

(२) धीरोदात्तः, तल्लक्षणं चोक्तं साहित्यदर्पणे—

अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥

(३) अस्खलितमप्रतिहतं यथा तथा असाधारणकार्याणां अवधारणे निर्णये धौरेय धुरीण !

षाणि ताडितानि, तथा मन्दिरमार्गसीमसु ध्वजाः बद्धाः, किंभूताः? हसद्भिर्नाथैरपनीयमंशुकं ययोः सकाशात् तौ, अत एव व्यक्तौ उरोजौ यासां ताः, अत एव सलज्जाः या सिद्धयुवतयस्ताभिर्व्याकृष्टं चेलं यासां ता एवंभूताः ॥ १४ ॥

अपि च—

मन्ये रम्भाः पुरमृगदृशामूरुसौभाग्यचौर्या-
द्बद्धा भृत्यैः प्रतिगृहमपि द्वारपार्श्वद्वयेषु ।
अम्भोदुर्गात्कथमपि हृता यन्त्रितोच्चैर्विताने
तासां वक्राम्बुजपरिमलग्राहिणी पद्ममाला ॥ १५ ॥

मन्ये रम्भाः पुरमृगदृशामित्यादि—भृत्यैः प्रतिगृहमपि सर्वेषु गृहेषु द्वारपार्श्वद्वयेषु पुरमृगदृशां नगरविलासिनीनां ऊरुसौभाग्यचौर्यात् ऊरुसौन्दर्यहरणाद्धेतोः रम्भाः कदल्यः बद्धाः, किञ्च पद्ममाला तासां विलासिनीनां वक्राम्बुजपरिमलग्राहिणी मुखसरोजसौगन्ध्यहारिणी अत एव अम्भोरूपदुर्गात् कथमपि हृता आनीता सती उच्चैर्विताने परमण्डपे यन्त्रिता इति मन्ये ॥ १५ ॥

किं च । सुधालेपधवलीकृतसौधवसतयः पौरयुवतयः शारदाभ्रगतपरमाद्भुततडिल्लताविभ्रममुद्भावयन्ति । किं च, चञ्चरीकगणश्चित्रलिखितसहकारमञ्जरीकलितोत्कलिकया संचरमाणोऽपि कदर्यमवनीपतिमुपगतो वनीयकलोक इव निष्फल एव निवर्तते ।

---

(१) सुधालेपेन धवलीकृता सौधवसतयः प्रासादभूमयः याभिः एवम्भूता (प्रासादान्तर्गता इति यावत्) पौरयुवतयः शारदाभ्रं गताः परमाद्भुता या तडिल्लताः तासां विभ्रमं विलासशङ्कामुद्भावयन्ति अनुकुर्वन्ति, चञ्चरीकगणः द्विरेफसङ्घः चित्रलिखिता आलेख्यखचिता याः सहकारमञ्जर्यः रसालमञ्जर्यः तासु कलिता उद्भूता या उत्कलिका उत्कण्ठा तया संचरमाणोऽपि कदर्यं कृपणं अवनीपतिमुपगतः वनीयकलोकः याचकसमुदाय इव निष्फलो निवर्तते । अहिनकुलेन अश्वमहिषेण गोव्याघ्रेण इत्यत्र सर्वत्र (येषां च विरोधः शाश्वतिकः) इत्यनेन समासः ।

कतिचन निकेतनानि च नूतनालिखितेनाहिनकुलेनाश्वमहिषेण गोव्याघ्रेण च भित्तिषु निर्वैरसत्त्वान्यनुकुर्वन्ति चत्वराणि तपोधनाश्रमपदस्य । (अन्यतोऽवलोक्य सहासम्)

दृष्ट्वाऽऽकृष्टकचामुदस्तचिबुकां पत्या कराभ्यां बला-
त्कामप्येणदृशं करौ विधुवतीमास्वाद्यमानाधराम् ।
आलेख्ये पुरशिल्पिना विरचितां भित्तौ बहिर्मन्दिरा-
न्नार्यः सस्मितनम्रवक्त्रकमलाः कर्षन्ति यूनां मनः ॥१६॥

दृष्ट्वाऽऽकृष्टकचामित्यादि—पत्या बलात् कराभ्यामाकृष्टकचां तथा उदस्तमुन्नमितं चिबुकं यस्यास्तां करौ विधुवतीं निषेधमुद्रया करौ कम्पयन्तीं, किञ्चास्वाद्यमानाधरामेवम्भूतां मन्दिराद्बहिः भित्तौ आलेख्ये चित्रे पुरशिल्पिना कारुणा विरचितां कामपि एणदृशं मृगाक्षीं दृष्ट्वा सस्मितानि नम्राणि च वक्त्रकमलानि यासां ताः नार्यः यूनां मनः कर्षन्ति ॥ १६ ॥

नन्विदानीमत्र नगरालंकारदर्शिनो राज्ञः समागमं प्रतीक्षमाणाः पौरास्तस्य परमुपचाराय संनह्यन्ति । तथा हि—

स्थाप्यन्ते गृहवासवेदिषु घटाः संवेष्टितास्तन्तुभिः
प्रत्यग्राम्रदलप्रसाधितमुखा विप्रैः पयःपूरिताः ।
कन्याभिर्घृतसिक्तवर्तिनिकरैर्नीराजनाभाजनैः
साध्यन्ते सममेव लाजसुमनश्चित्राणि पात्राणि च ॥१७॥

स्थाप्यन्त इत्यादि—गृहवासवेदिषु अलिन्देषु तन्तुभिः माङ्गलिकसूत्रैः सम्वेष्टिता बद्धगलाः, प्रत्यग्रैर्नवीनैराम्रदलैः प्रसाधितानि अलङ्कृतानि मुखानि येषान्ते तथा, विप्रैः पयसापूरिताः घटाः स्थाप्यन्ते । किञ्च कन्याभिर्नगरकुमारिकाभिर्घृतेन सिक्तो वर्तिनिकरो येषु तैर्नीराजनाभाजनैरारात्रिकप्रदीपैः सममेव सहैव लाजैः सुमनोभिः पुष्पैश्च चित्राणि पात्राणि च साध्यन्ते सज्जीक्रियन्ते ॥ १७ ॥

(विचिन्त्य) कथमसौ राजा लिप्सितं फलं लब्ध्वा समायास्यति । कथमस्य साम्बशिवप्रसादमन्तरेण लिप्सितफललाभः। कथं वा कठोराणि तपांसि विनानेन सुलभः शिवप्रसादः । कथमनेनं स्वकालविकस्वरशिरीषदलकोमलशरीरेण सुकरा कठोरा तपश्चर्या । न चैतस्य तादृशतपश्चरणादृतेऽखिलपुरुषार्थसाधनं भगवतश्चन्द्रकलावतंसस्य निरन्तरध्यानं संभाव्यते। नलिनीदलान्तरालतरलोदबिन्दुसमस्यन्दा दुर्निरोधा हि चित्तवृत्तयः । तदिदानीं मदीयमन्तःकरणं दुरन्तचिन्तोदधौ निमज्य पुनरुन्मज्जति। अथवा कस्य किमसंभावितमनुकूलतामुपगते दैवे । (दक्षिणभुजस्पन्दमभिनीय) कथमस्थाने मम विचारः । सर्वं सुघटितं भविष्यति ।

(नेपथ्ये)

वैतालिकः—

वातं प्रावृषिकं निरुध्य सहसा गात्रप्रकम्पप्रदं
संफुल्लानि विधाय चारु कमलान्यासाद्य हंसागमम् ।
दिष्ट्या लम्भयता प्रसादमधिकं वापीजलाधारयोः
सद्यः शारदवासरेण धवलो मेघोऽम्बरः प्रापितः ॥१८॥

वातं प्रावृषिकमित्यादि—गात्रप्रकम्पप्रदमतीवशिशिरं प्रावृषि वर्षर्तौ भवं वातं सहसा झटिति निरुध्य कमलानि चारु यथा तथा संफुल्लानि विधाय विकसय्य हंसानां मरालानामागममागमनमासाद्य वापीजलाधारयोः दीर्घिकातडागयोरधिकमत्यर्थं प्रसादमच्छतां लम्भयता

---

(१) स्वकाले ग्रीष्मकाले विकस्वरं विकसनशीलं शिरीषस्य दलं पल्लवं पुष्पं वा तद्वत्कोमलञ्च तत् शरीरन्तेन ।

(२) नलिनीदलानामन्तराले मध्यभागे तरलाश्चपला य उदबिन्दवोऽम्भःकणास्तैस्समःस्यन्दोः प्रस्रवो यासां ताः, दुःखेन निरोद्धुं शक्या दुर्निरोधा ।

शारद्वासरेण सद्यो धवलः शुभ्रो मेघो जलदो दिष्ट्या सानन्दं (दिष्ट्येत्यानन्दने दिष्ट्या पूर्वौ बर्धतिरुत्सवे, इति सागरः) अम्बरमाकाशं प्रापितः ॥ १८ ॥

मन्त्रीः—(श्रुत्वा सहर्षम्) समुद्यतप्राणनिरोधेन निर्धूतसकलतपोविघ्नेन विशुद्धाद्वैतज्ञानसाधनेन समाराधितयोर्धूर्जटिधरराजकन्ययोः प्रसादेन राज्ञा रसो हस्तगतः कृत इत्यनेन वैतालिकवचनेन सूच्यते ।

(पुनर्नेपथ्ये)

दिङ्मण्डलस्य विमलीकरणे प्रवीणा-
न्निर्विघ्नमुत्सृजति नीरजबन्धुरंशून् ।
पङ्कश्च पान्थपद्योगममृष्यमाणः
संशोषमेत्य शकलीभवति क्षणेन ॥ १९ ॥

दिङ्मण्डलस्येत्यादि—नीरजानां कुमुदानां बन्धुश्चन्द्रः दिङ्मण्डलस्य दिग्वलयस्य विमलीकरणे प्रकाशने प्रवीणान् कुशलानंशून् किरणान् निर्विघ्नं निश्शंकं यथा तथा उत्सृजति विमुञ्चति (विद्योतत इत्यर्थः) पङ्कश्च, पान्थानां पदास्तेषां योगस्तं पथिकपदसंबन्धममृष्यमाणो असहमानः सन् संशोषमेत्य क्षणेनाशुतरं शकलीभवति कणशः सम्पद्यते ॥ १९ ॥

मन्त्री—(श्रुत्वा) एतेनापि वचसा निरोगीकरणसमर्थान्रसान्प्रयोक्तुं राज्ञस्तस्य च यक्ष्महतकस्य विनशितुं प्राप्तः कालोऽयमिति च सूच्यते । (सबहुमानम्) साधु रे वैतालिक, साधु । यदधुना गूढाभिप्रायेण भवता बोधितव्यं बोधितम् । तदेव वृत्तं सप्रकारमवगमयितुं राजानं प्रत्युद्गमनेन बहु मन्तुं च तत्रैव गच्छामि ।

(इत्युत्थाय आकाशे) अरे यद्दमहतक ! भवदीयमतः परं पश्यामि शौण्डीर्यम् । (पुरो विलोक्य) कथमागत एव देवः । यतो देवी पुरोमार्गप्रदर्शिनी पुरो दृश्यते । यैषा—

धम्मिल्ले घनसंनिभे सिततडिद्वल्ल्येव मल्लीस्रजा
वक्त्रेन्दौ रुचिरेणनाभितिलकव्याजात्कलङ्केन च ।
हारेण स्तनकोकयोरपि विसस्वच्छेन चायामिना
पादाम्भोरुहयोश्च हंसकयुगेनाराविणा राजते ॥ २० ॥

धम्मिल्ले घनसंनिभे इत्यादि—घनानां मेघानां सन्निभे सदृशे धम्मिले केशपाशे मल्ली पुष्पविशेषस्तस्याः स्रक् माला तया सिता या तडिद्वल्ली विद्युल्लता तयेव राजते शोभते तथा, वक्त्रेन्दौ वक्त्रमेवेन्दुः वक्त्रमिन्दुरिव तत्रएण नाभिर्मृगमदः तस्यास्तिलकं तस्य व्याजस्तस्मात् रुचिरेण कलङ्केन लाञ्छनेन राजते, स्तनौ कोकाविव, स्तनावेव कोकौ वा तयोः आयामिना विस्तारिणा विसस्वच्छेन हारेण राजते, तथा पादाम्भोरुहयोः आराविणा शब्दायमानेन हंसकयुगेन नूपुरयुगलेन मरालद्वन्द्वेन राजते शोभते ॥ २० ॥

अयमपि महाराजस्तस्या अनुपदमागच्छति। संप्रति हि एतस्य-

विचारविगमादिदं विलसति प्रसन्नं मुखम्,
गृहीतसुषमं हिमव्यपगमादिवाम्भोरुहम् ।
विषाणिन इव प्रतिद्विरददर्शनामर्षिणो
गतिश्च किल मेदिनीं नमयतीव धीरोद्धता ॥ २१ ॥

विचार विगमादिदमित्यादि—विचारो नाम चिन्ता तस्य विगमो राहित्यं तस्मात् कारणात् प्रसन्नमिदं मुखं हिमस्य हेमन्तर्तोः व्यपगमात्

---

(१) किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत्,
श्रुत्वेवानुक्तमप्येकस्तत्स्यादाकाशभाषणम् ।
अप्रविष्टैः सहालापो भवेदाकाशभाषणम् ॥ इति ॥

(२) शौण्डीर्यम्—मदोन्मत्तताम् ॥

गृहीता सुषमा येन तत्, प्रातश्रीकमम्भोरुहमिव विलसति विराजते। तथा प्रतिद्विरदः प्रतिपक्षी गजस्तस्य दर्शनं न मर्षितुं सोढुं शीलमस्येति तस्य विषाणिनो गजस्येव धीरा उद्धता च गतिर्गमनं मेदिनीं नमयति ॥२१॥

(ततः प्रविशति जीवो बुद्धिश्च)

जीवः—अहो श्रुतिस्मृतिविहितानां कर्मणां प्रभावः। यानि मया समयेषु समनुष्ठितानि मदीयमन्तःकरणमशोधयन्। शोधिते च तस्मिन्भगवद्भक्तिर्नाम[2] कापि कल्पलता प्रथममङ्कुरिता, पश्चादुपचित-परिचया च सा मम हृदयानुरञ्जनी क्रमेण भगवन्तौ परमेश्वरौ साक्षाद्दर्शितवती। अनितरसाधारणया च तया प्रसन्नौ भगवन्तौ संप्रत्यभिलषितान्रसगन्धकादीन्प्रसादीकृत्या[1]र्पितवन्तौ। अग्रेऽपि तस्यां एव महिम्ना सकलमप्यभिलषितं पुमर्थं लप्स्यामहे।

बुद्धिः—अज्जउत्त, किं एदे रसगन्धआ अण्णणिव्वेक्खा सअं जेव्व विवक्खक्खवणं णिव्वहन्दि। (क)

राजाः—देवि, दिव्यौषधीभिः शोधिताः सन्तो विविधरसा-यनद्वारा उक्तसामर्थ्या ह्येते।

देवीः—ता एव्वं संविहाणसमत्थेण केण वि होदव्वम्। (ख)

राजाः—विज्ञानशर्मैवात्र निर्वोढा। यतः—

ऋषिरेव विजानाति द्रव्यसंयोगजं गुणम्।
विज्ञानशर्मणः कोऽन्यः सर्वज्ञाननिधिर्ऋषिः॥ २२ ॥

(क) आर्यपुत्र ! किमेते रसगन्धका अन्यनिरपेक्षाः स्वयमेव विपक्षक्षपणं निर्वहन्ति।

(ख) तदेवं संविधानसमर्थेन केनापि भवितव्यम्।

ऋषिरेवेत्यादि—स्पष्टम्॥ २२ ॥

---

(१) प्रसादो नाम देवेन निवेदितं वस्तु तत्सम्पादयेति भावः।

(२) भगवद्भक्तिः।

किं च—

महेशतेजः संभूतो रसः कारुणिकाग्रणीः ।
यः स्वानिष्टमुरीकृत्य परपीडां व्यपोहति ॥ २३ ॥

महेशतेज इत्यादि—स्वानिष्टं मर्दनमूर्च्छनमरणलक्षणम् । शेषं सुगमम् ॥ २३ ॥

तदुक्तम्—

मूर्छित्वा हरति रुजं बन्धनमनुभूय मुक्तिदो भवति ।
अमरीकरोति हि मृतः, कोऽन्यः करुणाकरः सूतात् ॥२४॥

सुरगुरुगोद्विजहिंसापापकलापोद्भवं किलासाध्यम् ।
श्वित्रं महदपि शमयति, कोऽन्यस्तस्मात्पवित्रतरः ॥२५॥

गन्धकस्यापि माहात्म्यमुक्तम्—

'ये गुणाः पारदे प्रोक्तास्ते गुणाः सन्ति गन्धके ।
शुद्धो गन्धो हरेद्रोगान्कुष्ठमृत्युजरादिकान् ।
अग्निकारी महानुष्णो वीर्यवृद्धिं करोति च ॥ २६ ॥

मूर्च्छित्वा हरतीत्यारभ्य अग्निकारीति यावत् सर्वं सरलम् ॥ २४ । २५ । २६ ॥

किं च प्रतिदिनं निषेव्यमाणैरेतैः प्रियरतीनां युवतीनामनभिमतानां पुंसां जरामुपरुध्य तासामभिमते यौवने तेषां स्थापनं भवति ।

देवी—(सलज्जं स दृष्टिक्षेपं च) संपत्तो एसो विएणाणणामहेओ अमच्चो । ता णम्मालावस्स ण एसो समओ । (क)

(क) संप्राप्त एष विज्ञान नामधेयोऽमात्यः । तन्नर्मालापस्य नैष समयः ।

राजाः—(विलोक्य) अये, मन्त्रिबृहस्पतिः संप्राप्तः । (सानुशयम्)

कर्तव्यो विधिरित्थमित्थमिति मामुक्त्वा जिगीषुर्द्विषं
स्वस्यैवोपरि राज्यतन्त्रमखिलं द्रष्टव्यमासज्य च ।
अद्येदं क्रियते, करिष्यत इदं, पश्चादकारि त्विदं
प्रागेवेति दुरन्तया कृशतनुं पश्याम्यमुं चिन्तया ॥ २७॥

कर्तव्यो विधिरित्थमित्यादि—इत्थमित्थमनयाऽनया विधया विधिः कर्तव्य इति मामुक्त्वा अखिलं द्रष्टव्यमनुक्षणं निरीक्षितुमर्हं राज्यतन्त्रं स्वस्यैवोपरि आसज्यारोप्य द्विषं जिगीषुरस्ति । अमुमद्येदं क्रियते, इदं पश्चात् करिष्यत, इदं तु प्रागेवाकारि इति अनया दुरन्तया चिन्तया कृशतनुं पश्यामि ॥ २७ ॥

एतदनुज्ञयैव निर्विचारमानसेन मया कृतं भगवदाराधनम् ।

मन्त्री—(उपसृत्य) स्वस्ति सफलमनोरथाभ्यां स्वामिभ्याम् ।

जीवः—भवत्साहाय्यमेवात्र हेतुः ।

बुद्धिः—एवमप्यमत्तेण चित्तवावारेण सहायत्तणं कुणन्तो दीहाऊ होइ । (ख)

(ख) एवमप्रमत्तेन चित्तव्यापारेण सहायत्वं कुर्वन्दीर्घायुर्भव ।

राजा—अत्र निषीदतु भवान् ।

मन्त्री—(उपविश्य) निर्विघ्नेन कार्यसिद्धिर्जातेति मनोरथानामुपरि वर्तामहे ।

राजा—तदेव वक्तुकामोऽस्मि ।

मन्त्री—अवहितोऽस्मि ।

राजा—त्वदुक्तमार्गेण प्रथमं पद्मासनं बद्ध्वा तथैवोपविष्टोऽहम् ।

शुद्धान्तःकरणेन संततपरिध्यातार्ककोटिप्रभ-
प्रालेयद्युतिकोटिशीतलशिवारूढाङ्कगङ्गाधरः ।

सानन्दाश्रुकणो दृशोः, सपुलको गात्रेषु, सप्रश्रय-
स्तुत्युक्तिर्वदने, कृताञ्जलिपुटो मूर्धन्यभूवं चिरम् ॥२८॥

शुद्धान्तःकरणेनेत्यादि—शुद्धान्तःकरणेन विशुद्धचेतसा सततं निरन्तरं परिध्यातः ध्यानविषयीकृतः, अर्काणां सूर्याणां कोटिः एतदाख्या संख्या, तस्या इव प्रभा यस्यासौ स च प्रालेयद्युतिश्चन्द्रस्तस्य कोटिः संख्या शीतलः स च शिवया आरूढमध्यारूढम्, अङ्कमुत्सङ्गो यस्य स चासौ गङ्गाधरो येन सः, एवं चिरमभूवम् । दृशोश्चक्षुषोः सानन्दाश्रुकणश्चिरमभूवम् । गात्रेषु सपुलक एवं वदने सप्रश्रया विनीतभावमाश्रिता स्तुत्युक्तिः स्तोत्रं यस्य स एवंविधस्तथा मूर्धनि शिरसि कृताञ्जलिपुटश्च चिरमभूवम् ॥ २८ ॥

तदनु मयि प्रसादाभिमुखः प्रज्वलदग्निशिखाकलापकपिलजटामण्डलाटवीविलुठज्जाह्नवीचरबालहंसायमानचन्द्रलेखः[1], कण्ठगतकालकूटद्युतियमुनोभयपार्श्वनिःसरन्निर्झरायमाणरुद्राक्षमालिकः[2], परिहितशार्दूलचर्मसंदर्शनभीतमिव मृगमेकं संरक्षितुं करे बिभ्राणः, करान्तरे च प्रणतजनदुरदृष्टशिलाभञ्जनं टङ्कं च कंचन, भगवान्काञ्चनगिरिधन्वा गिरिकन्यासमेतो मामेतदवोचत ।

ध्यानेन ते प्रसन्नोऽस्मि वृणीष्व वरमर्पये ।
इत्युक्तवन्तं तं देवमयाचे रसगन्धकान् ॥ २९ ॥

ध्यानेनेत्यादि—सरलम् ॥ २९ ॥

---

(१) प्रज्वलन् योऽग्निस्तस्या शिखाकलापवत् कपिलमीषत् पीतवर्णं यज्जटामण्डलं तदेवाऽटवीतत्र विलुठन्ती या जाह्नवी गङ्गा तस्यां चरा संचरन्ती या बालहंसी तामिवाचरन्ती चन्द्रलेखा यस्य सः तथा ।

(२) कण्ठगता या कालकूटद्युतिः गरलश्रीः सैव यमुना कालिन्दी नाम नदी तस्या उभयपार्श्वतो निःसरन्तौ निर्गच्छन्तौ यौ निर्झरौ स्रोतसी ताविवाचरन्ती अक्षमालिका यस्य सः ।

ततस्तेन दीयमानान्रसगन्धकानग्रहीषम् । पुनश्च प्रणम्य सप्रश्रयमयाचिषम् । देवदेव !

फलिन्यः फलहीना याः पुष्पिण्यो या अपुष्पिकाः ।
गुरुप्रसूतास्ता मुञ्चन्त्वंहसो न इति श्रुतिः ॥३०॥

फलिन्य इत्यादि—याः फलिन्यः फलवत्यः याश्च फलहीनाः फलवर्जिताः याः पुष्पिण्यः पुष्पवत्यः याश्चापुष्पिकाः पुष्परहिताः तास्सर्वाः गुरुर्मन्त्राभिमानीदेवः तेन प्रसूता अनुज्ञाताः सत्यः, नोऽस्मान् अंहसः आमयरूपात्पाप्मनो मुञ्चन्तु मोचयन्तु। पद्यमेतच्छन्दतोऽर्थतश्च (याः फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः, बृहस्पतिप्रसूतास्ता नो-मुञ्चन्त्वंहस इति) श्रुति* मनुवदति ॥ ३० ॥

यस्मै ददासि तं रुग्भ्यः सर्वाभ्यः पारयामहे ।
इति सोमेनौषधयः संवदन्तीति च श्रुतिः ॥ ३१ ॥

यस्मै ददासीत्यादि—पद्येन (ओषधयः† संवदन्ते सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि) इति श्रुतिमर्थतोऽनुवदति ॥ ३१ ॥

अतः सर्वास्ताः सिद्धौषधयः सोमायत्ताः, स च भगवतः शिरोभूषणमत्रैव संनिहितः । अतः—

शोधयितुं रसगन्धान्कर्तुं च रसौषधानि विविधानि ।
दिव्यौषधीश्च सर्वा, दापय मौलिस्थितेन चन्द्रेण ॥३२॥

शोधयितुमित्यादि—स्पष्टम् ॥ ३२ ॥

ततश्च भगवदाज्ञया तेन सोमेन सर्वास्ता मह्यं दत्ताः ।

(इति मन्त्रिहस्तेऽर्पयति)

---

* यजुर्वेदस्य १२ अध्याये ८९ एकोननवतितमोऽयं मन्त्रः ।

† " " " ९६ षण्णवतितमोयं मन्त्रः ।

मन्त्री—(सहर्षं गृहीत्वा दृष्ट्वा च) सप्तकञ्चुकादिदोषनिराकरणेन शुद्धानेतानोषधीभिः सह शत्रुजयाय प्रयोक्ष्यामहे ।

देवी—कित्तिआ ते सत्तुजणा किंणामहेआ अ कस्सिं समए पुरोपरोहं किदवन्तो । (क)

मन्त्री—श्रूयतां तावत् ।

पुण्डरीकपुरं राज्ञि प्रविष्टे रन्ध्रलाभतः ।
स्वराजानुज्ञया पाण्डुररुधत्सैनिकैः पुरम् ॥ ३३ ॥

(क) कियन्तस्ते शत्रुजनाः किंनामधेयाश्च कस्मिन्समये पुरोपरोधं कृतवन्तः ।

पुण्डरीकपुरमित्यादि—राज्ञि पुण्डरीकपुरं प्रविष्टे सति पाण्डु रन्ध्रलाभतः छिद्रमवकाशमिति यावत् प्राप्य (छिद्रान्वेषिणो हि राजानो भवन्तीति भावः) स्वराजानुज्ञया यक्ष्मणः शासनेन सैनिकैः पुरमरुधत् ॥ ३३ ॥

यक्ष्महतकस्यास्मच्छत्रोर्बहवः सैनिकाः ।

ग्रहण्यश्मर्यतीसारशूलार्शः पाण्डुकामलाः ।
विषूचिका कुष्ठगुल्मसंनिपातज्वरादयः ॥ ३४ ॥

ग्रहण्यश्मरीत्यादि—स्पष्टम् ॥ ३४ ॥

देवी—अमच्च, एत्तिअं पुरोपरोहसंरम्भं कुणन्तेण सह सैणिएण तेण जक्खहदएण अम्हाणं किं अच्चाहिदं कादव्वम् ॥ (क)

(क) अमात्य ! एतावन्तं पुरोपरोधसंरम्भं कुर्वाणेन सह सैनिकेन तेन यक्ष्महतकेनास्माकं किमत्याहितं कर्तव्यम् ।

मन्त्री—देवि, पुरान्निष्क्रमयितव्या वयमित्येव तस्य हताशस्य दुराशाभिनिवेशः ।

देवी:—अहो अणात्तणीणित्तणं जक्खहदअस्स । जो अम्हेसु पुरादो णिक्कन्तेसु सअं कहिं ठाइस्संति अप्पणो विणासं ण गणेदि ॥ (ख)

मन्त्री—सत्यमुक्तं देव्या ।

महापातकसंभूतेस्तस्य पापस्य यक्ष्मणः ।
वैरायितमिदं चित्रं स्वविनाशमपीच्छतः ॥ ३५ ॥

(ख) अहो अनात्मनीनत्वं यक्ष्महतकस्य । योऽस्मासु पुरान्निष्क्रान्तेषु स्वयं कुत्र स्थास्यामीत्यात्मनोऽपि नाशं न गणयति ।

महापातकसम्भूत इत्यादि—महापातकेभ्यः (ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः, महान्ति पातकान्याहुः संसर्गश्चापि तैः सह) इत्येतेभ्यः सम्भूतिरुत्पत्तिर्यस्य तस्य पापस्य पापस्वरूपस्य यक्ष्मणो वैरायितं नाम वैराचरणं चित्रं विचित्रम् । एतदेव दर्शयति स्वविनाशमपीच्छत इति आश्रयनाशादाश्रितनाशोऽपि सम्भवतीति भावः ॥ ३५ ॥

यदुक्तमभियुक्तैः—

अपथ्यसेविनश्चौरा राजदाररता अपि ।
जानन्त एव स्वानर्थमिच्छन्त्यारब्धकर्मतः ॥ ३६ ॥

अपथ्यसेविन इत्यादि—सरलम् ॥ ३६ ॥

ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ।
ह्येवं या समभाणि भर्तृहरिणा काष्ठा परा पापिनाम् ।
तामेतामतिशेत एष सपरीवारस्य नाशं निज-
स्योत्पश्यन्नपि निष्क्रमाय यतते यो नः पुरात्पातकी ॥३७॥

ये निघ्नन्ति निरर्थकमित्यादि—सुगमम् ॥ ३७ ॥

अस्त्यत्र लौकिकोऽप्याभाणकः—'स्वनाशाच्छेदेन शत्रोरमङ्गलमापादयत्यनात्मनीनो मूर्खः' इति ।

देवी—ता कहिं दाणिं एत्तिआणं रोगाणं णिग्गहो सुअरो । (ग)

मन्त्री—देवि ! माभैषीः । निखिलरोगानिसर्गवैरिणि रसे स्वाधीने कः शत्रुजये संदेहः ?

राजा—तर्हि कुतो विलम्ब्यते ।

मन्त्री—अहं पुनरधुना रसमोषधीभिः सह संयोजयितुं गच्छामि । देवेनापि विश्राम्यताम् ।

(ग) तत्कथमिदानीमेतावतां रोगाणां निग्रहः सुकरः ।

(इति निष्क्रान्ताः सर्वे)

इति तृतीयोऽङ्कः ।

इति श्रीजीवानन्दरसायने संक्षिप्तटिप्पणे तृतीयोऽङ्कः ॥

चतुर्थोऽङ्कः ।

(ततः प्रविशति विदूषकः)

विदूषकः—(क) उत्तं खु दोआरिएण पाणेण रण्णो रसगन्धअवरप्पदाणं सुणिअ बलिअं रोसवसंगदेण जक्खहदएण पण्डुणा सह किंवि मन्तूण सपरिवारस्स अम्हाणं रण्णो उवरि बइक्कमं किंवि कादुं उज्जोओ करीअदित्ति सुदवन्देण विण्णाणणामहेएण मन्तिणा कज्जगदिं आवेदिअमाणो अन्तेउरवेदिअन्तरे चिट्ठदित्ति ता राअसमीपं गमिस्सम् । (इति परिक्रम्योदरं करतलेन परामृष्य) अहो, मुहुत्तादो पुव्वं खादिदं मातुलुङ्गफलप्पमाणाणं मोदआणं सदं वि जिण्णं जादम् । जं तस्सिं समए धण्णकुम्भीपीणुत्तुङ्गो मह पिचण्डो ठिदो । दाणिं उण तिण्णकिदो कटो विअ तणूहोदि । (विमृष्य) णं मज्झण्णो वट्टदि तह हि ।

(क) उक्तं खलु दौवारिकेण प्राणेन राज्ञो रसगन्धवरप्रदानं श्रुत्वा बलवद्रोषवशंगतेन यक्षहतकेन पाण्डुना सह किमपि मन्त्रयित्वा सपरिवारस्यास्माकं राज्ञ उपरि व्यतिक्रमं किमपि कर्तुमुद्योगः क्रियत इति श्रुतवता विज्ञाननामधेयेन मन्त्रिणा कार्यगतिमावेद्यमानोऽन्तःपुरवेदिकान्तरे तिष्ठतीति । तद्राजसमीपं गमिष्यामि । अहो, मुहूर्तात्पूर्वं खादितं मातुलुङ्गफलप्रमाणानां मोदकानां शतमपि जीर्णं जातम् । यत्तस्मिन्समये धान्यकुम्भीपीनोत्तुङ्गं मम पिचण्डं[1] स्थितम् । इदानीं पुनस्तृणकृतः कट इव तनू भवति । ननु मध्याह्नो वर्तते । तथा हि—

---

(१) पिचण्डमुदरम् ।

पत्तगदं घरहरिणो तिह्वाए पिवइ सीअलं सलिलम् ।
गन्धेण कुणइ सुहिदं घाणं घिदमिस्ससक्करापूवो ॥१॥

अहो पमादो । राअसमीवं गमिस्सं ति महाणससमीवं गदो ह्मि । अदो एव्व तह वत्तुलतणुअरगोधूमापूवसंहितसरावेहिं, माहि-सद हिमण्डमिस्सिदमासाविरइअभक्खविसेसणिविडिअभाअणेहिं, परितत्तम्बरीसभज्जिदचणअचअपूरिआपिण्डएहिं, फाणिअसंकलिअ-जवधाणासमुल्लसिदविसालामत्तेहिं, दुद्धदहिसक्करासलिलभाविदवि-

---

पात्रगतं गृहहरिणस्तृष्णया पिबति शीतलं सलिलम् ।
गन्धेन करोति सुखितं घ्राणं घृतमिश्रशर्करापूपः ॥

विदूषकः—विकृतांगवचोवेषैर्हास्यकारी विदूषकः । विश्वनाथोऽप्याह—कुसुमवसन्ताद्यभिधः कर्मवपुर्वेषभाषाद्यैः । हास्यकरः कलहरुचिर्विदूषकः स्यात्स्वकर्मज्ञः, इति । स्वकर्म भोजनादि । इति । सागरोऽप्यवदत्—वयस्यकश्चाटुपटुः स एव च विदूषकः । अन्तःपुरचरो राज्ञां नर्मामात्यः प्रकीर्तितः । इति ।

पत्तगदमित्यादि—स्पष्टम् ॥ १ ॥

अहो प्रमादः । राजसमीपं गमिष्यामीति महानससमीपं गतोऽस्मि अत एव तथा वर्तुलतनुतरगोधूमापूपसंहितशरावैः[1], माहिषदधिमण्डमिश्रितमाषविरचितभक्ष्यविशेषनिबिडितभाजनैः, परितप्ताम्बरीषभर्जि-[2]तचणकचयपूरितपिण्डकैः, फाणितसंकलितयवधानासमुल्लसितविशालामत्रैः, दुग्धदधिशर्करासलिलभावितविविधपृथुकराशिसम्पूर्णविष-[3]

---

(१) गोधूमापूपः गोधूमचूर्णकृतः फुल्लिकाविशेषः । भक्ष्यविशेषः 'बड़ा' इति ख्यातः लोके ।

(२) अम्बरीषः—भ्राष्ट्रम् ।

(३) दुग्धं च दधि च शर्करा च सलिलञ्च तैःभावितानां विविधानां पृथुकानां राशिभिः सम्पूर्णाः निषङ्कटा विशाला य चषकविशेषाः पात्रविशेषास्तैः ॥

विहपिथुअरासिसंपुएणविसङ्कडचसअविसेसेहिं, मल्लिअमुउलपुञ्जधवलसालितएडुलन्नसमुच्चअविराजिदतम्ममअभएडगणन्तरट्ठाविदसुवएणसवएणसूपणिहाणपिठरेहिं, कित्तपरिक्कवन्ताककारइल्लपडोलकोसातईणिप्पावराअमासकदलीपणसकुम्भएडप्पमुहसलाटुखएडमयशाकपएडमण्डिदबहुविधभाअणविसेसेहिं, अ परिसोहमाणस्स महाणसस्स विसमरो गन्धो।

घुमघुमाअदि मे णासाबिलम्। सिलसिलाअदि तालुरसणामूले सुणिग्गत्तरं लालाजलम्। पज्जलदिव्व हणूमन्तवालग्गलग्गग्गिसिहागहिदघरपरम्परं लङ्काउरं विअ बुभुक्खाउरं मे उदरम्। (किंचित्पुरतो विलोक्य) इह खु महाणसदुवारदेसे अवणदपुव्वकाओ विलोईअदि चुल्लिपावअपज्जलणत्थफुक्कारपवणविकएणभसितलेशपुञ्जधूसरमुखो णिडिलदीसन्तविरलसेदम्बुकणिओ करङ्गुली-

ङ्कटचषकविशेषः, मल्लिकामुकुलपुञ्जधवलशालितएडुलान्नसमुच्चयविराजितताम्रमयभाएडगणाभ्यन्तरस्थापितसुवर्णसवर्णसूपनिधानपिठरैः कृत्तपरिपक्ववृन्ताककारवेल्लपटोलकोशातकीनिष्पावराजमाषकदलीपनसकूष्माण्डप्रमुखशलाटुखण्डमयशाकषण्डमण्डितबहुविधभाजनविशेषैश्च परिशोभमानस्य महानसस्य विसृमरो गन्धः।

घुमघुमायते मे नासाविलम्। सिलासिलायते तालुरसनामूले। सुनिर्गत्वरं लालाजलम्। प्रज्वलतीव हनूमद्वालाग्रलग्नाग्निशिखागृहीतगृहपरम्परं लङ्कापुरमिव बुभुक्षातुरं मे उदरम्। इह खलु महानसद्वारदेशेऽवनतपूर्वकायो विलोक्यते चुल्लीपावकप्रज्वलनार्थफूत्कारपवनाविकीर्णभसितलेशपुञ्जधूसरमुखो निटिलदृश्यमानविरलस्वेदाम्बुकणिकः कराङ्गु-

(१) कृन्तानि परिपक्वानि अग्निना साधितानि वृन्ताकं कारवेल्लं पटोलं पटोलपत्रं कोशातकी राजकोषातकी निष्पावो राजकलायो राजमाषः कदलीफलं पनस 'कटहर' इति लोके कूष्माण्डं पेठा इति। एतत्प्रमुखानां शलाटुखण्डानि तद्रूपैः शाकषंडैः शाकसमूहैः मण्डिता बहुविधाः ये भाजनविशेषास्तैः॥

लग्गहिङ्गुपरिमलसंतप्पिदसमीवगदजणघाणेन्दिओ, ईससंकमिदेङ्गाललञ्छिदपरिधाणपडो, दक्खिणकरग्गहीददव्वीसिहरतणुतरदीसन्तविलोलिअसाअपाअवप्फो, अण्णकरलम्बितेन्धणसअलो भद्दमुहो णाम पौरोगवो। ता एणं एव्व पुच्छामि। अए भद्दमुह! तुए पक्केसु भक्खाविसेसेसु किं वि किं विं मह हत्थे दादव्वं जं भक्खिअ एदं सुट्ठु एदं णेत्ति विआरिअ कहेमि, जं सुट्ठु तं परिवेसिअ रण्णो हत्थादो पारितोसिअं गेह्णदु भवम्। (सामर्षम्) कहं एसो दासीए पुत्तो "जइ तुह बुभुक्खा तदो रण्णो समीपं गदुअ भोअणं दादव्वं ति पुच्छ। अहं उदरम्भरिणो तुह किं वि ण दाइस्सं" ति भणिअ महाणसब्भन्तरं गदो। होदु। राअसमीपं गमिस्सम्। (इति परिक्रम्यावलोक्य च) कहं एत्थ राअ समीवे विअणे अलगद्देण गिह्णिअ बिलं पवेसिदो मण्डूओ विअ किं वि अणक्खरं पलवन्तो अमच्चो वैधवेओ चिट्ठइ। ता समअं पडिवालइस्सम्। (इति तिष्ठति)

लिलग्नहिंगुपरिमलसंतर्पितसमीपगतजनघ्राणेन्द्रियः, ईषत्संक्रमितेङ्गाललाञ्छितपरिधानपटो, दक्षिणकरगृहीतदर्वीशिखरतनुतरदृश्यमानविलोलितशाकपाकवाष्पः, अन्यकरलम्बितेन्धनशकलो, भद्रमुखो नाम पौरोगवः। तदेनमेव पृच्छामि। अये भद्रमुख! त्वया पक्वेषु भक्ष्यविशेषेषु किमपि किमपि मम हस्ते दातव्यं, यद्भक्षयित्वा इदं सुष्ठु इदं नेति विचार्य कथयामि, यत्सुष्ठु तत्परिवेष्य राज्ञो हस्तात् पारितोषिकं गृह्णातु भवान्। कथमेष दास्याः पुत्रः। "यदि तव बुभुक्षा तदा राज्ञः समीपं गत्वा भोजनं दातव्यमिति पृच्छ। अहमुदरं भरेस्तव किमपि न दास्यामि" इति भणित्वा महानसाभ्यन्तरं गतः। भवतु। राजसमीपं गमिष्यामि। कथमत्र राजसमीपे विजने अलगर्देन गृहीत्वा बिलं प्रवेशितो मण्डूक इव किमप्यनक्षरं प्रलपन्नमात्यो वैधवेयस्तिष्ठति। तत्समयं प्रतिपालयिष्यामि।

(ततः प्रविशति राजा मन्त्री च)

राजा—(कर्णं दत्त्वा) कार्यपर्यालोचनयातिक्रान्तोऽप्यर्धदिवसो न ज्ञातः। यत इदानीम्—

प्रसादोदरपुञ्जितप्रतिरवप्राग्भारदीर्घीकृतं
सद्यः पञ्जरगर्भ एव चकितानुद्भ्रामयन्तं शुकान्।
कार्यव्याप्रियमाणमानवमुखं कर्षन्तमात्मोन्मुखं
मध्याह्नागमसूचनाय पटहो धत्ते ध्वनिं ताडितः॥ २॥

सम्प्रति हि घोरातपसन्तापमसहमानाः प्राणिनः प्रायेण प्रच्छायशीतलं प्रदेशमावासाय प्रार्थयन्ते। तथा हि—

आसीदन्ति विशालशैलशिखरभ्रश्यन्नदीनिर्झरां
शुक्लापाङ्गकुलानि सूर्यकिरणैः शून्यामरण्यावनीम्।
आवर्तस्फुटपुण्डरीकमुकुलप्रेङ्खोलनोद्गन्धिना
तृप्यन्तो मरुता स्वपन्ति च नदीतीरे विलेषूरगाः॥३॥

प्रासादोदरेत्यादि—पटहः प्रासादोदरे प्रासादमध्ये पुञ्जितो राशीभूतो यः प्रतिरवः प्रतिध्वनिस्तस्य प्राग्भारेण बाहुल्येन दीर्घीकृतं वर्धितं ध्वनिं धत्ते, इत्यन्वयः। शेषं स्पष्टम् ॥ २ ॥

आसीदन्तीत्यादि—विशालात् शैलशिखरात् भ्रश्यन्नदीनिर्झरो यस्यां सूर्यकिरणैरर्कांशुभिः शून्याम् विरहिताम् अरण्यावनीं वनस्थलीं शुक्लापाङ्गानां मयूराणां "मयूरो[1] बर्हिणो बर्ही" इति कोशः। कुलानि वृन्दानि आसीदन्ति। आवर्त्ते अम्भसां भ्रमे यानि स्फुटानि पुण्डरीकमुकुलानि कमलकोरकाणि तेषां प्रेङ्खोलनमान्दोलनन्तेनोद्गन्धिना उत्कटगन्धवता मरुता वायुना तृप्यतः नदीतीरे उरगाः विलेषु स्वपन्ति ॥ ३ ॥

---

(१) मयूरो बर्हिणो बर्ही शुक्लापाङ्गः 'शिखावलः' इति यादवः।

मन्त्री—अहो यौवनश्रियं पुष्णात्येष दिवसः। यतः—

छायाशीतलमध्वनि द्रुमतलं चण्डातपोपप्लुताः
शौरिं दानवपीडिता इव सुराः पान्था भजन्ति द्रुतम्।
दुष्कीर्तिं क्षितिपा इव प्रकृतिभिर्लोभावधूतार्थिनो
गाहन्ते च करेणुभिः सह नदीमारण्यका वारणाः ॥४॥

अपि चेदानीम्—

घर्माम्भः कणलुप्यमानमकरीपत्राङ्कुरालङ्क्रियं
भूयिष्ठोद्गतफूत्क्रियानिलगलन्मासृण्यबिम्बाधरम्।
ताम्यल्लोचनतारकालसगतिव्याख्यातनिद्रागमं
प्रच्छाये पथि रोचते स्थितवते पान्थाय कान्तामुखम् ॥५॥

राजा—(स्वगतम्) नन्वस्मिन्नवसरे

स्नातव्यं जपितव्यं वसितव्यं नमसितव्यमत्तव्यम्।
अ.......................मनुकूलं दैवतमत्र क्रमेण मया
अपि च मुहुःस्मरितव्यमनुकूलं दैवतं क्रमेण मया ॥६॥

छायाशीतलमित्यादि—दानवैः पीडिताः आक्रान्ता सुराः शौरिं विष्णुमिव चण्डेनातपेन घर्मेणोपप्लुताः पान्था अध्वनि वर्तमानं छायाशीतलं द्रुमतलं द्रुतं शीघ्रं भजन्ति। लोभेनावधूता अर्थिनो यैस्ते क्षितिपा राजानः प्रकृतिभिः प्रजाभिः सह दुष्कीर्तिमिव, अरण्ये भवा आरण्यकाः वारणा गजाः करेणुभिः सह नदीं गाहन्ते लभन्ते प्रविशन्ति च इति ॥ ४ ॥

घर्माम्भ इत्यादि—घर्माम्भसां कणैः स्वेदोदबिन्दुभिर्लुप्यमाना मकरीपत्रभङ्गैः(रचितेति शेषः)अलङ्क्रिया यस्य तत्, तथा भूयिष्ठं बाहुल्येनोद्गतो यो फूत्क्रियानिलः फूत्कारपवनस्तेन गलद् भ्रश्यत्-मासृण्यं श्लक्ष्णता यस्यैवं भूतो बिम्बाधरो यस्य तत्, किंच ताम्यतोः घर्मक्लान्तयोर्लोचनयोर्ये तारके कनीनिके तयोरलसगत्या व्याख्यातः सूचितो निद्रागमो यस्मिन्-तदेवं विधं कान्तामुखं, प्रच्छाये छायाप्रधाने पथि स्थितवते पान्थाय रोचते ॥ ५ ॥

स्नातव्यमित्यादि—स्पष्टम् ॥ ६ ॥

(प्रकाशम्) किमतः परमाचरितव्यम् ।

मन्त्री—मध्याह्न इति बुभुक्षिताः परिजनाः । ततः स्नानार्थमुत्तिष्ठतु महाराजः ।

(राजा उत्तिष्ठति मन्त्री च) .

विदूषकः—(श्रुत्वा) एवं वादिणो मन्तिणो होदु पुण्णलोओ । (उपसृत्य) जेदु जेदु महाराओ । (क)

राजा—वयस्य ! कथमागतोऽसि ।

विदूषकः—(मन्त्रिणं प्रति) अवि कुसलं अमच्चस्स । (ख)

मन्त्री—कथमभ्यवहारसमय इति प्राप्तोऽसि ।

विदूषकः—दाणिं जेव्व णिअघरे भोअणं कदुअ आअदेण अज्जेणवि किं ण विण्णादं मज्झह्लो वट्टदि त्ति । (ग)

मन्त्री—विज्ञातमेव । श्रूयतामिदानीम्—

यूना सस्पृहदृश्यमानकवरीभारोरुपीनस्तनी
पान्थेनाध्वनि शालिगोपवनिता शून्ये स्फुरद्यौवना ।

(क) एवं वादिनो मन्त्रिणो भवतु पुण्यलोकः । जयतु जयतु महाराजः ।

(ख) अपि कुशलममात्यस्य ।

(ग) इदानीमेव निजगृहे भोजनं कृत्वा आगतेनार्येणापि किं न विज्ञातं मध्याह्नो वर्तत इति ।

यूना सस्पृहेत्यादि—शून्ये विविक्तेऽध्वनि यूना पान्थेन सस्पृहं साभिलाषं यथा तथा दृश्यमानः कबरीभारः केशपाशः यस्याः, उरुपीनौ स्थूलकठिनौ स्तनौ च यस्याः सा, किं च स्फुरद्रमणीयं यौवनं यस्याः, शालीन्गोपायति इति शालिगोपस्तस्य वनिता किंवा शालिगोप्तुः स्त्री

आसन्नां सुकुमारवारणबुसापत्रापनीतातपा-
मारामक्षितिमापगातटगतां साकूतमालोकते ॥ ७ ॥

विदूषकः-(समुखभङ्गम्) अण्णस्स पुरिसस्स अण्णाए इत्थिआए संपकसूअणं णाम अणुइदं किं ति वण्णीअदु अज्जेण। जइ मज्झह्नो वण्णणीओ त्ति आग्गहो तदा माणवणं संभादिदं पाणभोअणं वण्णीअदु। जेण सुदमत्तेण वि मह संतोसो होदि। (क)

मन्त्री-(विहस्य) भोजनेन तत्प्रकारस्य तत्साधनस्य च श्रवणे कुतूहली भवान्।

(प्रविश्य)

दौवारिकः-महाराअ! उवाअणहत्था सामन्तभूवाला संपत्ता मए वि तिदीअकच्छं पवेसिदा महाराओ पेक्खिदव्वोत्ति चिट्ठन्ति। (ख)

(राजा मन्त्री च तद्दर्शनप्रदानाय निर्गमनं नाट्यतः)

विदूषकः-(आत्मगतम्) अए दासीए पुत्तेहिं सामन्तराएहिं मम उत्साहभङ्गो किदो। (ग)

आसन्नां सन्निकृष्टां, सुकुमराणामति मृदूनां वारणबुसानां कदलीनां पत्रैरपनीत आतपो यस्यास्तामापगातटगतां नदीकूलसम्बन्धिनीं (सर्वथा सुरतोपभोगक्षमामिति भावः) आरामक्षितिमुपवनभूमिं साकूतं साभिप्रायमालोकते ॥ ७ ॥

(क) अन्यस्य पुरुषस्यान्यया स्त्रिया संपर्कसूचनं नामानुचितं किमिति वर्ण्यते आर्येण। यदि मध्याह्नो वर्णनीय इत्याग्रहस्तदा मानवानां संभावितं पानभोजनं वर्णयतु। येन श्रुतमात्रेणापि मम संतोषो भवति।

(ख) महाराज! उपायनहस्ताः सामन्तभूपालाः संप्राप्ता मयापि तृतीयकक्षां प्रवेशिता महाराजः प्रेक्षितव्य इति तिष्ठन्ति।

(ग) अये! दास्याः पुत्रैः सामन्तराजैर्ममोत्साहभङ्गः कृतः।

(इति तदनुसरणं नाटयति)

मन्त्री—एते स्वामिनं प्रणमन्ति ।

राजा—(आकाशे) अपि कुशलिनो यूयम् ?

मन्त्री—एते 'स्वामिनः कुशलप्रश्नेन कृतार्थाः स्मः' इति वदन्ति ।

विदूषकः—(स्वगतम्) बुभुक्खिदस्स मह अकुसलं ति ण जाणादि वअस्सो । (क)

मन्त्री—

कश्चित्स्वर्णौघमेको मणिगणमपरो भूषणव्रातमन्यः
क्षौमस्तोमं परोऽश्वात्रथकुलमितरो बालमातङ्गसङ्घम् ।
सामन्तक्षोणिपालेष्वहमहमिकयोपाहरद्दृष्टिपातै-
र्देवस्यानुग्रहीतुं सकरुणमुचितं सर्वमित्यर्थयेऽहम् ॥ ८ ॥

अपि च—

हंसाश्चित्रगताः शुकाः स्फुटगिरो लावा मिथोऽमर्षिणः
श्येनाः शीघ्रजवाः शिखण्डिन उपारोहत्कलापोच्चयाः ।
आनीतास्तपनीयपञ्जरगता भूपैरमीभिर्मुदा
किं चावेक्षितविक्रमाश्च मृगयाकालेषु कौलेयकाः ॥९॥

(क) बुभुक्षितस्य ममाकुशलमिति न जानाति वयस्यः ।

कश्चिदित्यादि—सामन्ता माण्डलिकाः ये क्षोणिपालाः तेषु मध्ये अहं पूर्वमहं पूर्वं यस्यां क्रियायां सा तया अहमहमिकया, कश्चित्स्वर्णौघमेको मणिगणमपरो भूषणव्रातमन्यः क्षौमस्तोमं परोऽश्वात्रथकुलञ्च इतरो बालमातङ्गसङ्घमुपाहरत्, एतत्सर्वं देवस्य सकरुणं दृष्टिपातैरनुग्रहीतुमुचितमिति अहमर्थय इति अन्वयः ॥ ८ ॥

हंसाश्चित्रगता इत्यादि—चित्रं विलक्षणं गतं गमनं येषान्ते चित्रगताः हंसाः । तपनीयं सुवर्णं, कौलेयकाः श्वानः । शेषं सरलम् ॥९॥

राजा—मन्त्रिन् !

दत्तानि भूपतिभिरेभिरुपायनानि
तेषां वशे कुरु मयाधिकृता नरा ये ।
एतान्सभाजयितुमर्पय तत्तदर्हा-
न्युष्णीषकञ्चुकदुकूलविभूषणानि ॥ १० ॥

मन्त्री—यथाज्ञापयति देवः ।

विदूषकः—णं वअस्स, मए वि विजई होइत्ति वा आमेत्तेण तुह उवाअणं दिएणं तदो बुभुक्खिदं मं किं त्ति ण संभावेसि । (क)

मन्त्री—राजन् ! श्रोतव्यः कार्यशेषः ।

विदूषकः—हुं, चिट्ठदु दासीएवच्छो कज्जसेसो । वअस्स, किं मह पडिवअणम् । (ख)

राजा—मन्त्रिन् ! ब्राह्मणस्य प्रथमं भोजनं निवर्तयेति अन्तः-पुरं गत्वा देवीं वद । अतः प्रागेव संभाव्यात्र सामन्तभूपान्स्व-स्थानं प्रेषय । वयस्य ! त्वमपि मन्त्रिणा सह गच्छ ।

विदूषकः—दीहाओ होइ । (ग)

दत्तानि भूपतिभिरित्यादि—एतानुपरिस्थान् सामन्तान् सभाजयितुं सत्कर्तुं । शेषं सुगमम् । इति ॥ १० ॥

(क) ननु वयस्य, मयापि विजयी भवेति वाचामात्रेण तवोपायनं दत्तं तद् बुभुक्षितं मां किमिति न संभावयासि ।

(ख) हुं, तिष्ठतु दास्या वत्सः कार्यशेषः । वयस्य, किं मम प्रतिवचनम् ।

(ग) दीर्घायुर्भव ।

(१) दास्या वत्सः नाम दास्याः पुत्रः, इति भावः ।

(२) अतः अन्तःपुरगमनात्प्रागेव ।

मन्त्री—विजयी भवतु देवः। (इति विदूषकेन सह निष्क्रान्तः)

राजा—कः कोऽत्र भोः!

(प्रविश्य)

दौवारिकः—आणवेदु महाराओ। (घ)

राजा—मज्जनगृहमार्गमादेशय।

दौवारिकः—इदो इदो भवं। (ङ) (परिक्रम्यावलोक्य च संस्कृतमाश्रित्य)

स्नातुं ते परिचारिकाः स्तनभरश्रान्ताः शनैः साम्प्रतं
क्वाथोष्णानि जलानि मज्जनगृहे कुम्भीषु संगृह्णते।
आयान्तीव तृषा जलार्थनमिषादासां विलासाद्गतिं
हंसाः केशभरश्रियं च शिखिनः स्नेहादिमा याचितुम्॥११॥

अत्र च हिरण्मयस्य गृहस्थूणस्य पार्श्वभागे—

अभ्यङ्गाय सुवर्णपात्रनिहितं तैलं चलत्सौरभं
विस्तीर्णस्फुटकर्णिकारकुसुमे येनाभिभाव्यं मधु।

(घ) आज्ञापयतु महाराजः।

(ङ) इत इतो भवान्।

स्नातुमित्यादि—क्वाथेन क्वथनेनोष्णानि जलानि कुम्भीषु परिचारिकाः संगृह्णते। आसां विलासाद्गतिं लीलागमनं स्नेहादिमाः परिचारिका याचितुं तृषा हेतुना जलार्थनमिषात् जलग्रहणव्याजादिव हंसा आयान्ति केशभरश्रियञ्च याचितुं शिखिनः मयूरा आयान्तीत्यन्वयः॥११॥

अभ्यङ्गायेत्यादि—सुवर्णपात्रनिहितं चलत्सौरभं तैलमभ्यङ्गाय स्थितम्। किं भूतं, येन तैलेन विस्तीर्णे स्फुटे च कर्णिकारकुसुमे करवीरपुष्पे स्थितं मधु मकरन्दमभिभाव्यं तिरस्करणीयम्, उपमेय-

न्यस्तं चन्दनदारुनिर्मितमिदं कूर्मासनं चासितुं
यत्पृष्ठे पृथिवीव च त्रिगुणिता कौशेयशाटी स्थिता ॥१२॥

अपि च नवाम्बुदश्यामलायां विपुलायतायामिन्द्रनील-मणिनिर्मितायां हर्म्यभित्तौ प्रतिफलितवपुश्चेटीजनस्तडिल्लता-विन्यासमवलम्बते । अत्रैव—

कञ्चुल्या दृढसंयतस्तनभरा हारं गले कुर्वती
पश्चाल्लम्बितमम्बरं च जघने काञ्च्या दृढं बध्नती ।
स्वेदाम्भःकणमञ्जरीं प्रमृजती, चेलाञ्चलेनानने
चेटीष्वेकतमेयमत्र यतते कर्तुं तवाभ्यञ्जनम् ॥ १३ ॥

राजा—दौवारिक ! मन्त्री विदूषकश्च कृतोचितव्यापारो न वेति विचार्यताम् । अहमप्यत्र स्नात्वा कृतशिवार्चनो भोजनाय यतिष्ये ।

दौवारिकः—तह । (क) (इति निष्क्रान्तः)

मिति यावत् । चन्दनदारुणा निर्मितमिदं कूर्मासनं कूर्माकृत्यासनं आसितुमुपवेष्टुं न्यस्तं स्थितम् । यत्पृष्ठे पृथिवी इव कौशेयशाटी त्रिगुणिता त्रिवलिता स्थिता । कूर्मपृष्ठे पृथिवी तिष्ठतीति पुराणसमयः ॥ १२ ॥

विपुलायामित्यादि—विपुलायां विशालायामायतायां दीर्घायाञ्च इन्द्रनीलमणिभिर्निर्मितायामत एव नवाम्बुवत् श्यामलायां हर्म्यभित्तौ प्रतिफलितानि प्रतिबिम्बितानि वपूंषि यस्यैवम्भूतश्चेटीजनस्तडिल्लतायां विन्यासं विद्युदौपम्यमवलम्बते भजति ।

कञ्चुल्येत्यादि—कञ्चुली स्त्रीणामङ्गरक्षिणी तया दृढं संयतस्तनभरो यया सा, पश्चाज्जघने नितम्बस्थले च लम्बितं प्रसारितमम्बरं वासः काञ्च्या काञ्चीदाम्ना दृढं बध्नती । किञ्चानने (विद्यमानाम्) स्वेदाम्भःकणानां मञ्जरीं चेलाञ्चलेनोत्तरीयप्रान्तेन प्रमृजतीति, शेषं स्पष्टम् ॥ १३ ॥

(क) तथा ।

राजा—(स्मृतिमभिनीय) अये महानुभावा शिवभक्तिः, यस्याः प्रसादाद्भगवन्तं साम्बं साक्षात्कृत्य तदीय[1]करुणाकटाक्षामृतनिःष्यन्दकन्दलिताखिलपुमर्थोऽपि सन् संप्रति प्राकृतानर्थनिवर्तकान् रसगन्धकानासाद्य तावतैव कृतकृत्यम्मन्यो मूढोऽहं विस्मृतवानस्मि तां भगवतीं शिवभक्तिम् । अहो धिक् प्रमादम् । नूनं सा भगवती मां कृतघ्नं मन्येत । (निःश्वस्य)

दृङ्मात्रदर्शितनिजप्रथितप्रभावा
प्रह्लादभूमसुरभूरुहमूलभूता ।
जन्मान्तरीयतपसां परिपाकतः सा
प्राप्तापि दैवहतकेन मया विमुक्ता ॥ १४ ॥

तामेव हा स्मितसुधामधुराननेन्दुं
भक्तिं तथा निरुपमामसकृद्विचिन्त्य ।
स्नातुं च भोक्तुमशितुं शयितुं विहर्तुं
शक्नोमि नाहमधुना परितप्यमानः ॥ १५ ॥

---

(१) तदीयैः करुणाकटाक्षरूपैः अमृतनिष्यन्दैः सुधासेकैः कन्दलिता अंकुरिता अखिलाः समग्राः पुमर्था धर्मार्थकाममोक्षरूपाः पुरुषार्था यस्य सः ।

दृङ्मात्रेत्यादि—जन्मान्तरीयाणामन्यजन्मसु चीर्णानां तपसां तपश्चर्याणां परिपाकतः सा प्राप्तापि भक्तिः दैवहतकेन दुर्दैवेन मया विमुक्ता विस्मृता, किम्भूता दृङ्मात्रेण दर्शितः निजः प्रथितः प्रसिद्धः प्रभावो यया, पुनः प्रह्लादस्य हर्षस्य भूमैव सुरभूरुहः कल्पतरुस्तस्य मूलभूता निदानमित्यर्थः ॥ १४ ॥

तामेवेत्यादि—सरलम् ॥ १५ ॥

हृदयानन्दविधात्रीं भक्तिं तामन्तरा न मे सौख्यम् ।
आसारेण विना किं घर्मम्लानस्य शालिनस्तृप्तिः ॥१६॥

तत्कथमहं प्राकृतमिमं व्यासङ्गं परित्यज्य तामेव परमानन्दलीलामनुभूय कृतार्थो भूयासम् । (इति सचिन्तस्तिष्ठति)

(ततः प्रविशति स्मृतिः)

स्मृतिः[1]—अम्मो, भअवदीए सिवभत्तीए विओएण बलिअं उक्कण्ठिदो राआ संपदं ण्हाणभोअणव्वावारं वि णाणुमण्णेदि । ता तुरिअं गदुअ भअवदीए इमं वुत्तन्तं णिवेदिअ ताएणं संयोजइदुं यतिस्सं ति पुण्डरीअपुरं गदुअ तत्थ सद्धाए सेविज्जन्तीं भअवदिं दिट्ठूण सद्धामुहेण तह संविधाणं कदुअ आअदह्मि । ता राअसमीवं गदुअ एदं णिवेदेमि । (इति परिक्रम्योपसृत्य) जेदु जेदु देवो (क)

हृदयानन्दविधात्रीमित्यादि—हृदयानन्दस्य मानसोल्लासस्य विधात्रीं विधायकां तां भक्तिमन्तरा विना मे सौख्यं न, घर्मेण निदाघेन म्लानस्य शालिनः शालिस्तम्भस्य आसारेण धारावृष्ट्या विना तृप्तिः किं कुतः—न स्यादिति भावः ॥ १६ ॥

(क) अम्भो ! भगवत्याः शिवभक्तेर्वियोगेन बलवदुत्कण्ठितो राजा सांप्रतं स्नानभोजनव्यापारमपि नानुमन्यते । तत्त्वरितं गत्वा भगवत्या इदं वृत्तान्तं निवेद्य तयैनं संयोजयितुं यतिष्ये इति पुण्डरीकपुरं गत्वा तत्र श्रद्धया सेव्यमानां भगवतीं दृष्ट्वा श्रद्धामुखेन तथा संविधानं कृत्वा आगतास्मि । तद्राजसमीपं गत्वा इदं निवेदयामि । जयतु जयतु देवः ।

(१) 'स्मृतिर्नाम सुखदुःखकृतानां भावानामनुस्मरणं स्वास्थ्यजघन्यरात्रिनिद्राच्छेदसमानदर्शनोदाहरणचिन्ताभ्यासादिभिर्विभावैरुत्पद्यते । 'सा च शिरःकम्पनावलोकनभ्रूसमुन्नमनप्रहर्षादिभिरनुभावैरभिनीयते' इति भरतः ।

राजा—(दृष्ट्वा) अये ! कथमियं स्मृतिः । सखि ! दिष्ट्या चिरादागतासि ।

स्मृतिः—देव ! भवअदिं सिवभत्तिं उद्दिसिअ तुह एआरिसीं बलिअं उक्कण्ठं दिट्ठूण । (ख) (संस्कृतमाश्रित्य)

यातं देव मया जवेन महता तत्पुण्डरीकं पुरं
श्रद्धायै विनिवेदितं च भवदीयौत्कण्ठ्यमेतादृशम् ।
तां त्वद्विस्मृतिकोपितामिव मुहुः संप्रार्थ्य भक्तिं तयै-
वागत्यानुजिघृक्षसे ननु यथा श्रद्धा समाधात्तथा ॥१७॥

राजा—(सहर्षम्) कथमेतावदनुगृहीतः । अहो प्रसादातिशयो मयि भगवत्याः । कथय सखि ! किमत्रैवागमनानुग्रहं करिष्यति भगवती ।

स्मृतिः—अह इं । (क)

(ततः प्रविशति श्रद्धया सह भक्तिः)

भक्तिः—सखि श्रद्धे ! सहजनिःसङ्गनिर्मलस्वभावो-

(ख) देव ! भगवतीं शिवभक्तिमुद्दिश्य तवैतादृशीं बलवदुत्कण्ठां दृष्ट्वा ।

यातमित्यादि—हे देव ! मया महता जवेन तत्पुण्डरीकपुरं यातं च पुनरेतादृशं भवदीयमौत्कण्ठ्यं श्रद्धायै विनिवेदितं (मया प्रतिबोधितः) श्रद्धा च त्वया विस्मृत्या कोपितामिव तां भक्तिं मुहुः संप्रार्थ्य तथा समाधात् यथा तया भक्त्या एव (स्वयं) आगत्य अनुजिघृक्षसे ननु फलं ग्रहीतुमिष्टो भविष्यसीति भावः ॥ १७ ॥

(क) अथ किम् ।

सहजमित्यादि—सहजं स्वाभाविकं निःसङ्गं निर्मलः स्वभावो यस्य

---

(१) "पूज्येष्वनुरागो भक्तिः" इत्युमदेशः—"साचेश्वरे परानुरक्तिरूपा" इति शाण्डिल्यसूत्रम् । उपास्याकाराकारितचित्तवृत्त्यावृत्तिरूपा परिपक्वनिदिध्या-

ऽपि देवो जीवस्तथा सर्वपुमर्थप्रसवित्रीमपि मां विस्मृत्य बुद्धिपारवश्यमापन्नो विरसविषयाभिमुख एव संवृत्तः ।

श्रद्धा—अम्ब, देईए गुणमईए दुरच्चआए माआए कुडिलाए एसो अणादिसिद्धो सहावो जं विवेइणं वि पुरिसं मोहिअ विरसविसअप्पवणं करेइ । तह अ कहिदं अहिजुत्तेहिं । (ख) (संस्कृतमाश्रित्य) ।

जरठापि काचिदसती संदर्भ्य (गुणान्) गुणैः परस्य पुरुषस्य ।
सङ्गं विनैव हसितैः सर्वस्वं हन्ति किं ब्रूमः ॥ १८ ॥

सः । विरसाः परिणामे कटुस्वभावा ये विषया इन्द्रियार्थाः तदभिमुखस्तदासक्तः ।

(ख) अम्ब ! देव्या गुणमय्या दुरत्ययाया मायायाः कुटिलाया एषोऽनादिसिद्धः स्वभावो यद्विवेकिनमपि पुरुषं मोहयित्वा विरसविषयप्रवणं करोति । तथा च कथितमभियुक्तैः ।

जरठापीत्यादि—जरठा पुराणा अन्यत्र वृद्धा अपि काचिदसती असत्या (मिथ्येति भावः) अन्यत्र पुंश्चली, गुणैः सत्त्वादिभिरन्यत्र लावण्यादिभिः संदर्भ्य वशीकृत्य पुरुषमितिशेषः । परस्य पुरुषस्यात्मनोऽन्यत्र धनिकादेः, सङ्गमासक्तिं "असङ्गोऽयं पुरुष" इति श्रुतेः । अन्यत्र सम्भोगं विनैव सर्वस्वं नैर्गुण्यादिकमन्यत्र धनादिकं हरति । हन्त ! अतः परं किं ब्रूमः । मायया स्वगुणैर्बद्धः पुरुषो निर्गुणोऽपि सगुण इव प्रतीयते । इति भावः ॥ १८ ॥

सनाख्या श्रवणमननाभ्यासफलरूपा अनुरक्तिः" अर्थात् नहीष्टदेवात् परमस्ति किंचित् इति पूर्विका चित्तवृत्तिः । सा च भक्तिर्नवधा—तदुक्तं भागवते दशमस्कन्धे—

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ इति ।

(१) श्रद्धा नाम—वेदबोधितफलावश्यम्भावनिश्चयः "अर्थात् सच्छास्त्रप्रतिपादितेऽर्थे दृढप्रत्ययः" इति । प्रत्ययो धर्मकार्येषु तथा श्रद्धेत्युदाहृता । नास्ति ह्यश्रद्दधानस्य धर्मकृत्ये प्रयोजनम् इति स्मृतिः । "चेतसः प्रसादः" इति पातञ्जल-

भक्तिः—भवतु । अतस्तस्मिन्मम दृढः प्रेमातिशयः ।

सत्यज्ञाननिधिः सदैव सहजानन्दस्वभावोऽप्ययं
देवो बुद्धिवशं गतः पुरमिदं त्रातुं व्यवस्यत्यहो ।
अस्त्वेतद्व्यपयुक्तमात्मकलने तस्मान्निरस्तामयं
निश्चिन्तं पुनरीशतत्परममुं कुर्यामभीष्टाप्तये ॥ १६ ॥

श्रद्धा—जुज्जइ एदं णिरुपधिणिरवधिककरुणाए भअवदीए । ता एहि तं जेव्व अणुग्गहीदम् । (क)

राजा—अहो अमृतासारमयः कोऽप्यालापः कर्णविवरमाप्याययति । सखि ! किमागतवती भगवती ?

सत्यज्ञाननिधिरित्यादि—सत्यस्य त्रिकालाबाधितस्य ज्ञानस्य विवेकस्य निधिरिव निधिः, सदैव च सहजो नैसर्गिकः आनन्द एव स्वभावो यस्य सः (स्वभावात्सुखस्वरूप इति भावः) अपि अयं देवः जीवः बुद्धेः लौकिकबुद्धेः वशंगतः सन् इदं पुरं शरीररूपं पुरं त्रातुं रक्षितुं व्यवस्यति उद्युङ्क्ते । अहो आश्चर्यमस्तु एतत्, आत्मकलने अहं ब्रह्मास्मि इति विचारे व्यपयुक्तं विरतं तस्मात् पुरत्राणात् निरस्ताः आमयाः यस्य तं अपगतसकलरोगं, निर्गता चिन्ता यस्य तं मानसदुःखविरहितं, अमुं जीवं पुनः अभीष्टस्य अपवर्गस्याप्तये ईशतत्परं आत्मविवेकिनं कुर्याम् ॥ १६ ॥

(क) युज्यत एतन्निरुपधिनिरवधिकरुणाया भगवत्याः । तदेहि तमेवानुग्रहीतुम् ।

निरुपधिकेत्यादि—निरुपधिः अकारणः निरवधिः निस्सीमा च करुणा यस्याः ।

अमृतेत्यादि—अमृतस्य पीयूषस्य आसारः वृष्टिरेव, इति (स्वार्थे मयट्)

भाष्ये वेदव्यासः । सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत । श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः । इति श्रीमद्भगवद्गीता ।

स्मृतिः—को संदेहो। (ख)

राजा—(पुरोऽवलोक्य) अहो !

निरुपाधिकनिःसीमकरुणामृतवारिधिः।
दिष्ट्या दृष्टा भगवती पुमर्थघटनापटुः ॥ २० ॥

(उत्थाय सरभसं प्रत्युद्गच्छति। श्रद्धाभक्ती परिक्रम्योपसर्पतः। राजा साष्टाङ्गं प्रणमति)

भक्तिः—सकलाभीष्टभाजनं भूयाः।

श्रद्धा—जेदु जेदु देवो। (ग)

राजा—(उत्थाय) देवि निरुपधिककरुणानिधे ! अपराधिनमपि मामेवानुगृहीतवत्यसीति सकलमनोरथानामुपरि वर्तामहे।

अवने हि निरागसां जनानां भजतां जाग्रति दैवतान्तराणि।
अवनाद्विहितागसोऽपि मेऽस्तु प्रथितं ते निरुपाधि वत्सलत्वम् ॥ २१ ॥

(ख) कः संदेहः।

निरुपाधिकेत्यादि—निरुपाधिकस्य निर्व्याजस्य निस्सीमस्य निरवधिकस्य च, करुणैवामृतं तस्य, वारिधिरिव वारिधिः। पुमर्थानां चतुर्णां पुरुषार्थानां घटनायां सङ्गमने पटुः समर्था भगवती दिष्ट्या सौभाग्येन दृष्टासि ॥ २० ॥

(ग) जयतु जयतु देवः।

अवनेत्यादि—निर्गतो आगो येषां तेषां निरपराधानां भजतां उपासकानां जनानामवने रक्षणे हि अन्यानि दैवतानि जाग्रति जागरूकाणि वर्तन्ते। (किन्तु) विहितमागो येन तस्य कृतापराधस्यापि मे मम अवनात् रक्षणात् ते तव निरुपाधि निष्कारणं वत्सलत्वं वात्सल्यं प्रथितमस्तु ॥ २१ ॥

उक्तं चात्राभियुक्तैः—

प्रवहन्ती तु दया तव परिहृतनीचोच्चवस्तुवैषम्या ।
पततु मयि स्फुटमधुना पङ्गोरुपरीव गगनगङ्गोर्मिः ॥ २२ ॥

भक्तिः—देव ! भवान्मामनुसृत्य बलवदुत्कण्ठितः प्रकृतकार्यविमुखः संवृत्त इति श्रुत्वा तत्र भवन्तं सान्त्वयितुमागतास्मि । संप्रति विज्ञानमन्त्रिमतानुसारेणैव प्रकृतशत्रुविजयाय व्याप्रियस्व । तदनन्तरम्—

निर्जितनिखिलविपक्षं नीरुजमुरु सुस्थमपगतातङ्कम् ।
अहमागत्य विधास्ये परमानन्दाब्धिमाप्तकामं त्वाम् ॥२३॥

राजा—(सप्रश्रयम्) परमनुगृहीतोऽस्मि । इदं तु प्रार्थये—

या प्रीतिरविवेकानामिति न्यायात् सदा मम ।
हृदयान्मापसर्प त्वं प्रसीद करुणानिधे ! ॥ २४ ॥

प्रवहन्तीत्यादि—परिहृतं नीचानां निम्नानामुच्चानामुन्नतानां वस्तूनां वैषम्यं यया एवम्भूता, प्रवहन्ती प्रवाहरूपेण वर्तमाना तव तु दया पङ्गोरुपरि गगनगङ्गाया आकाशगङ्गायाः ऊर्मिः तरङ्गमाला इव अधुना मयि स्फुटं पततु ॥ २२ ॥

निर्जितेत्यादि—निर्जिताः पराभूताः निखिलाः समग्राः विपक्षाः शत्रवो येन तं, निर्गताः दूरीभूताः रुजः शरीरव्याधयो यस्य तं, अपगता आतङ्काः मानसदुःखानि यस्य तं, अत एव उरु भृशं सुस्थं स्वस्थप्रकृतिं त्वामहमागत्य उपस्थाय परमानन्दाब्धिं परमानन्दस्वरूपमाप्तकामं विधास्ये करिष्ये ॥ २३ ॥

या प्रीतिरित्यादि—या प्रीतिरविवेकानां विषयेष्वनपायिनी त्वामनुस्मरतः सा मे हृदयात् मापसर्पतु ॥

इति व्यासपद्यं हृदि निधाय प्रार्थयते । हे करुणानिधे ! या प्रीतिरविवेकानामिति न्यायात् अर्थात् उपर्युक्तव्यासवचनानुसारेण सदा मम हृदयात् त्वं मा अपसर्प, प्रसीद च ॥ २४ ॥

भक्तिः—तथा भवतु (स्मृतिं प्रति) अयि वत्से ! एतत्त्वदायत्तम् ।

स्मृतिः—भअवदि, अवहिदह्मि । (क)

भक्तिः—तथा भवतु । (इति निष्क्रान्ता)

राजा—(सोत्कण्ठम्) कथं गतवती भगवती । (स्मृतिं प्रति) सखि ! सर्वदा हृदि संनिहिता भव ।

स्मृतिः—तह । (ख) (इति निष्क्रान्ता)

(प्रविश्य)

दौवारिकः—देव ! एसो अमच्चो भुत्तवन्तेण विदूसएण अणुगदो आअच्छादि । (ग)

(ततः प्रविशति मन्त्री विदूषकश्च)

मन्त्री—भोः साधु भुक्तं भवता ?

विदूषकः—देवीए बुद्धीए साहु पडिवेसणं किदं जहमणोरहं उदरं पूरिअम् । (घ) (सहर्षं संस्कृतमाश्रित्य)

भूमौ साधु वितत्य गारुडमणिश्यामं कदल्या दलं
शाल्यन्नं घृतपक्वफाणितमथापूपैः सहात्रार्पितम् ।
धन्या एव हि सूपपायसमधु क्षीराज्यदध्यन्वितं
नाना शाकयुतं फलैश्च मधुरैरेवं सदा भुञ्जते ॥२५॥

(क) भगवति, अवहितास्मि ।

(ख) तथा ।

(ग) देव ! एषोऽमात्यो भुक्तवता विदूषकेणानुगत आगच्छति ।

(घ) देव्या बुद्ध्या साधु परिवेषणं कृतं यथामनोरथमुदरं पूरितम् ।

भूमौ साध्विति—स्पष्टम् ॥ २५ ॥

मन्त्री—भुक्तवतोऽप्येवमिहादरश्चेत्किमुत बुभुक्षितस्य ।

(राजानमुपसृत्य) विजयतां देवः । देवानुज्ञया सर्वेऽपि सामन्ता यथार्ह संभाविताः । अयमपि वटुराकण्ठमभीप्सिताभ्यवहार्येण भोजितो देव्या । तद्देवेनापि स्नानपूजनभोजनादिविधिर्निवर्त्यताम् ।

राजा—तर्ह्यत्रैवावस्थीयतां भवता । अहमपि प्रकृतमाह्निकं निर्वर्त्यागच्छामि । (इति दौवारिकेण सह निष्क्रान्तः)

(नेपथ्ये)

अभ्यक्तः स्नापिताङ्गः शुचिवसनधरो जप्यमन्त्राञ्जपित्वा
देवानभ्यर्च्य भक्त्या घुमघुमितवपुश्चन्दनैश्चन्द्रमिश्रैः ।
रज्यत्ताम्बूलपूर्णाननसरसिरुहो रम्यमारामभागं
साकं देव्यैष राजा प्रविशति सुलभो यत्र दोलाविहारः ॥ २६ ॥

मन्त्री—(आकर्ण्य) यत्र महाराजस्तिष्ठति तत्रैव गच्छामः ।

(इति विदूषकेण सह परिक्रामति)

(ततः प्रविशति देव्या सह राजा)

राजा—देवि ! पश्य पश्य रामणीयकमारामस्य ।

क्रीडच्चिक्रीडदन्तक्षतविवरगलन्नारिकेलाम्बुधारा

अभ्यक्त इत्यादि—अभ्यक्तः सुरभितैलेनकृताभ्यङ्गः स्नापिताङ्गः कृतमज्जनः शुचिवसनधरः परिधृतशुक्लवासाः जप्यमन्त्रान्सावित्रीप्रभृतीञ्जपित्वा, देवान् शिवप्रभृतीन् भक्त्या अभ्यर्च्य, चन्द्रः कर्पूरस्तेनमिश्रैरन्वितैश्चन्दनपङ्कैर्विच्छित्तिविशेषेण लाञ्छितशरीरप्रदेशैः घुमघुमितवपुश्चर्चितशरीरः, रज्यत् प्राप्तारुणभावं ताम्बूलं तेन पूर्णमाननसरसिरुहं यस्य स एष राजा देव्या महिष्या साकं रम्यमारामभागं प्रविशति, यत्र दोलाविहार आन्दोलनक्रीडा सुलभः । इति ॥ २६ ॥

क्रीडच्चिक्रीडेत्यादि—क्रीडन् यश्चिक्रीडः काष्ठकुट्टको नाम पक्षि-

---

(१) काष्ठकुट्टकः पक्षी "खाती चिडा" इति लोके प्रसिद्धः ।

संपूर्णावालपुष्यत्फल-ङुहुकदलीदाडिमीमातुलुङ्गा ।
संपुष्यत्पूगपालीपरिमलमिलितोत्फुल्लमालत्युदञ्च-
त्सौरभ्योच्छ्रायलभ्यश्रमशमपथिका सेयमारामसीमा ॥२७॥

देवी—मलअपवणचलिदतरुलदापुप्फगन्धा दिसासु विसप्पन्ति । इदो तदो परिब्भमन्तो भमराः कलं कूजन्दि । (क)

राजा—युक्तमाह भवती—

कुरबककलिका विलोकमाने तरुणपिके मृदु गायति द्विरेफे ।
नटति किल मुहुः कृतोपदेशा मलयमहीध्रभवेन मारुतेन॥ २८॥

देवि ! सर्वतश्चारय चारुसरोरुहदलस्मयमुषी चक्षुषी ।

विशेषस्तस्य दन्तक्षतेन[1] यो विवरस्तस्माद्गलन्ती या नारिकेलाम्बुधारा तया सम्पूर्णा आवाला आलवाला येषामत एव पुष्यत्फलाः संजातफलपुष्पाः ङुहुर्लकुचः कदली च दाडिमी च मातुलुङ्गश्च ते यस्यां सा तथा संपुष्यन्ती विकसन्ती या पूगपाली क्रमुकतरुश्रेणिस्तस्याः परिमलेन मिलितं यत्, उत्फुल्लमालत्या उदञ्चद्विसर्पत् सौरभ्यं तस्योच्छ्रायेण लब्धुमर्हः लभ्यः श्रमशमो यैरेवम्भूताः पथिका यस्यां सा तथाभूता, इयमारामस्य सीमा प्रान्तभागः ॥ २७ ॥

(क) मलयपवनचलिततरुलतापुष्पगन्धा दिशासु विसर्पन्ति । इतस्ततः परिभ्रमन्तो भ्रमराः कलं कूजन्ति ।

कुरबकेत्यादि—तरुणश्चासौ पिकस्तस्मिन् पुंस्कोकिले विलोकमाने पश्यति सति, द्विरेफे भ्रमरे च मृदु मधुरं गायति सति मलयश्चासौ महीध्रः मलयपर्वतस्तत्र भवेन मारुतेन वायुना कृतोपदेशा अध्यापितलास्यरहस्या कुरुवकस्य सैरेयस्य कलिका मुहुः नटति नृत्यति किल ॥ २८ ॥

---

(१) चञ्चूपुटकोटिकृतप्रहारेणेति भावार्थः ।

कन्दर्पागममन्त्रपाठमुखरे पुंस्कोकिले कानन-
श्रीपाणिग्रहमङ्गले सति मधोर्देवस्य दीप्तौजसः ।
वह्नौ पाटलकान्तिपल्लवमये स्मेरप्रसूनोत्करः
प्रक्षिप्तस्य मतिं न किं वितनुते लाजव्रजस्याधुना ॥ २९ ॥
मन्दारबकुलचम्पककुरबकसहकारमञ्जरीलोलः ।
अलिनिकरः केलिश्लथवनलक्ष्मीकेशपाश इव लसति ॥ ३० ॥
देवी—पेक्खदु भवं । (क)
किअमाले टिट्टिभओ रसालरुक्खम्मि कोइलो वसइ ।
णीवविडवे सिहण्डी जम्बूसिहरे सुओ इक्को ॥ ३१ ॥

कन्दर्पागमेत्यादि—पुंस्कोकिले पिके कन्दर्पागमस्य कामशास्त्रस्य मन्त्रपाठेन मुखरे वाचाले सति, दीप्तमोजो यस्य तस्य महाप्रभावस्य मधोर्देवस्य वसन्तराजस्य, काननश्रिया वनलक्ष्म्याः पाणिग्रहमङ्गले सति, पाटला रक्तवर्णाकान्तिर्येषामेवम्भूता ये पल्लवाः तन्मये तद्रूपे वह्नौ (विवाहाग्नौ) स्मेरप्रसूनानामीषद्विकसितकुसुमानामुत्करः समूहः प्रक्षिप्तस्य लाजव्रजस्य अधुना मतिं न किं वितनुते । अर्थात् अरुणपल्लवेषु विकसितकुसुमसमूहो विवाहाग्नौ प्रक्षिप्तं लाजव्रजमनुकरोतीति भावः ॥ २९ ॥

मन्दारेत्यादि—मन्दारः स्वर्गीयपञ्चवृक्षान्तर्गतदेवतरुविशेषः शीतलच्छदो बकुलः केसरः चम्पकः [1]कदलीफलविशेषः कुरबकः सैरेयकः सहकारः अतिसौरभाम्रः तस्य मञ्जरीषु लोलः चञ्चलः अलीनां भ्रमराणां निकरः समूहः केलिषु श्लथः प्राप्तश्लैथिल्यभावः वनलक्ष्मीकेशपाश इव लसति शोभते ॥ ३० ॥

(क) पश्यतु भवान् ।

कृतमाले टिट्टिभको रसालवृक्षे कोकिलो वसति ।
नीपविटपे शिखण्डी जम्बूशिखरे शुक एकः ।

किअमालेत्यादि—स्पष्टम् ॥ ३१ ॥

---

(१) चम्पकस्य कदलीत्वे 'माणिक्यमर्त्यामृतचम्पकाद्या भेदाः कदल्या बहवोऽपि सन्ति' इति भावप्रकाशः ।

विदूषकः—(उपसृत्य) जेदु वअस्सो। देवि, सोत्थि भोदीए। (ख)

मन्त्री—देव ! विजयी भव। देवि ! जयतु भवती।

राजा—अत्र निषीदतु वयस्यः। इहास्यताममात्येन।

मन्त्री—(उपविश्य उद्यानभूमिमभितो विलोक्य) आश्चर्यमाश्चर्यम्।

इहोद्याने तादृक् पशुपतिदयासादितमहा—
महिम्नस्ते सेवारसपरवशाः सर्वत इमे।
यथास्वं पुष्यन्तो युगपदृतवः संनिदधते
प्रसङ्गादत्राहं कतिचन वदाम्यार्तवगुणान् ॥ ३२ ॥

राजा—अवहिताः शृणुमस्तावत् (पुरो विलोक्य) मन्त्रिन् ! पश्य पश्य।

स्फुटकुटजमन्दहासा कदम्बमुकुलाभिरामरोमाञ्चा।
नीलाम्बुदकुचविगलद्घनपुष्पा विहरतीव वनलक्ष्मीः ॥ ३३ ॥

(ख) जयतु वयस्यः। देवि ! स्वस्ति भवत्यै।

इहोद्यानेत्यादि—इह उद्याने तादृक् पशुपतेः शिवस्य दयया आसादितः अधिगतः महामहिमा प्रभावो येन तस्य ते तव, सेवारसस्य आराधनस्य परवशाः परतंत्राः यथास्वं यथोचितं पुष्यन्तः पुष्पिताः सन्तः इमे ऋतवः सर्वतश्चतुर्दिक्षु युगपत् सहैव संनिदधते संनिहिताः सन्ति। अत्राहं प्रसङ्गात् कतिचन आर्तवगुणान् ऋतुसम्बन्धिनो धर्मान् वदामि निर्दिशामीति भावः ॥ ३२ ॥

स्फुटकुटजेत्यादि—नीलाम्बुदा एव कुचौ ताभ्यां विगलन्ति घना एव पुष्पाणि यस्याः सा तथा। अत्र सजलजलधरस्य पयोधरत्वेनाम्बुशारदशुभ्राभ्रस्य पुष्पत्वेन निरूपणाद्रूपको नामालङ्कारः। स्फुटानि विकसितानि कुटजानि गिरिमल्लिकाकुसुमानि एव मन्दहासः स्मितं यस्याः। कदम्बमुकुला ईषद्विकसितनीपपुष्पाणि एव अभिरामो रमणीयः रोमाञ्चः रोमोद्गमः यस्य सः ॥ ३३ ॥

मन्त्री–राजन् ! तर्हि वर्षा एताः । पित्तसंचयोऽत्र भवति । एवं हि ऋतुचर्यां भिषजो भाषन्ते ।

राजा–कथमिव–

मन्त्री–शंसन्ति भाद्रपदमाश्वयुजं च वर्षा–

स्तास्वोषधिप्रचुरता सुदृशोऽल्पवीर्याः ।

वीर्यं प्रसन्नमसुमत्सु च शीतवाता–

विष्टेषु तत्र शिखिनोदयते विदाहः ॥ ३४ ॥

स एव पित्तसंचयमापादयति ।

राजा–शरदि कथम् ।

मन्त्री–

मासौ शरत्कार्तिकमार्गशीर्षौ तत्राभ्रकार्श्ये सति पङ्कशोषः ।

विलापितः पित्तचयोऽर्कभासा स पैत्तिकं व्याधिकुलं प्रसूते ॥ ३५ ॥

मन्त्री–

शंसन्ति भाद्रपदमाश्वयुजं च वर्षा–

स्तास्वौषधानि गतवीर्यरसानि च स्युः ।

देहेषु शीतपवनाकुलितेषु नृणां

मन्देन किञ्च शिखिनोदयते विदाहः ॥ ३४ ॥

शंसन्तीत्यादि—स्पष्टम् ॥ ३४ ॥

मासावित्यादि—कार्तिकश्च मार्गशीर्षश्च इति द्वौ मासौ शरदृतुर्भवति, तत्र अभ्राणां मेघानां कार्श्ये विरलभावे सति पङ्कशोषो जायते । किञ्च अर्कस्य सूर्यस्य भासा प्रतापेन स पित्तचयः पित्तस्य दोषविशेषस्य चयः संचयः विलापितः प्राप्तविलीनभावः (उद्रेचित इत्यर्थः) पैत्तिकं व्याधिकुलं रोगसमूहं प्रसूते करोति ॥ ३५ ॥

राजा—हेमन्ते कीदृशो रोगः ?

मन्त्री—श्रूयताम् ।

हेमन्तः पौषमाघाविह भवति बलं वीर्यमप्योषधीनां
स्निग्धाश्चापः प्रसन्ना भृशगरिमभृतो याः पिबन्त्यङ्गभाजः ।
मन्दांशुत्वाच्च भानोः सहिममरुदुपस्तम्भिताङ्गेषु देहि-
ष्वेषु स्नेहाद्विदग्धाद्भवति हिमभराच्छ्लेष्मणः संचयश्च ॥३६॥

राजा—कदा पुनरयं श्लैष्मिकान्व्याधीञ्जनयति ।

मन्त्री—फाल्गुनचैत्रमासरूपे वसन्ते यतोऽर्करश्मिप्रविलापितः श्लेष्मसंचयोऽस्मिन्नृतौ भवति । एवं च—

निःसारा रौक्ष्यभाजो दधति च लघुतामोषधीनां समूहाः
सर्वे ते ग्रीष्मसंज्ञां भजति किल ऋतौ ज्येष्ठवैशाखरूपे ।
तस्मिन्त्सूर्यप्रतापग्लापिततनुभृतां लाघवाच्चापि रौक्ष्या-
ज्जन्तूनां पीयमानं जनयति सलिलं संचयं मारुतस्य ॥३७॥

हेमन्त इत्यादि—पौषश्च माघश्च इति द्वौ मासौ हेमन्तनामा ऋतुर्भवति, इह हेमन्ते ओषधीनां वनस्पतीनां बलं गुणादिवीर्यं स्निग्धरूक्षादि च (अधिकम्) भवति । याश्चापः जलानि अङ्गभाजः शरीरिणः पिबन्ति ताः स्निग्धाः स्नेहगुणबहुलाः प्रसन्नाः निर्मलाः भृशं गरिमाणं बिभ्रतीति ताः अत्यन्तगुर्व्यः भवन्ति च, पुनः भानोः सूर्यस्य मन्दांशुत्वात् मन्दप्रतापत्वात् सहिमेन शिशिरेण मरुता वायुना उपस्तम्भितानि उपद्रुतानि अङ्गानि येषां तेषु, येषु पुरोवर्तिषु देहिषु शरीरिषु विदग्धात् नाम प्राप्तविदाहभावात् स्नेहात्, किञ्च हिमभरात् हिमाधिक्यात् श्लेष्मणः कफस्य संचयो भवति ॥ ३६ ॥

निःसारा इत्यादि—ज्येष्ठवैशाखरूपे ग्रीष्मसंज्ञां भजति सति तस्मिन्नृतौ सर्वे ते ओषधीनां समूहाः निःसाराः स्थिरांशरहिताः रौक्ष्यभाजः अतिरूक्षाः लघुतां लाघवं च दधति, किञ्च सूर्यस्य प्रतापेन

स संचयः प्रावृषि शीतवातवर्षैरीरितो वातिकरोगकारी ।
क्लिन्नाङ्गभाजां पयसैव नित्यं प्रकोपहेतुस्त्रयसंचयस्य ॥३८॥

राजा—कौ मासौ प्रावृट् ?

मन्त्री—आषाढश्रावणौ तथा भिषग्भिरुच्यते ।

राजा—कदा पुनरेषामुपशमः ?

मन्त्री—सोऽप्येतेषां ज्ञातव्य एव स्वामिना । तद्यथा—

हैमन्ते किल पैत्तिकामयशमो ग्रीष्मे कफोद्यद्रुजः
शान्तिर्वातिकरोगशान्तिरुदयेद्वर्षात्यये केवलम् ।
एवं षडृतुषु स्वभावजतया व्याख्यायि तुभ्यं मया
पित्तश्लेष्मनभस्वतां सह चयेनापि प्रकोपः शमः ॥३९॥

अपि च—

संतापेन ग्लपिताः म्लानाः तनूः शरीराणि बिभ्रतीति तेषां जन्तूनां प्राणिनां पीयमानं सलिलं जलं लाघवादपि च रौक्ष्यात् मारुतस्य वायोः संचयं जनयति ॥ ३७ ॥

स संचय इत्यादि—स मारुतस्य संचयः प्रावृषि प्रावृट्काले शीतवातैः वर्षादिभिश्च ईरितः प्रकोपितः वातिकरोगकारी वातसम्बधिरोगान्करोतीत्यर्थः । किञ्च पयसा जलेन क्लिन्नाङ्गभाजां क्लिन्नशरीरिणां प्राणिनां त्रयस्य वातपित्तश्लेष्मत्रिकस्य सम्बन्धिनः संचयस्य नित्यप्रकोपहेतुरेव भवति ॥ ३८ ॥

हैमन्ते किलेत्यादि—किल इति निश्चयेन हैमन्ते पैत्तिकानामामयानां शमः उदयेत्, कफेन उद्यतः उद्भूतायाः रुजः रोगस्य ग्रीष्मे शान्तिः उदयेत, केवलं वर्षात्यये शरदि वातिकानां रोगाणां शान्तिः शमः उदयेत । एवं षडृतुषु पित्तश्लेष्मनभस्वतां स्वभावजतया स्वभावेन चयेन सह प्रकोपः, अपि च शमो मया तुभ्यं व्याख्यायि ॥३९॥

रजनीमुखार्धरात्रप्रत्यूषा नक्तमहनि पूर्वाह्णः ।
मध्याह्नोऽप्यपराह्णो वर्षाद्याः षट् प्रकीर्तिता ऋतवः ॥ ४० ॥

एष्वपि पित्तश्लेष्मवातानां संचयप्रकोपशमाः प्राग्वदेव ज्ञातव्याः ।

राजा—अस्त्वेतत् । दौवारिक ! आन्तःपुरिकं जनं प्रवेशय ।

विदूषकः—किं उक्कण्ठिदो भवं दोलाविहारस्स । (क)

राजा—स्मारितं भवता । तथैव क्रियते । मन्त्रिविन्यस्तसमस्तकार्यभरस्य मम विहारादृते कोऽन्यो व्यापारः ।

मन्त्री—देव्या सह दोलामधिरोहतु महाराजः । दौवारिक ! पद्ममुखीं चन्द्रमुखीं च चेटीमानय ।

दौवारिकः—तथा । (इति निष्क्रम्य चेटीभ्यां सह प्रविशति)

(राजा देवी च दोलाधिरोहणं नाटयतः)

मन्त्री—(चेट्यौ प्रति) गायन्त्यौ दोलयतं भवत्यौ ।

रजनीत्यादि—साम्वत्सरिकं विधिं दिनेऽपि अतिदिशति । नक्तं रात्रौ अहनि दिवसे अर्थादेकस्मिन्नपि अहोरात्रे रजनीमुखं प्रदोषकालः अर्धरात्रः निशीथः प्रत्यूषःउषःकालः पूर्वाह्णः मध्याह्नः अपराह्ण इति एते षड्भागा वर्षाद्याः षड्तवः प्रकीर्तिताः । तथा च सुश्रुतः—तत्र पूर्वाह्णे वसन्तस्य लिङ्गं, मध्याह्ने ग्रीष्मस्य, अपराह्णे प्रावृषः, प्रदोषे वार्षिकं, शारदमर्धरात्रे, प्रत्युषसि हैमन्तमुपलक्षयेत् । एवमहोरात्रमपि वर्षमिव शीतोष्णवर्षलक्षणं दोषोपचयप्रकोपोपशमैर्जानीयात् ॥४०॥

(क) किमुत्कण्ठितो भवान्दोलाविहाराय ।

प्रथमा—

(क) जअइ मुहुतुन्दिरगुणो सुरहिसरो महुरकम्मुओ वीरो ।
जस्स खु वि जअपताआ सामारुणवामदक्खिणावअवा ॥४१॥

विदूषकः–(सकोपम्) आः दासीए पुत्ति ! वालिसा क्खु तुमं । जइ अत्थबोधो ण होदि तह पाढिदम् । (ख)

राजा–वयस्य ! जयति भ्रमरगुणः पुष्पबाण इक्षुचापो मन्मथः यस्यार्धनारीश्वररूपा विजयपताकेति पद्यार्थः ।

विदूषकः–(सशिरः कम्पम्) जुज्जइ । (ग)

(क) जयति मधुतुन्दिलगुणः सुरभिशरो मधुरकार्मुको वीरः ।
यस्य खल्वपि जयपताका श्यामारुणवामदक्षिणावयवाः ॥

जयतीत्यादि—प्राकृतस्य—श्यामारुणयोर्गौरीरुद्रयोः ये वामा दक्षिणाश्चावयवाः संहता इति भावः । यस्य मन्मथस्य जयपताका खलु इति योजनीयम् । अत्र च श्यामाशब्देन भगवती गौरी अरुण-शब्देन च भगवान् रुद्रो गृहीतव्यः । तत्र श्यामालक्षणं भट्टिकाव्य-टीकायां—शीते सुखोष्णसर्वाङ्गी ग्रीष्मे च सुखशीतला । तप्तकाञ्चन-वर्णाभा सा स्त्री श्यामेति कथ्यते ॥ इति । रुद्रस्य चाग्निमूर्तित्वेनारुणत्वं कल्पनीयम् । अग्निमूर्तित्वे प्रमाणन्तु—"रुद्राय अग्निमूर्तये नमः" इति शिवपूजापद्धतिः । अर्धनारीश्वरविग्रहे हि वामाः शरीरार्धवयवा गौर्याः दक्षिणशरीरावयवाश्च रुद्रस्य इति प्रसिद्धम् । केचित्तु—श्यामारुणो नीललोहितः (शंकर इत्यर्थः) तस्य वामदक्षिणावयवाः पार्वतीपरमे-श्वररूपाः, इति वदन्ति ॥ ४१ ॥

(ख) आः दास्याः पुत्रि, बालिशा खलु त्वम् । यथार्थबोधो न भवति तथा पठितम् ।

(ग) युज्यते ।

द्वितीया—

(घ) कैरवणिद्दाभङ्गे चओरतिह्णाणिवारणे अ पडु ।

सो को वि जअउ देवो पेक्खन्तणिडालपुरुसमौलिमणी ॥४२॥

विदूषकः—एदस्स पज्जस्स अत्थो वण्णीअदि । (क)

राजा—कथमिव ।

विदूषकः—कैरवविआसआरी चकोरतित्तिआरी भअवं तस्स तिणेत्तस्स सिहामणी चन्दो जअइ त्ति । (ख)

मन्त्री—सम्यगुक्तः पद्यार्थो भवता ।

विदूषकः—(सगर्वम्) पुव्वपज्जस वि मह अत्थबोधो जादो जेव्व । वअस्सेण अत्थो वण्णीअदि णवेति तुह्णिं ठिदम् । (ग)

मन्त्री—(विहस्य) कः सन्देहः ।

विदूषकः—अमच्च ! किं उवहससि मं । एदं सुणादु भवं । धरणीए वि अ मह घरणीए अनक्खराए वाआए वि मह अत्थबोधो होइ । (घ)

(घ) कैरवनिद्राभङ्गे चकोरतृष्णानिवारणे च पटुः ।

स कोऽपि जयति देवः पश्यन्निटालपुरुषमौलिमणिः ॥

कैरवेत्यादि—स्पष्टम् ॥ ४२ ॥

(क) एतस्य पद्यस्यार्थो वर्ण्यते ।

(ख) कैरवविकासकारी चकोरतृप्तिकारी भगवान् तस्य त्रिनेत्रस्य शिखामणिश्चन्द्रो जयतीति ।

(ग) पूर्वपद्यस्यापि ममार्थबोधो जात एव । वयस्येनार्थो वर्ण्यते न वेति तूष्णीं स्थितम् ।

(घ) अमात्य ! किमुपहससि माम् । एतच्छृणोतु भवान् । धरण्या[1] इव मम गृहिण्या अनक्षराया वाचाया अपि ममार्थबोधो भवति ।

---

(१) धरण्या धरणीनामिकायाः मम गृहिण्या इव अनक्षराया वाचाया अपि मम अर्थबोधो भवतीत्यन्वयः ।

(सर्वे हसन्ति)

(नेपथ्ये)

वैतालिकः—

गन्धेन स्फुटकैरवाकरभुवा विष्वग्विकर्षन्नली-
स्वच्छन्दं दिवसावसानपिशुनो मन्दानिलः स्पन्दते ।
भावी नौ विरहाधिरित्यविदितेऽप्यन्तः शुचा स्थीयते
कोकेन प्रियया सहैकनलिनीनालाधिरूढेन च ॥ ४३ ॥

द्वितीयः—

मोक्तुं तापमिव प्रतीचिजलधौ मज्जत्ययं भानुमा-
न्रागः कोपि विजृम्भते घनपथे चित्ते वधूनामपि ।
आर्द्रागाः कुपितामुपासिसिषते कान्तां विलासी जनो
भक्त्या कर्मठभूमिदेवपरिषत्संध्यां च सायन्तनीम् ॥४४॥

गन्धेनेत्यादि—स्फुटकैरवाकरभुवा विकसितकुमुदसंभूतेन गन्धेन विष्वक् समन्तात् अलीन् भ्रमरान् विकर्षन् आकर्षन् दिवसावसानपिशुनः सायङ्कालसूचको मन्दानिलो मन्दमारुतः स्वच्छन्दं स्पन्दते । तथा नौ "आवयोः" विरहाधिः विरहरूपा मानसी—व्यथा भावी भविष्यति, इति अविदितेऽपि अज्ञातेऽपि अन्तः शुचा तथा प्रियया भार्यया सह एकनलिनीनालमधिरूढेन कोकेन स्थीयते ॥४३॥

मोक्तुमित्यादि—अयं भानुमान् सूर्यस्तापमातपं दाहं च मोक्तुमिव प्रतीचिजलधौ पश्चिमसमुद्रे मज्जति । ततः कोऽपि अवाच्यसुषमो रागोऽरुणिमा प्रेम च घनपथे मेघमार्गेऽम्बरे वधूनां प्रेयसीनां चित्ते च विजृम्भते प्रकाशते । तथा आर्द्रमागोऽपराधो यस्यासौ कृतनवीनापराधो विलासी जनः कुपितां कान्तां प्रेयसीमुपासिसिषते सम्मानयितुमिच्छति । कर्मठभूमिदेवानां परिषत् कर्मण्यद्विजसभा सायन्तनीम् सन्ध्यां भक्त्या उपासिसिषते उपासितुमिच्छति ॥ ४४ ॥

मन्त्री–अहमपि संध्योपासनार्थं गच्छामि ।

विदूषकः–अहं वि । (क)

राजा–अहमप्यन्तःपुरमेव गच्छामि ।

(इति निष्क्रान्ताः सर्वे)

इति चतुर्थोऽङ्कः ।

(क) अहमपि ।

इति श्रीजीवानन्दरसायने संक्षिप्तटिप्पणे
चतुर्थोऽङ्कः ॥

पंचमोऽङ्कः ।

(ततः प्रविशति धावन्मत्सरः)

मत्सरः—(विचिन्त्य)

जीवे साधयितुं रसं पशुपतेर्ध्यानस्य सिद्धौ स्थिते
तद्विघ्नाचरणाय षट् प्रणिहिताः कामादयः पाण्डुना ।
ते गत्वाऽपि वयं परैरभिभवं प्राप्ता यथा पूर्वजाः
पञ्चापि व्यगलन्नहं च चकितः षष्ठः पलाय्यागतः ॥ १ ॥

इतः परं किं करोमि मन्दभाग्यः ।

किं पाण्डोर्निकटं व्रजामि धृतिमानेवं कृते भ्रातृभि–
स्तस्याग्रे कथमस्तकार्यनिकरः सन्दर्शयिष्ये मुखम् ।
राजानं यदि वानुवर्त्तितुमये किं राज्यतन्त्रेऽमुना
पृष्टे चोत्तरयामि हन्त शरणं कं वा करिष्येऽधुना ॥ २ ॥

---

(१) मत्सरो नाम—अन्यशुभद्वेषः ।

जीवे साधयितुमित्यादि—रसं साधयितुं पशुपतेर्ध्यानस्य सिद्धौ जीवे स्थिते सति तद्विघ्नाचरणाय पाण्डुना षट् कामादयः प्रणिहिताः । ते वयं गत्वाऽपि परैरभिभवं प्राप्ताः । पूर्वजा अग्रजाः कामादयः पञ्च यथा येन येनप्रकारेण (अत्र यथाशब्दो: वीप्सायां प्रकारे च) व्यगलन् शत्रुकृतां दुरवस्थामन्वभूवन् (तथेति अध्याहार्यम्) अहञ्च षष्ठः (मत्सरः) चकितः उद्विग्नः सन् पलाय्यागतः ॥ १ ॥

किं पाण्डोर्निकटमित्यादि—एवं कृते भ्रातृभिः धृतिमान् धृष्टः पाण्डोर्निकटं व्रजामि किं, किन्तु अस्तकार्यनिकरः अस्तः विनष्टः कार्याणां निकरस्समूहो यस्य (विनष्टसकलकार्योऽहमिति भावः) कथं

तत्सर्वथा नास्ति दैवानुकूल्यम् । (विचिन्त्य) भवतु । वनमेव गत्वा तपश्चरणेनात्मानं कृतार्थयामि । यतः—

अश्रान्तप्रवहत्तुषारतटिनीशीतालुशातोदरी—
संघायासगृहीतशोषितसमित्संवर्धिताग्नित्रयाः ।
प्रालेयाचलकाननोटजगता विप्रास्तृतीयाश्रमे
स्थित्वापुः कति वाञ्छितानि तपसां नाश्चर्यया चर्यया ॥३॥

(पुरो विलोक्य)

समन्तादालोके सवितुरुपगच्छत्युपशमं
गुरोर्दिष्ट्या लब्धे महत इव सेवापरिचये ।

तस्याग्रे मुखं सन्दर्शयिष्ये । किं राजानं यदमाणमनुवर्तितुमये गच्छामि, अमुना राज्ञा राज्यतन्त्रे राजकार्ये पृष्टे किञ्चोत्तरयामि हन्त ! अधुना कं वा शरणं करिष्ये ॥ २ ॥

अश्रान्तप्रवहत्तुषारेत्यादि—अश्रान्तमनवरतं प्रवहन्ती या तुषारतटिनी भागीरथी तया शीतालुः शीतपरीतो यः शातोदरीसंघः कृशोदरी समूहस्तेनायासेन श्रमपूर्वं गृहीताः शोषिताश्च याः समिधस्ताभिः संवर्धितमुद्दीपितम् (रक्षितमित्यर्थः) अग्नित्रयं दक्षिणाग्निगार्हपत्याहवनीयरूपं येषामेवम्भूताः, प्रालेयाचलस्य हिमगिरेः संबन्धि यत्काननं तस्मिन् य उटजाः पर्णशालास्तत्र गता विप्रास्तृतीयाश्रमे वानप्रस्थाश्रमे स्थित्वा आश्चर्यया तपसां चर्यया कति वाञ्छितानि नापुः ? अपि तु सर्वाण्येव लेभिरे इति भावः ॥ ३ ॥

समन्तादित्यादि—दिष्ट्या प्रारब्धभोगेन यथाकथञ्चित् लब्धे महतो गुरोः सेवापरिचये इव (अत्र खलानामिति पदमाकृष्यते तेन यथा खलेषु संक्रान्तोऽपि गुरूपदेशः परिस्खलति इति भावः) सावितुरालोके समन्तात् सर्वतोभावेनोपशममुपगच्छति सति "अस्तमिते भास्कर इति यावत्" तमोऽन्धकारोऽज्ञानं च सर्वामुर्वीं भुवं खलानां मतिमिव स्थगयति आच्छादयति मोहयति च । तस्मादस्यामु-

तमः सर्वामुर्वीं स्थगयति खलानामिव मतिं
तदस्यामत्यर्थं न भवति विवेकः सदसतोः ॥ ४ ॥

तथापि पश्यतो मम द्वावपि पुरुषौ गृह्येते। (कतिचित्पदानि गत्वा निपुणं निरूप्य) हन्त स किंकरः कुष्ठोऽयमागच्छति। स्वजनेनाप्यनेनाहमिदानीं संभाषणाय जिह्रेमि। तदस्य दर्शनं परिहरणीयम्। मार्गोऽपि न दृश्यते निलीय गन्तुम्। भवत्वत्रैव स्थाणुतामवलम्ब्य तिष्ठामि। गते चैतस्मिंस्त्वरितपदं व्रजेयम्। (इति तथा स्थितः)

(ततः प्रविशति किंकरेणानुगम्यमानः कुष्ठः)

कुष्ठः–(सदृष्टिक्षेपम्) किमिदं दृश्यते पश्य।

किंकरः–(सान्द्रे तमसि न्यञ्चितपूर्वकायः पश्यन्)

पश्यामि न करचरणं न चात्र पश्यामि चलनमपि किंचित्।
वैशिष्ट्यमूर्ध्वतायाः पश्यामि स्थाणुरयमतो भवति ॥ ५ ॥

कुष्ठः–भद्र ! वदन्ति खल्वेवं नीतिशास्त्रविदः।

र्व्यां खलमतौ च सदसतोर्विद्यमानाविद्यमानयोः कर्तव्याकर्तव्ययोश्च विवेकः परिज्ञानं न भवति ॥ ४ ॥

(१) कुष्णाति शरीरस्थशोणितं विकुरुते। निष्कर्षार्थकस्य कुष् धातोरत्र विकारार्थत्वं बोध्यते धातूनामनेकार्थत्वात्।

(कुष् निष्कर्षे+ "हनिकुषीति" उणा० २।२। इति क्थन्।

(२) न्यञ्चितः तिर्यक्कृतः पूर्वः कायो येन।

पश्यामीत्यादि—स्पष्टम् ॥ ५ ॥

आक्रान्ते रिपुभिः पुरेऽन्नसलिलादीनामभावाद्बहि-
स्तानानेतुमशब्दकल्पितपदन्यासास्तमस्यागताः ।
संप्राप्ते सति सन्निधिं परजने द्राग्बिभ्रतः स्थाणुतां
लीनत्वं दधतोऽथवाधिसरणि स्वं साधयन्तीप्सितम् ॥६॥

अतः सम्यङ्निरूपय ।

किंकरो गत्वा मत्सरं हस्ते गृह्णाति)

मत्सरः—(स्वगतम्) मम खलु माशब्दकीयमवस्था संप्राप्ता। यद्यहं शब्दं कुर्यां ततः स्वरेण मां जानीयुरतोऽविकटं प्रविष्टेन मालिम्लुचेन गृहीत उरभ्र इव तूष्णीमासिष्ये (इति हस्तं धुनोति)

किंकरः—चोर ! दृढं गृहीतोऽसि । वृथा ते हस्तधूननम् । (कुष्ठं प्रति) आवुक ! पुरुषः पुरुषः । गृहीत एष दृढं मया ।

आक्रान्त-इत्यादि—रिपुभिः पुरे आक्रान्ते अवरुद्धे सति अन्नसलिलादीनां भक्ष्यपेयसाधनानामावश्यकवस्तूनामभावात् तान्यन्नादीनि बहिः (बाह्यस्थानात्) नगरान्तरादिति भावः आनेतुमशब्दकल्पितपदन्यासः अशब्दं तूष्णीं कल्पितः पदन्यासो यैस्ते एवम्भूता राजानुचरा तमसि घनान्धकारे आगता उन्निर्गता भवन्ति । किन्तु परजने विपक्षराजस्य किंकरे सन्निधिं सामीप्यं संप्राप्ते सति द्राक् आशु स्थाणुतां बिभ्रतः अथवा अधिसरणि मार्गे लीनत्वं दधतः (तिरोहिताः सन्तः) स्वाभीप्सितमावश्यकसामग्रीप्रापणादि साधयन्तीति योजना ॥ ६ ॥

(१) मा शब्दो विधेयो यस्यामर्थात् यस्यामवस्थायां शब्दादुच्चारणमनर्थावहं भवेत् सावस्था—इति भावः ।

(२) अवीनां कटं मेषशालामित्यर्थः ।

(३) मलिम्लुचेन वृकेन ।

(४) उरभ्रो मेषः ।

(५) आवुक ! अवति रक्षतीति "नाट्योक्तौ पिता" इत्यमरः ।

कुष्ठः—सफलो मे तर्कः । दृढबद्धमेनमत्रैवानय ।

किंकरः—एहि रे चोर ! एहि । रक्तकरवीरमालामामुच्य कण्ठे त्वां संभावयामि । अहो तव तपःप्रभावः । गङ्गाचन्द्रादिपरिकरं विना शूली भविष्यसि ।

मत्सरः—(स्वगतम्)

दग्धो मनोरथो मे बत चिन्तितमन्यदापतितम् ।
(हर्षमभिनीय)
मोक्ष्याम्यथवा शोकाद्देहवियोगेन भाविना दैवात् ॥ ७ ॥

(किंकरो बलान्मत्सरमाकृष्य कुष्ठनिकटं गमयति)

कुष्ठः—भद्र ! दीपिकासमीपमानय क एष इति पश्यामि । साधारणश्चेन्मोक्ष्याम एनम् ।

किंकरः—आर्य ! ज्ञातचर इव दृश्यते । (इति दीपिकासमीपमानयति)

कुष्ठः—(निरूप्य) अहो रूपमिदं मत्सरस्येव लक्ष्यते, वेषस्तु कापालिकस्य । तथा हि—

---

(१) सोल्लुण्ठवचनमेतत् ।

(२) शूली शिवः, पक्षे शूलमारोपितः ।

मोक्ष्यामीत्यादि—बत इति खेदे, मे मनोरथः एवमेवं करिष्यामीत्यादि दग्धो नष्टः । अन्यच्चिन्तितमन्यच्चापतितमथवा शोकाद्दैवात् वा हेतोः भाविनः देहवियोगेन मोक्ष्यामि मुक्तो भविष्यामि ॥ ७ ॥

(३) पूर्वं ज्ञात इति ज्ञातचरः ।

भस्मानुलेपधवलीकृतसर्वगात्रः
श्वेतां वहञ्छिरसि नारकपालमालाम् ।
एकेन शूलमितरेण दधत्कपालं
हस्तेन तिष्ठति पुरो मृगचर्मवासाः ॥ ८ ॥

भवतु । एनं संबोधयामि । सखे ! कीदृशीयमवस्था ते संप्राप्ता ।

मत्सरः—(आत्मगतम्) हन्त, ज्ञातोऽस्म्यनेन मन्दभाग्यः । ज्ञातस्याधुना ममात्मापलापोऽनुचितः । (प्रकाशम्) तस्यैवेयं दशा दैवहतकस्य ।

कुष्ठः—सखे मत्सर ! कथं गृहीता भवता कापालिकता पिशाचिका ।

मत्सरः—सखे ! सत्यमाह भवान् कापालिकता पिशाचीति । या खलु मामाकृष्य मरणसुखादुरवस्थामिमां प्रापितवती ।

कुष्ठः—सुखं मरणमप्येवंविधं तव भविष्यति ।
संगतिः स्वजनेनापि कथं तद्दुर्दशा परम् ॥ ९ ॥

(मत्सरस्तूष्णीमधोमुखस्तिष्ठति)

कुष्ठः—सखे ! न वदसि किमुत्तरं कथं मे कथय कथयितुं क्षमं यदि तवेदम् ।
श्रुत्वा विचारयिष्ये त्रपया चालं भिया चालम् ॥१०॥

मत्सरः—सखे ! मम किमुपरोधेन । किमन्यद्वनगमनादृते कर्तव्यम् ।

भस्मानुलेप इत्यादि—नराणां नरसम्बन्धिनां कपालानां करोटीनां मालामिति । मृगचर्मैव वासो यस्य । शेषं स्पष्टम् ॥ ८ ॥

सुखमित्यादि—स्पष्टम् ॥ ९ ॥

न वदसीत्यादि—सुगमम् ॥ १० ॥

कुष्ठः– कापालिकताद्य कुतः कुतस्तरां ते वने गमनम् ।

मत्सरः–सख्युपरोधेऽरिकृते सर्वं संभाव्यतेऽभिमानजुषाम् ॥११॥

कुष्ठः–किं शत्रुषूपजापार्थं प्रवृत्ताः सखायस्ते निरुद्धाः ?

मत्सरः–अथ किम् ।

कुष्ठः–कथय कीदृशो वृत्तान्तः ?

मत्सरः–(स्वगतम्)

कथयामि किं रहस्यं पर्यालोचितममात्यवर्येण ।
(क) उपजापस्य कथं वा जातामाकाशचित्रतामरिषु ॥ १२ ॥
अथवा तपसितुमिच्छन् सख्युः कुष्ठस्य गोपयामि यदि ।
तद्द्रोहस्य न किं स्यादास्थानाय स्वहस्तदानमिदम् ॥१३॥

अतः सर्वमस्मै निवेदयामि । यदयमपि तस्य पाण्डोर्विश्वासस्थानमेवेति । (प्रकाशम्) सखे ! तवाप्यकथनीयं नाम किमस्ति ? श्रूयताम्–

विज्ञानप्रहितेन राजहतकेनास्मन्निसर्गद्विषो
यावत्साधयितुं रसं कथमपि ध्यानस्य सिद्ध्या क्रमात् ।

कापालिकेत्यादि—अरिभिः शत्रुभिः कृते सखीनां कामादीनामुपरोधे निग्रहे सति । अभिमानजुषां मानिनामिति । शेषं स्पष्टम् ॥११॥

कथयामि किमित्यादि—अरिषु शत्रुविषये प्रयुक्तस्योपजापस्य भेदस्य जातामाकाशचित्रतां निरर्थकतां कथं वा कथयामीत्यादि सुगमम् ॥ १२ ॥

अथवा तपसितुमित्यादि—तद्द्रोहस्य मित्रद्रोहस्य स्थानाय स्थितये इदं स्वहस्तदानं न किं स्यादित्यन्वयः । शेषं सरलम् ॥ १३ ॥

विज्ञानप्रहितेनेत्यादि—विज्ञानप्रहितेन विज्ञाननाम्ना मन्त्रिणा प्रेरितेन स्वच्छन्देन राजहतकेन जीवराजेन अस्माकं निसर्गद्विषः स्वभाव-

स्वच्छन्देन च पुण्डरीकनगरीं गत्वा मनोद्वारतः
साम्बस्यैव महेश्वरस्य दृढया भक्त्या प्रसादात्स्थितम् ॥१४॥

तदिदमाकर्ण्य मन्त्रिणा पाण्डुना एतस्य विघ्नाचरणं मनसः पारतन्त्र्यं विना नोपपद्यत इति तदर्थं कामादयः षडेव प्रभवन्तीति त एव वयं प्रेषिताः। अस्माभिश्च तत्र सखिस्नेहवशादङ्गीकृतं मनसः पारतन्त्र्यकरणम्।

कुष्ठः—ततस्ततः।

मत्सरः—ततश्च तेष्वहमेको मन्दभाग्य इमां दुरवस्थामनुभवामि।

कुष्ठः—अथ कामस्य कावस्था?

मत्सरः—सखे! कथयामि मन्त्रिहतकस्य दुर्बुद्धिविलसितम्।

श्रुत्वा पित्तकफात्मपङ्गुयुगलस्पष्टोपजापं तथा
हृद्रोगस्य विमोचनं च सचिवः स्वार्त्तिकराद्विस्मितः।

(आकाशे लक्ष्यं बद्ध्वा)

शत्रोः, ध्यानस्य समाधेः क्रमात् सिद्ध्या रसं पारदं कथमपि साधयितुं मनोद्वारतः पुण्डरीकनगरीं हृद्दहर—प्रदेशं गत्वा साम्बस्य उमया सहितस्य महेश्वरस्य प्रसादात् दृढ़या स्थिरया भक्त्या एव स्थितम्॥ १४॥

(१) कामो नाम—कामस्तु विषयातिसक्तचेतसोः स्त्रीपुंसयोर्निरतिशयसुखस्पर्शविशेषः। परिवारस्त्वस्य यावदिह रम्यमुज्वलं च फलं पुनः परमाह्लादनम्। परस्परविमर्दजन्यस्मर्यमाणमधुरम्, उदीरिताभिमानमनुत्तमसुखमपरोक्षं स्वसंवेद्यमेव। इति दण्डी।

श्रुत्वेत्यादि—पित्तकफरूपात् पङ्गुयुगलात् स्पष्टं निर्भिन्नमुपजापं (राज्ञः पुण्डरीकनगरप्राप्तिं) तथा हृद्रोगस्य विमोचनञ्च स्वार्त्तिकरात् श्रुत्वा विस्मितः चकितः सचिवः विज्ञानशर्मा इति अब्रवीत्

पाण्डो ! साधु भवान्यदेव परमेशाराधने साधनं
चेतः स्थैर्यवदुद्यतस्तदरिणा तद्भेत्तुमित्यब्रवीत् ॥ १५ ॥

इतः परमपि स बुद्धिमान्पाण्डुर्मम रसौषधसेनासन्धानव्यापृततां तां राज्ञ एकाकितां मनसश्चञ्चलतां निरूप्य प्रबलांस्तद्भेदिनः कामादीन् प्रेषयिष्यतीति मत्वा किंकरमुखेनैव स्वनागरिकाय विचाराय नगरपर्यटनमपहाय तत्रैव कामादिभेदने सावधानेन स्थेयमिति विज्ञानमन्त्रिणा समादिष्टम् ।

कुष्ठः—ततो विचारेण किं कृतम् ?

मत्सरः—तेन च तत्सदृशबुद्धिना कामः कामपि योगकलामुत्पाद्योपजापेन ध्यानविषयतामापादितः ।

कुष्ठः—हा कामस्यापि परिणतिः । अथ क्रोधस्य को वृत्तान्तः ?

मत्सरः—कमपि प्रदर्श्य दोषं विचारहतकेन सोऽपि च क्रोधः ।
अस्मास्वेव प्रत्युत झटिति परावृत्तिमेव नीतोऽभूत् ॥१६॥

इतीति किम्—हे पाण्डो ! साधु यदेव स्थैर्यवत् चेतः परमेशस्य शंभोः आराधने साधनं, तस्य चेतसः अरिणा कामादिना तदेव चेतः भेत्तुम् भवान् उद्यतः । इति ॥ १५ ॥

(१) विचारनिरुक्तिस्तु चतुर्थेऽङ्के द्रष्टव्या ।

(२) क्रोधो नाम—परकृतधर्षणाक्रोशकलहविवादावज्ञादिभिः गुरुबन्धुबधादिभिर्वा अपराधैरुत्पद्यमानः प्रज्वलनाख्यश्चित्तवृत्तिविशेषः । परविनाशाद्यनिष्टहेतुः—महापराधजन्मा, क्षुद्रापराधजन्मा तु परुषवचनासंभाषणादिहेतुः । तथा चोक्तम्—प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते" इति भरतः । तमभिनयेत् उत्फुल्लनासापुटोद्वृत्तनयनसंदष्टौष्ठपुटगण्डस्फुरणादिभिरनुभावैः, इति ।

कमपीत्यादि—स्पष्टम् ॥ १६ ॥

कुष्ठः—हा क्रोध ! त्वमपि सखीनेवाभिद्रोग्धुं प्रवृत्तः । अथ लोभः कथम् ।

मत्सरः—यादृशः कामः ।

कुष्ठः—साधु लोभ सखे ! साधु सम्यग्व्यवसितं त्वया ।
यादृशीं प्रापितोऽवस्थां कामस्त्वमपि तादृशीम् ॥ १७ ॥
अथ दम्भः क्व ?

मत्सरः—उपजप्तोऽपि बहुधा तैरस्माकं स केवलम् ।
सौहार्दमुपरुन्धानः शस्त्रघातहतोऽजनि ॥ १८ ॥

कुष्ठः—धन्योऽसि दम्भ ! धन्योऽसि । यतः सख्युरनृणतां गतोऽसि । अथ कथय किमध्यवसितं मदेन ?

मत्सरः—मदस्तु निगृह्य कारागारे स्थापितः ।

कुष्ठः—ततः ।

---

(१) लोभो नाम परद्रव्याभिलाषः ।

साधुलोभेत्यादि—सुगमम् ॥ १७ ॥

(२) दम्भः—कपट इति शब्दकल्पद्रुमः । अयथाभूतस्यात्मनस्तथा भूतत्वेन दर्शयितुं चेष्टनम् । यत्किल बकव्रतं विडालव्रतं वाऽऽमनन्ति आचार्याः ॥

उपजप्तोऽपीत्यादि—तैः शत्रुपक्षीयैः बहुधाऽपजप्तोऽपि भेदं प्रापितोऽपि स दम्भः केवलमस्माकं सौहार्दं मैत्रीमुपरुन्धानः अनुवर्तमानः शत्रुघातहतः अजनि ॥ १८ ॥

(३) मदो नाम—यद्यपि मादकद्रव्योपयोगादुत्पद्यते तथाप्यत्र बल-धन-यौवन-विद्यादिजन्याविनयप्रकाश्यो दर्पविशेष एव बोध्यः । तथा चोक्तम्—मदो विकारः सौभाग्ययौवनाद्यवलेपजः, साहि०–दर्पणे ।

मत्सरः—निर्गते च पुण्डरीकनगराद्राजनि नर्मकर्मण्येनमुप-
योद्ययामह इति ।

कुष्ठः—मत्सर ! एवं स्थिते शत्रुमण्डलादेक एव त्वं कथं निर्गतोऽसि ।

मत्सरः—श्रृणु तावत् । नहि मम स्वेच्छया ततो निर्गमो जातः । यतो
रससिद्ध्यनन्तरं संनद्धे च सैन्ये इममेव मत्सरमत्रत्यवृत्तान्त-
हारिणं करिष्याम इति निगृह्य स्थापितोऽस्मि ।

कुष्ठः—तर्हि सखे ! तवागमनमिदानीं तत्र रससिद्धिं सेनासनाहं
च सूचयति ।

मत्सरः—एवमेतत् । समनन्तरमेव ।

राज्ञः संनिधिमृच्छ भद्र ! कथय त्वं पाण्डुमाविष्कुरु
स्वामिप्रीतिमुपेहि मन्त्रकलनाकौशल्यमप्यश्लथम् ।
मा ग्लासीरिति मास्तु भीतिरिति मामुक्त्वा चमूनायका—
न्नामग्राहमपि प्रदर्श्य नगरान्निःसारितोऽहं शनैः ॥ १६ ॥

कुष्ठः—प्रज्ञोन्मदः स सचिवस्तदनर्थो भविष्यति ।
गत्वा निवेद्यतां राज्ञे मन्त्रिणेऽहं निवेदये ॥ २० ॥

राज्ञः सन्निधिमित्यादि—भद्र ! त्वं राज्ञः यक्ष्मणः सन्निधिं सामीप्यं ऋच्छ गच्छ, पाण्डुं युवराजं च इति कथय, इतीति किं, स्वामिनि स्वामिविषये प्रीतिरनुरागः, तामाविष्कुरु प्रकटयाश्लथं, दृढं मन्त्रकलनाकौशल्यं मन्त्रणानैपुण्यमुपेहि प्राप्नुहि इति, मा ग्लासीः ग्लानिं मा प्राप्नुहि भीतिर्भयमपि ते मास्तु इति माम् (मत्सरं) उक्त्वा चमूनायकान् सेनापतीन् अपि नामग्राहं प्रदर्श्य अहं शनैः नगरान्निःसारितः ॥ १६ ॥

प्रज्ञोन्मद इत्यादि—स सचिवः विज्ञानशर्मा प्रज्ञया उद्गतः मदः गर्वो यस्य एवम्भूतः, अस्तीति शेषः । तत्तस्मादनर्थो भविष्यति (गर्वस्यानर्थकारित्वादिति भावः) इदं वृत्तं त्वया गत्वा राज्ञे यक्ष्मणे निवेद्यताम्, अहञ्च मन्त्रिणे निवेदये ॥ २० ॥

मत्सरः—(तप्स्यमानस्तपः सख्युरविकीर्त्यमिदं तव)

अहं तप्स्ये तपः सख्युरविकीर्त्यमिदं मम ।
फलिष्यति तपः किं ते न चेत्सख्यमजीगणः ॥ २१ ॥

कुष्ठः—ग्लानिर्मनसस्तपसे प्रवर्तयति शक्तिमन्तमपि पुरुषम् ।
अग्लानिस्तस्य यदि क्रमाहतस्यापि साधयति कार्यम् ॥ २२ ॥

तस्मादग्लानिरेव क्रियताम् ।

मत्सरः—का गतिः ।

(इति कुष्ठेन किंकरेण च सह निष्क्रान्तः)

शुद्धविष्कम्भकः ।

(ततः प्रविशति पाण्डुः कुष्ठश्च)

पाण्डुः—(सामर्षम्)—

अग्राह्यमल्पमतिभिः सचिवस्य तस्य
वैयात्यमूर्जितमहो किमिति ब्रवीमि ।
यः प्रेषयन्किमपि तादृशवाचिकं द्रा-
गुन्मस्तकं निजमसूचयदूष्मलत्वम् ॥ २३ ॥

अहमित्यादि—अहं तपः तप्स्ये, इदं वृत्तं मम (कर्तरि षष्ठी) सख्युर्युवराजस्याविकीर्त्यम् (कथयितुमनर्हम्) चेत् यदि त्वं सख्यं मैत्रीं न अजीगणः नानुरुद्धवान् तर्हि ते तपः किं फलिष्यति ॥ २१ ॥

ग्लानिरित्यादि—सरलम् ॥ २२ ॥

अग्राह्यमित्यादि—अहो तस्य सचिवस्य विज्ञानशर्मणः अल्पमतिभिः अल्पबुद्धिभिः अग्राह्यम् । ऊर्जितं प्रवृद्धम् । वैयात्यं धाष्ट्र्यमस्तीति अहं किं ब्रवीमि । यः विज्ञानशर्मणः किमपि तादृशं धृष्टतायुक्तं वाचिकं सन्देशं प्रेषयन् द्राक् झटिति उन्मस्तकं मस्तकोन्नमनकार्यं निजम् ऊष्मलत्वं गर्वमसूचयत् ॥ २३ ॥

जीवसमाधिभङ्गाय प्रेषितेषु कामादिष्वपि तथा भूतेषु भक्ति-मूला खल्वेतस्याभिमतसिद्धिरिति तद्विघाताय प्रेषितो व्यांक्षेपो नाम गूढचारः । स गतोऽपि तत्सख्या श्रद्धयापहतो व्यर्थयत्नोऽभूत् । किमतः प्रतिविधातव्यम् ।

कुष्ठः—मम त्वेवं प्रतिभाति—

मन्त्रिणामूष्मलत्वं हि पश्यद्भिः प्रतिमन्त्रिभिः ।
शौर्येण प्रतिकर्तव्यं तथा चेदुचितो भवेत् ॥ २४ ॥

पाण्डुः—मैवं वादीः । परस्य मन्त्रशक्तिः स्वस्य मन्त्रशक्त्यैव प्रतिहन्तव्या । यथा खलु शास्त्रविद आचक्षते । यो यादृशेन साधनेन प्रहरति स तादृशसाधनेनैव प्रतिहन्तव्य इति । अतो मन्त्रकृतं संविधानमुपायान्तराभावे शौर्येण प्रतिक्रियतामित्यन्तिममिदमौपयिकम् । अहमिदानीं तदुचितं प्रतीकारमालोचयामि ।

कुष्ठः—आलोचयतु भवान् ।

आकर्णयिष्यति यदा वृत्तान्तमिदं स मत्सरमुखेन ।
दीपितरोषो हृदये देवोऽपि समागमिष्यति तदैव ॥ २५ ॥

तस्य पुरस्तादस्मदायत्तमुपायं सफलीकरिष्यामः ।

पाण्डुः—अस्त्वेवम् । भवानवहितास्तिष्ठतु ।

कुष्ठः—तथा (इति निष्क्रान्तः)

---

(१) व्याक्षेपो नाम—इष्टमवलम्बनं विहाय चित्तस्यान्यस्मिन् अग्राह्ये वस्तुनि धावनम् । व्याकुलत्वमिति भावः ।

मन्त्रिणामित्यादि—मन्त्रिणामूष्मलत्वं पश्यद्भिः प्रतिमन्त्रिभिः, अर्थात् प्रतिनायकस्य मन्त्रिभिः चेत्तथा उचितं भवेत् तर्हि शौर्येण प्रतिकर्तव्यमित्यन्वयः ॥ २४ ॥

आकर्णयिष्यतीत्यादि—स्पष्टम् ॥ २५ ॥

पाण्डुः—कः कोऽत्र भोः ?

(प्रविश्य)

गलगण्डः—आज्ञापय करणीयम् ।

पाण्डुः—भद्र ! अपथ्यतां प्रवेशय ।

गलगण्डः—(निष्क्रम्य पुनस्तया सह प्रविश्य) आर्य ! कटकसीमनि देवः प्राप्त इति वल्लभपालो विज्ञापयति ।

पाण्डुः—(अपथ्यतां प्रति । अपवार्य) अये ! त्वं कच्चिन्महति राजकार्ये नियोजितव्यासि ।

अपथ्यता—अवहिदह्मि ।

पाण्डुः—जीवं प्रविश्य तमपथ्येष्वाहारविहारादिषु नियोजय ।

अपथ्यता—तह । (इति निष्क्रान्ता)

पाण्डुः—(पुरोऽवलोक्य) अये ! देवः प्राप्तः । गलगण्ड ! गच्छाग्रतः ।

(ततः प्रविशति राजयक्ष्मा मत्सरश्च)

पाण्डुः—(प्रणम्य) राजन् ! कथमेतत् ।

तन्वत्पुनः पुनरपि भ्रुकुटिं ललाटे
निःसीमनिःश्वसितमुच्चलिताधरोष्ठम् ।
देवस्य शंसति मुखाम्बुजमन्तरङ्गे
रूढां रुषा रिपुजने सहसैव चिन्ताम् ॥ २६ ॥

---

(१) अपथ्यता नाम—पथिभ्यः स्रोतोभ्योऽनपेतमनुकूलं पथ्यं शारीराणां द्रव्यगुणकर्मणां पोषकमाहारविहारादि, तद्भिन्नमपथ्यं तस्य भावः ।

तन्वदित्यादि—ललाटे पुनः पुनरपि भ्रुवोः कुटिः कौटिल्यं तन्वत्, निःसीमानि दीर्घाणि निःश्वसितानि यस्मिन्, उच्चलितः प्रस्फुरितः अधरोष्ठो यस्मिन् एवम्भूतं, देवस्य राज्ञः (यक्ष्मणः) मुखाम्बुजमन्तरङ्गे मानसे रूढां, रुषा क्रोधेन सह रिपुजने रिपुजनविषयिणीं चिन्तां सहसैव शंसति ॥ २६ ॥

राजा—पाण्डो ! विजने प्रासादे समुपविश्य सर्वं बोधयिष्यामि ।

पाण्डुः—गलगण्ड ! प्रासादमार्गमादेशय ।

गलगण्डः—इत इतो देवः ।

पाण्डुः—(विलोक्य) राजन् ! आरुह्यतामयम् ।

श्रीकण्ठक्षितिधरशृङ्गभङ्गदायी
प्रासादः शिखरविराजिहेमकुम्भः ।
सोपानैः स्फटिकमयैः सुखेन गम्यो
रम्योऽयं भवति कलस्वनैः कपोतैः ॥ २७ ॥

(सर्वे प्रासादाधिरोहणं नाटयित्वोपविशन्ति)

राजा—पाण्डो ! किं न त्वया श्रुतो मत्सरात्परवृत्तान्तः ।

पाण्डुः—श्रुतं कुष्ठमुखात्पुरवृत्तं तं विशेषतः श्रोतुमिच्छामि ।

राजा—पाण्डो ! श्रूयतां मत्सरमुखात् । ततः समुचितं प्रतीकारं विधास्यसि । मत्सर ! कथय ।

मत्सरः—सन्नद्धैः पुररक्षणे परिगतं प्राणादिभिः पञ्चभि-
स्तत्तद्देशगतैश्च यत्ननिचयैस्तद्दुष्प्रवेशं पुरम् ।

श्रीकण्ठ इत्यादि—श्रीकण्ठस्य क्षितिधरः कैलाशगिरिः तस्य शृङ्गाणां शैलानां भङ्गं मानभङ्गं ददातीति । शिखरेषु विराजिनः शोभमानाः हेमकुम्भाः सुवर्णकलशाः यत्र, स्फटिकमयैः स्फटिकमणिघटितैः सोपानैः सुखेन गम्यः । अयं प्रासादः कलस्वनैः मधुरकूजितैः कपोतैः पारावतैः रम्यः रमणीय इति ॥ २७ ॥

सन्नद्धैरित्यादि—पुररक्षणे सन्नद्धैरुद्युक्तैः पञ्चभिः प्राणादिभिः (प्राणापानसमानोदानव्यानैः) परिगतं व्याप्तं तेषु तेषु देशेषु स्थानेषु गतैः, विहितैः यत्ननिचयैः उपायैः च तत्पुरं दुष्प्रवेशम् (अस्माभिः

रन्ध्रान्वेषितया कथं कथमपि प्राप्ताः स्म देवाज्ञया
यत्रान्तर्मुखतामुपेत्य नियतं जीवस्तपोऽतप्यत ॥ २८ ॥

राजा—के ते प्राणादयः कतिविधाः कुत्र गताः किंनामधेयाश्च ।
कानि च तानि यत्नानि कीदृशानि इति सप्रकारमावेदय ।

मत्सरः—

(क) हृदयसततावासः प्राणो महाबलविक्रमः
सकलमपि तद्यस्यायत्तं पुरं सपरिच्छदम् ।
कलितनिलयोऽपानो मूलस्थले हितकृद्विभो–
र्वसति च समानाख्यो नाभौ बली घनशूलभृत् ॥ २९ ॥

किं च—

कण्ठोपकण्ठे निवसन्नुदानः करोत्यकुण्ठां किल राजभक्तिम् ।

प्रवेष्टुमशक्यम्) किन्तु रन्ध्राणि अन्विष्यन्तीति तेषां भावस्तत्ता तया, देवस्याज्ञया कथं कथमपि वयं तत्र प्राप्ताः स्मः । यत्रान्तर्मुखतामन्तर्वृत्तिताम् उपेत्य जीवः नियतं तपोऽतप्यत ॥ २८ ॥

हृदयसततेत्यादि—हृदयं पुण्डरीकसदृशं द्वयोः फुफ्फुसयोरन्तराले अवलम्बितम् अन्तःकोष्ठद्वयविशिष्टं रक्तसंग्रहप्रेरणक्रियं यन्त्रं तदुपलक्षितमुरः कण्ठः मूर्धा च आवासा यस्य तदुक्तं वाग्भटे–"प्राणोऽत्र मूर्धगः उरःकण्ठचरः" इत्यादि, सपरिच्छदं परिच्छदेन परिवारेण उपकरणेन वा सह वर्तते इति, तत्, मूलस्थले मूलद्वारे गुदस्यार्धपञ्चमाङ्गुले अवकाशे तदुपलक्षिते श्रोणिवस्तिमेढ्रोरुभागे च अपानः, तदुक्तं वाग्भटे—"अपानोऽपानगः श्रोणिबस्तिमेढ्रोरुगोचरः" इत्यादि । नाभौ पक्वामाशयमध्यस्थिते सिराप्रभवे मर्मणि तदुपलक्षिते अग्न्याशये च कोष्ठान्तश्च, समानः । तदुक्तं वाग्भटे—"समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वशः" इति । शेषं स्पष्टम् ॥ २९ ॥

कण्ठोपकण्ठेत्यादि—कण्ठोपकण्ठे गलसमीपे, अत्र कण्ठ इति पदम् उरोनासानाभिगलानामुपलक्षणं, यदुक्तं वाग्भटे—"उरःस्थानमुदा-

व्यानस्तु सर्वत्रचरः पुरेऽस्मिन्करोति जीवे सकलानुभूतिम् ॥३०॥

शल्यानि यानि किल देहभृतां शरीरे
नानाङ्गकेषु महतीं प्रथयन्ति बाधाम् ।
तेषां समुद्धरणकर्मणि साधनानि
यन्त्राणि कानिचन संघटितानि तत्र ॥ ३१ ॥

यानि किल—

अर्शोभगन्दरमुखस्य रुजां गणस्य
क्षाराग्निशस्त्रपरियोजनमङ्गरक्षाम् ।
बस्त्यादिकर्मघटकादि च कार्यजातं
कुर्वन्त्यपायरहितानि च तत्र तत्र ॥ ३२ ॥

अपि च—

यद्धर्यक्षसदृक्तरक्षवदनं तत्सिंहवक्राभिधं
यच्चर्क्षस्य मुखाभभीषणमुखं भल्लूकवक्त्रं हि तत् ।
तत्कङ्काननामकं प्रतिभयं यत्कङ्कतुल्याननं
यन्त्रं काकमुखं तदेव यदपि ध्वाङ्क्षातितीक्ष्णाननम् ॥३३॥

नस्य नासानाभिगलांश्चरेत्" इति अकुण्ठाममोघां राजभक्तिं करोति, शेषं सुगमम् ॥ ३० ॥

शल्यानीत्यादि—शल आशुगमने इति धातुः "शलति शरीरप्रदेशेषु आशु प्रविशति इति शल्यं, शल + यः "सानसिवर्णसिपर्णसीति" औणादिको यः । तत्र शल्यस्वरूपं सुश्रुते, सर्वशरीरे येन बाधा भवति तत् शल्यं तच्च पुनर्द्विविधं—शारीरमागंतुकञ्च, तत्र शारीरं रोमनखादि धातवो भिन्नमलाः दोषाश्च दुष्टाः । आगन्तुकमपि शारीरशल्यव्यतिरेकेण यावन्तो भावाः (काष्ठपाषाणलोहलोष्ठ्रप्रभृतयः) दुःखमुत्पादयन्ति, तत् सर्वं शल्यशब्देन उच्यते । शेषं सरलम् ॥ ३१ ॥

अर्शोभगन्दरमुखस्येत्यादि—स्पष्टम् ॥ ३२ ॥

यद्धर्यक्षसदृक्तरक्षवदनमित्यादि—सरलम् ॥ ३३ ॥

विस्तीर्णानि नवाङ्गुलद्वयपरीणाहानि कण्ठे परं
संनद्धानि च कीलकैः सुघटितैर्मूलेऽङ्कुशाभानि च ।
पर्यन्तेषु पुनर्मसूरसदृशाकाराणि तिष्ठन्त्यहो
तत्र स्वस्तिकनामकानि कतिचिद्यन्त्राणि घोराणि च ॥ ३४ ॥

तान्येव सुदृढान्यस्थिलग्नशल्यापकर्षणम् ।
कुर्वन्ति स्वस्तिकाख्यानि यन्त्राणि हि शरीरिणाम् ॥ ३५ ॥

अपि च—

एकान्येकमुखान्यपि नाणीयन्त्राणि सूक्ष्मशुषिराणि ।
स्रोतोगतशल्यानां दर्शनचूषणविधौ समर्थानि ॥ ३६ ॥

एवमादिभिर्बहुविधैर्यन्त्रनिवहैरन्यैरपि परिगुप्ततया दुर्गममपि पुरं कथंचन प्रविश्य मनसः पारतन्त्र्यकरणाय वयं यावदितस्ततः संचरितुं प्रवृत्तास्तावदेव विज्ञानविधेयेन[1] विचारनाम्ना नागरिकहतकेन परिज्ञाताः ।

पाण्डुः—ततस्ततः ।

मत्सरः—ततः कामादिषु तत्र तादृशीं दुरवस्थां प्रपन्नेष्वहमेक एव हतभाग्यतया वैरिवशं गतस्तत्कृतमवमानजातमशरणतया सहमानस्तदीयभटैरितस्ततो विकृष्यमाणस्तदुदितवाचिकमपि निशमयंश्चारवधविमुखैस्तैरेव कृपया विमुक्तः प्रज्वलदवमानाग्निसंतप्यमानः स्वजनमुखावलोकने कृतलज्जतया क्वचन

विस्तीर्णानि इत्यादि—स्पष्टम् ॥ ३४ ॥

तान्येवेत्यादि—स्पष्टम् ॥ ३५ ॥

एकान्येकेत्यादि—सरलम् ॥ ३६ ॥

(१) विज्ञानशर्ममन्त्रिणोऽनुचरेण ।

विजनकाननसीमनि कठोरतपश्चर्यया विनिपातिततनुर्भर्तुरा-नृण्यं भजेयमिति पुरान्निःसरन्नन्तरा सकिंकरेण कुष्ठेन देव-पादमूलं प्रापितः । इत्येतदवसानं प्रवृत्तेः श्रुत्वा देवः प्रमाणम् ।

राजा—कुमार ! श्रुतं खलु निरवशेषमस्य मुखात् । किमत्र प्रतिविधेयम् ।

पाण्डुः—(विचिन्त्य) देव ! किमन्यत् ।

सन्तु यन्त्राण्यनेकानि सन्तु वा सैनिकाः परे ।
त्वत्कोपाग्नौ पतङ्गत्वं भजेरन्निति मे मतिः ॥ ३७ ॥

राजा—पाण्डो ! सत्यमेव किं कालविलम्बेन । सर्वथा प्रविश्यान्तः कोशागारम् ।

शस्त्रेण सर्वमपि खण्डश एव कृत्वा
गृध्रव्रजाय निखिलं बलिमर्पयामि ।
येनौदनो दिविषदां विकलीकृतोऽभूत्
किं तस्य मे भयममी कितवा विदध्युः ॥ ३८ ॥

अपि च—

अमृतनिधिरयं यः सोऽपि मत्पीडितः सन्
न विसृजति मदीयेनाधिनाद्यापि कार्श्यम् ।

सन्तु यन्त्राण्यनेकानीत्यादि—स्पष्टम् ॥ ३७ ॥

शस्त्रेण सर्वमपीत्यादि—येन मया दिविषदां सुधाभोजिनां देवाना-मोदन उपभोग्यत्वादोदन इवौदनः (सुधाकरः इत्यर्थः) विकलीकृतः कलाक्षयमापादितः, तस्य मेऽमी कितवा धूर्ता वराकाः किं भयं विदध्युः न किमपीत्यर्थः । शेषं सरलम् ॥ ३८ ॥

अमृतनिधिरयमित्यादि—मदीयेन मत्सम्बन्धिना आधिना क्षय-

निजविकटजटालीकाननस्थापितस्य
प्रभवति स महेशोऽप्यस्य किं पूरणाय ॥ ३९ ॥

हन्त हन्त ।

स ददाति नाम गिरिशो रसमेतेषामुपासनपराणाम् ।
लब्धेनैतेनास्मानेते नाम प्रशमयन्ति ॥ ४० ॥

(विहस्य) अहो विचारचातुरी विज्ञानहतकस्य ।

(आकाशे)

अरे विज्ञानहतक !

आश्रित्य यं सततमुत्पतासि स्मयेन
निर्वापयामि तमहं सहसैव जीवम् ।
पश्चाद्विनङ्क्ष्यति भवानपि चाश्रयस्य
नाशान्न सिध्यति किमाश्रयिणोऽपि नाशः ॥ ४१ ॥

राजा—कः कोऽत्र भोः ! शस्त्रम् । (इत्युत्थातुमिच्छति)

पाण्डुः—ननु संनिहितमेव शस्त्रम् । तथापि किंचिद्विज्ञापयामि ।

अस्त्येवायमन्तिमः प्रकारः । अपि तु—
त्रिषूपायेषु सत्स्वन्त्यो न युक्त इति तान्त्रिकाः ।
उपायमिममेवातो मनो मे प्रयुयुक्षते ॥ ४२ ॥

व्याधिना । निजं विकटं विशालं जटाली जटाजूटमेव काननं वनं, तत्र स्थापितस्य । शेषं स्पष्टम् ॥ ३९ ॥

स ददातीत्यादि—सरलम् ॥ ४० ॥

आश्रित्य यमित्यादि—यं (जीवराजं) सततमाश्रित्य त्वं स्मयेन गर्वेण उत्पतासि उच्छलसि तं जीवमहं सहसैव निर्वापयामि । पश्चात् भवानपि विनङ्क्ष्यति, चो हेत्वर्थे । यतः आश्रयस्य नाशात् आश्रयिणोऽपि नाशः किं न सिद्ध्यति, इति योजना ॥ ४१ ॥

त्रिषूपायेष्वित्यादि—तान्त्रिकाः अर्थशास्त्रविदः । त्रिषूपायेषु साम-

राजा—कोयमुपायः ।

पाण्डुः—(कर्णे) एवमेवम् ।

राजा—भवतु तथा । अस्त्येवैतदनन्तरकर्तव्यम् ।

पाण्डुः—देव ! मार्गश्रम इव दृश्यते, सिद्धं च सर्वं शयनादि ।

राजा—त्वमपि स्वकार्येऽवहितस्तिष्ठ । अहमपि भुक्त्वा निद्रास्थानं गच्छामि ।

(इति निष्क्रान्ताः सर्वे)

इति पञ्चमोऽङ्कः ।

दानभेदेषु सत्सु अन्त्यो दण्डो न, न युक्तः (न प्रयोक्तव्यः) इति वदन्ति । अतः मे मनः इममेव उपायं भेदाख्यं प्रयुयुक्षते ॥ ४२ ॥

इति श्रीजीवानन्दरसायने संक्षिप्तटिप्पणे

पञ्चमोऽङ्कः ॥

षष्ठोऽङ्कः ।

(ततः प्रविशति कर्मणा सह कालः)

कालः—वत्स कर्मन् ! जीवस्य राज्ञः पुरबाधनार्थं यक्ष्मराजमन्त्रिणा पाण्डुना प्रयुक्तान् रोगरूपान् भटान् प्रतियुधा जेतुं विज्ञानमन्त्रिणा नियुक्तं सरसतत्प्रतिभटजातं किं करोतीति जिज्ञासते मे हृदयम् ।

कर्म—भगवन् ! सर्वानुस्यूतस्य तव किं नामाविदितमस्ति ।

कालः—भवानपि तादृश एव । महान् खलु तव प्रभावः । तथा हि—

---

(१) कर्म नाम क्रिया, चेष्टा स्फुरणमिति यावत्, तद्धि रजोजन्यः द्रव्यनिष्ठो धर्मविशेषः । यथाह मुनिः—प्रयत्नादि कर्म चेष्टितमुच्यते इति । अत्र हि आदिशब्दः प्रकारे, तेन प्रयत्नप्रकाराणां संस्कारगुरुत्वादिजन्यानां सर्वासां क्रियाणामवरोधः । तत्र द्रव्यं त्रिधा, अचेतनमन्तश्चेतनं बहिरन्तश्चेतनमितिभेदात् । तत्राचेतने सुवर्णादिद्रव्ये गुरुमन्दादिगुणैः सह शोधनशमनादीनि बहूनि कर्माणि विद्यन्ते, यानि प्रयुक्ते द्रव्येऽभिव्यज्यन्ते ।

अन्तश्चेतने वनस्पत्यादौ तु आत्ममनोयोगितया पूर्वोक्तैः कर्मभिः सह यत्किञ्चित्सुखदुःखाद्युपलब्धौ प्रहर्षणम्लानिकराणि अपि कर्माणि सन्त्येव ।

बहिरन्तश्चेतने पशुपक्ष्यादीनान्तु शरीरेन्द्रियसत्वात्मसंयोगिरूपतया शरीरघटकद्रव्येषु पूर्वोक्तगुणकर्माणि विद्यन्त एव । किन्तु इन्द्रियात्ममनसामतिरिक्तानि कर्माणि उपलभ्यन्ते, तत्र बुद्धीन्द्रियाणां कर्माणि शब्दस्पर्शरूपरसगन्धग्रहणानि, कर्मेन्द्रियाणान्तु वचनादानविसर्गानन्दविहरणानि । मनस इन्द्रियाधिष्ठानादि, आत्मनश्च मनः प्रेरणादि । तत्र मनसा चिन्तितस्यार्थस्य वाचैव बहिः प्रकाशनं शक्यते कर्तुं

न त्वन्येन केनचिच्चक्षुरादिनेति, वाङ्मनसोः कर्माणि पृथङ् निर्दिष्टानि, अन्येषामिन्द्रियाणां कर्माणि तु शारीरिककर्मस्वेवावरुद्धानि, अतः शास्त्रे कायिकवाचिकमानसिकभेदात् त्रिविधान्येव कर्माणि, इति व्यवह्रियते।

तान्येतानि हिताऽहितसाधनभेदात् द्विविधानि, यानि हि इहाऽमुत्र च सुखसाधनानि तानि हितानीत्युच्यन्ते, विपरीतानि त्वहितानि। तत्र भगवद्दर्शनतीर्थगमननामस्मरणभगवद्विग्रहध्यानादीनि हितवर्गे समाविष्टानि, यान्युदिश्य—

कायेन वाचा मनसापि शश्वद् यत्सम्भृतं वासवधैर्यलोपि।
आपाद्यते न व्ययमन्तरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत्॥

इति कविकालिदासोक्तिः। अथ प्राणिहिंसनासत्यभाषणपरानिष्टचिन्तनादीनि त्वहितवर्गे, यान्युद्दिश्य—

"हिंसास्तेयान्यथाकामं पैशुन्यं परुषानृते।
सम्भिन्नालापव्यापादमभिध्या दृग्विपर्ययम्॥
पापं कर्मेति दशधा कायवाङ्मानसैस्त्यजेदिति" निषेधस्मरणं दृश्यते।

अमुमेवाऽर्थं केचिदित्थं प्रतिपादयन्ति—

मनुष्यै(चेतनैः)रेतैः बुद्धिकर्मेन्द्रियसमन्वयादनिच्छद्भिरपि अनुक्षणं किञ्चिदवबुद्ध्यते किञ्चित्क्रियते, इति प्रकृतिसिद्धमेतत्। अथ यदिदं बुध्यते तत्त्रेधा ज्ञानमन्यथाज्ञानमज्ञानञ्च। तस्मिँस्तद्बुद्धिर्ज्ञानम्, तच्च यथार्थज्ञानं प्रमा सत्यमित्याद्युच्यते। अतस्मिंस्तद्बुद्धिरन्यथा ज्ञानम्, तच्च अयथार्थं भ्रमो विपर्ययो मिथ्येत्याद्युच्यते।

अथ विषयाऽनवलम्बनेन जायमानं ज्ञानमज्ञानञ्च, तच्च संशयकुंठितबुद्धित्वबुद्धिस्तम्भादिभेदादनेकधा भिद्यते, एवमेव यदिदं क्रियते तदपि त्रेधा, कर्म विकर्म अकर्म च, यतोऽभ्युदयनिःश्रेयससिद्धिः तत्कर्म, तच्च पुण्यं सुकृतं श्रेयो धर्म इत्याद्युच्यते। यतोऽनिष्टं परिणमते तद्विकर्म। तच्च पापं दुष्कृतं पातकमधर्म इत्याद्युच्यते। अथ यानि यातयामानि वृथा कर्माणि स्युस्तान्यकर्माणि, तानि उपचारशुद्धिमज्ञात्वैव यदृच्छया क्रियमाणानि जलताडनादीनि चैत्यवन्दनादीनि अलसचरित्रा-

दीनीत्येवमनेकधा भिद्यन्ते । इत्येवमुभयोस्त्रैविध्ये अन्यथाज्ञाना-ऽज्ञानाभ्यां विकर्माकर्मभ्यामेव च समन्विताभ्यामसमन्विताभ्यां वा लोके दुःखमुत्पद्यते । यत्र नैतेषां सम्बन्धस्तत्र नास्त्येव दुःखोत्पत्तिरिति व्याप्तिः । न चैतत् चतुष्टयव्यतिरेकेण किञ्चिददृष्टं दुःखोत्पत्तौ कारण-मस्तीति सुनिभृतं" सर्वत्र परीक्षाविशेषेण द्रष्टव्यम् । इति श्रीमधु-सूदनाचार्याः ।

केचित्तु चतुष्टयी खलु कर्मजातिः—तत्र तमोमूला दुःखमात्र-फलका ब्रह्महत्यादिरूपा कृष्णा । रजोमूला दुःखोपसर्जनसुखफलका यागादिरूपा शुक्लकृष्णा, सत्वमूला सुखमात्रफलका सन्ध्योपासन-प्रणवजपादिरूपा शुक्ला । गुणहेतुका निजानन्दफलका संप्रज्ञातसमा-ध्यादिरूपा अशुक्लकृष्णा, तथा च सूत्रम् "कर्माऽशुक्लात्कृष्णं योगिन-स्त्रिविधमितरेषाम्" । (पा० ४ । सू० ७ इति)

अथ तान्येतानि हितानि कर्माणि नित्यनैमित्तककाम्यनिषिद्ध-भेदात् चतुर्विधानि । तत्र येषामकरणे प्रत्यवायस्तानि नित्यानि सन्ध्यो-पासनादीनि, यानि तु किञ्चिद् निमित्तमुपादाय क्रियन्ते तानि नैमित्ति-कानि चान्द्रायणादीनि यानि च कामनया क्रियन्ते तानि काम्यानि पुत्रेष्टि-प्रभृतीनि । किन्तु त्रिविधान्येतानि यदि फलासक्तिं परित्यज्य केवलं कर्तव्यबुद्ध्या लोकसंग्रहाय विधीयन्ते तदा चित्तशुद्धिं विहाय निर-तिशयब्रह्मानन्दरूपसुखविशेषप्राप्तौ निमित्तानि भवन्तीति बोध्यम् । निषिद्धानि तु हिंसास्तेयादीनि ।

केचित्तु सात्विकराजसतामसभेदेन त्रिविधानि कर्माणीत्याहुः, तथा च भगवद्गीतासु—

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते ॥ १ ॥
यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद् राजसमुदाहृतम् ॥ २ ॥
अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते, इति ।

कर्मविपाकशास्त्रे तु कर्म त्रिविधम् सञ्चित-प्रारब्ध-क्रियमाण-भेदात्। तत्र अनादिकालादेतत्क्षणपर्यन्तमिहामुत्र वा यत्किञ्चित्कृतम्, तत्सर्वं सञ्चितनाम्ना अभिधीयते । तस्मात्सञ्चितकर्मराशेः यानि कर्माणि विपाकोन्मुखानि, अर्थात् जात्यायुर्भोगरूपफलदानाय उद्यतानि भवन्ति, तानि प्रारब्धनाम्ना उच्यन्ते ।

यानि तु इदानीमनुक्रियन्ते तान्येतानि क्रियमाणानि, एतानि अपि सञ्चितराशावेव मिश्रितानि भवन्ति, इति । तत्र प्रारब्धकर्मणान्तु भोगादेव क्षयो भवति, यदुक्तम्—

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ इति

सञ्चितानि क्रियमाणानि वा आत्मज्ञानेन नश्यन्ति, यदुक्तं—'क्षीयन्ते चाऽस्य कर्माणि तस्मिन् दृष्टे परावरे' (मुण्डक २ । २ । ८) ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन । (गी० ४, ३७) इति ।
चरके तु—

कर्म द्विविधं, दैवं पुरुषकारश्चेति, तत्र यत् पूर्वजन्मनि कृतं तद् दैवं, यत्तु इह जन्मनि क्रियते सोऽसौ पुरुषकारः । ते एते द्वे अपि पृथक् त्रिविधे, हीनमध्योत्कृष्टभेदात् । तत्रोत्कृष्टयोर्दैवपुरुषकारयोर्योगात्पुरुषः दीर्घं सुखं हितञ्चायुः प्राप्नोति । मध्यमाभ्यां मध्यमं हीनाभ्याञ्च हीनमिति । एवमुत्कृष्टमध्यमाभ्यां मध्यमहीनाभ्यां वा आयुषो अन्याविधा कल्पनीया । यदा तु दैवपुरुषकारयोर्विरोधः, तदा दुर्बलं दैवं बलवता पुरुषकारेण हन्यते, बलवता दैवेन च दुर्बलः पुरुषकारः पराभूयते इति ।

तत्र दैवमपि पाकभेदेन द्विविधं, तत्रैकं नियतकालपाकमपरञ्च अनियतकालपाकमिति । यदाह चरकः—

कर्म किञ्चित् क्वचित्काले विपाके नियतं महत् ।
किञ्चित्त्वकालनियतं प्रत्ययैः प्रतिबोध्यते ॥

अयमर्थः—न हि कर्म महत् किञ्चित्फलं यस्य न भुज्यते, इति नियमात् विपाके नियतं किञ्चित् महत् कर्म काले नियतं तदिदमुप-

स्थिते स्वपाककाले शुभमशुभं वा नियमेन करोत्येव, तदेतत् बलवत्, न पुरुषकारबाध्यम् ।

किञ्चित्तु अकालनियतम्, अर्थात् अनियतकालपाकम्, तत् यस्मिन् काले पुरुषकाराख्यं दृष्टकर्मानुगुणं प्राप्नोति, तस्मिन् काले सहकारिसान्निध्योपबृंहितबलं सत् शुभमशुभं वा करोति, यदि तु दृष्टं कर्म नाप्नोति तदा शुभाशुभं न करोति । प्रत्ययैः दृष्टकारणैः प्रतिबोध्यते उद्रिक्तं भवतीत्यर्थः, इति ।

केचित्तु अस्मिन् चरकपद्ये कर्मणां चतस्रो विधाः कल्पयन्ति तेषामयमाशयः—

किञ्चित्कर्म कालनियतं, यथा इदं कर्म यदि पच्येत, तस्मिन्नेव काले पच्येत इति कालनियमः ।

किञ्चित्तु विपाकनियतं, यथा—इदं कर्म विपच्येत एव, न तु न विपच्येत इति विपाकनियमः । एते आयुर्वेद प्रायश्चित्तादिशास्त्रविषये ।

किञ्चित्तु कालविपाकनियतं, यथा इदं कर्म अस्मिन्नेव काले विपच्येत एवेति, एतच्च कालविपाकनियतत्त्वाद् बलवदुच्यते, एतदेवदृष्टाबाधनीयम् ।

किञ्चित्तु अकालविपाकनियतं यथा इदं कर्म यत्र क्वचित्काले पच्येताऽपि । तदिदमतिदुर्बलं दृष्टकारणसामग्रीमपेक्षमाणं तिष्ठति, यदि तु दृष्टं हेतुं प्राप्नोति, तदा फलं ददाति, अन्यथा तु न ददाति इति ।

(२) कालस्वरूपनिर्णये विश्वनाथपञ्चाननः—

जन्यानां जनकः कालो जगतामाश्रयो मतः ।

परापरत्वधीहेतुः क्षणादिः स्यादुपाधित इति । कणादमुनिश्च—"अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि" । वैशे० अ० २ । आ० २ । सू० ६ ॥

अत्र इति शब्दो ज्ञानप्रकारपरः प्रत्येकमभिसंबध्यते, तथा च अपरमिति प्रत्ययः, युगपदिति प्रत्ययः, चिरमिति प्रत्ययः, क्षिप्रमिति प्रत्ययः, इति काललिङ्गानीत्यर्थः । अपरस्मिन्नपरमित्यनेन परस्मिन्

परमित्यपि द्रष्टव्यम्, इति सूत्रार्थः । ननु अयं कालो न अनागतादि-व्यवहारभेदं प्रवर्तयितुमर्हति, तस्यैकत्वादिति चेन्न, कालस्य स्वरूपत ऐक्येऽपि उपाधिभेदादनागतादिभेदव्यवहारस्योपपन्नत्वात् । यदाहुः—"एकत्वेऽपि सर्वकार्याणामारम्भक्रियाऽभिनिर्वृत्तिस्थितिनिरोधोपाधि-भेदान्मणिवत्पाचकादिवद्वा नानात्वोपचार इति । अयं भावः—यथै-कस्मिन् पुरुषेऽनेकसंबन्धभेदानुविधायिन्यभिन्ने पिता, पुत्रो, भ्रातेति प्रत्यया भवन्ति, तद्वदेकः कालः कार्यकारणविशेषापेक्षः परापरादि-प्रत्ययहेतुरिति । एतदुक्तं भवति—'देशतः सन्निकृष्टयोर्युवस्थविरयोरे-कस्मिन् शरीरावस्थाभेदानुमितातीतसूर्योदयास्तमयरूपक्रियाप्रचय-बहुत्वान्तरितजन्मनि स्थविरे शरीरावस्थानुमितातीतसूर्योदयास्त-मयरूपक्रियाप्रचयाल्पत्वान्तरितजन्मानं युवानमवधिं कृत्वा विप्रकृष्टा बुद्धिरुत्पद्यते, तामपेक्ष्य बहुतरसवितृदयास्तमयविशिष्टेन काल-प्रदेशेन योगात्स्थविरे परत्वस्योत्पत्तिरिति । तस्मान्मार्तण्डोदयास्तमय क्रियाप्रचयाल्पत्वबहुत्वविशिष्टः क्षणसमूहात्मको महाकालः। क्षणस्तु यावता समयेन चलितः परमाणुः पूर्वदेशमतिक्रामेदुत्तरदेशमुपसंग-च्छेत च, स काल इति ज्ञेयम् । एषां क्षणसमूहानामेकबुद्धिविषयत्वा-रोपादेव महाकाल इति व्यवहारः, अत एव कालनित्यत्वश्रुतिस्मृतयश्च प्रवाहरूपकालरूपा इति योगवार्तिककृतः।

सुश्रुताचार्यस्तु—कालो हि नाम भगवान्स्वयम्भूरनादिमध्यनिधनः। अत्र रसव्यापत्संपत्ती जीवितमरणे च मनुष्याणामायत्ते । स सूक्ष्मा-मपि कलां न लीयते इति कालः, सङ्कलयति (आयुः) कालयति वा भूतानीति कालः । तस्य संवत्सरात्मनो भगवानादित्यो गतिविशेषेणाक्षि-निमेषकाष्ठाकला.....................युगप्रविभागं करोति ।

स एष शीतोष्णवर्षभेदात् त्रिविधः । यथाह हारीतः—"तथा वर्षा हिमोष्णाख्याः त्रयः काला इमे मताः" इति । वाग्भटोऽपि, कालस्तु शीतोष्णवर्षभेदात्—त्रिधा मतः" इति । अस्य हीनयोगातियोगमिथ्या-योगा रोगहेतवः । यदाह वाग्भटः—स हीनो हीनशीतादिरतियोगोति लक्षणः । मिथ्यायोगस्तु निर्दिष्टो विपरीतस्वलक्षणः । समयोगस्तु स्वा-स्थ्यहेतुरिति ।

त्वामज्ञातमनुग्रहाय जगतां देवी विधत्ते श्रुति-
लोकः साधयतीप्सितं भवदनुष्ठानादिहामुत्र च ।
किं चायं समनुष्ठितेन भवता चित्तस्य शुद्धिं गत-
स्तत्त्वं वेदितुमात्मनः प्रभवति त्रय्यन्तसन्दर्शितम् ॥ १ ॥

अपि च—

त्वं नित्यनैमित्तिककाम्यभेदात्स्थित्वा त्रिधाऽनेकफलानि दत्से ।
इन्द्रत्वमिन्द्रस्य विधेर्विधित्वं हरेर्हरित्वं च फलं त्वदीयम् ॥ २ ॥

कर्म—आर्य ! अवाङ्मनसगोचरस्तव महिमा ।
सुमतिभिरनुमेयस्त्वं सहस्रांशुगत्या
(सविनयम्) भवति भवदधीनं मद्विधानं जनानाम् ।
भगवन् ! किमन्यद्ब्रवीमि—
परिणमयसि पुंसां दातुमर्थात्मना मां
त्वयि कृतिमति षोढा विक्रियन्ते च भावाः ॥ ३ ॥

त्वामज्ञातमित्यादि—अज्ञातं त्वां जगतां हिताय देवी श्रुतिः 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे' इति विधत्ते । त्रय्यन्तेषु वेदान्तेषु सन्दर्शितं प्रतिष्ठापितम् । शेषं स्पष्टम् ॥ १ ॥

त्वमित्यादि—नित्यनैमित्तिककाम्यभेदात्, नित्यं सन्ध्यावन्दनादि, नैमित्तिकं चान्द्रायणादि, काम्यं पुत्रेष्ट्यादि । शेषं सुगमम् ॥ २ ॥

सुमतिभिरित्यादि—जनानां मद्विधानं भवदधीनं भवति, तद्यथा—उदिते जुहोति, अनुदिते जुहोति, समयाध्युषिते जुहोति, इत्यादि । पुंसां दातुमित्यर्थः अर्थात्मना फलस्वरूपेण परिणमयसि । किञ्च त्वयि काले कृतिमति क्रियान्विते सति, भावाः जगत्पदार्थाः षोढा (अस्ति, जायते, वर्द्धते, विपरिणमते, क्षीयते, नश्यति) इत्येवं रूपा विक्रियन्ते विकारमापद्यन्ते । इति ॥ ३ ॥

किञ्च—

त्रैधं जनः शंसति वर्तमानं भूतं भविष्यन्तमहं पुनस्त्वाम् ।
ऐकध्यमापन्नमखण्डरूपमाधारमेषो जगतामवैमि ॥ ४ ॥
निमेषकाष्ठे च कलाक्षणौ च मुहूर्तरात्रिंदिवपक्षमासान् ।
भवत्तनूभृत्त्वयने तथाब्दं युगं च मन्वन्तरमप्यवैमि ॥ ५ ॥

कालः—तदिदानीं पाण्डुविज्ञानमन्त्रिभ्यां युद्धाय नियुक्तानां भटानां विक्रमविलासानवलोक्य चक्षुषी कृतार्थयिष्यावः । पाण्डुना खलु जीवराजे प्रयुक्तो भविष्यतो रोगस्य पुरोभावी बुभुक्षाजनको भस्मकरोगस्तद्गृहीतो राजेति जानामि ।

त्रैधमित्यादि—तथा च तार्किकाः "यत्प्रागभावेन यः कालोऽवच्छिद्यते स तस्य भविष्यत्कालः, स्थितेन च वस्तुना यः कालोऽवच्छिद्यते स वर्तमानकालः, यत्प्रध्वंसेन यः कालोऽवच्छिद्यते स तस्य भूतकालः" इति, तथा च विश्वनाथः—"जन्यानां जनकः कालो जगतामाश्रयो मतः" । शेषं स्पष्टम् ॥ ४ ॥

निमेषकाष्ठे चेत्यादि—अत्र सुश्रुतः "तत्र लघ्वक्षरोच्चारणमात्रोऽक्षिनिमेषः । पञ्चदशाऽक्षिनिमेषाः काष्ठा, त्रिंशत्काष्ठाःकला, विंशतिकलो मुहूर्तः, कलादशभागश्च । त्रिंशन्मुहूर्तमहोरात्रम्, पञ्चदशाहोरात्राणि पक्षः, स च द्विविधः—शुक्लः कृष्णश्च, तौ मासः, तत्र माघादयो द्वादश मासाः । द्विमासिकमृतुं कृत्वा षडृतवो भवन्ति । ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः । तेषां तपस्तपस्यौ शिशिरः, मधुमाधवौ वसन्तः, शुचिशुक्रौ ग्रीष्मः, नभोनभस्यौ वर्षाः, इषोर्जौ शरत्, सहःसहस्यौ हेमन्तः, इति । त एते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो, दक्षिणमुत्तरं च । तयोर्दक्षिणं वर्षाशरद्धेमन्ताः, उत्तरं च शिशिरवसन्तग्रीष्माः ।

अथ खलु अयने द्वे युगपत् संवत्सरो भवति । ते तु पञ्चयुगमिति संज्ञां लभन्ते । स एष निमेषादिर्युगपर्यन्तः कालश्चक्रवत् परिवर्तमानः कालचक्रमुच्यते, इत्येके ॥ ५ ॥

आवां, यथा न विद्युः सर्वेऽपि दिविस्थितावुच्चैः ।
उभयेषामपि युद्धं पश्यावः संलपावश्च ॥ ६ ॥

किञ्च ज्ञानशर्मणोपजापितोऽपि राजा भूयो विज्ञानशर्मणा प्रत्यावृत्य पर्यवस्थापितः ।

कर्म—भगवन्, कीदृशो ज्ञानशर्मणोपजापः ?

कालः—वत्स ! श्रूयताम् ।

तत्तत्कार्यविशेषसाधनविधावुक्त्वेतिकर्त्तव्यतां
जीवस्यास्य विभोः स्वकीयपृतनासंनाहमालोकितुम् ।
निष्क्रान्ते सचिवे, कदाचन भजत्येकाकितां राजनि
श्रुत्वा तत्समयं, तदन्तिकभुवं स ज्ञानशर्मा ययौ ॥ ७ ॥

अनन्तरमायान्तमवलोक्य दूरादेव—
अथ सुचिरवियोगात्संदिहानः सखित्वे
किमपि विवशचेता निर्भरैर्हर्षभारैः ।
कथमपि समुदश्रुबाष्पसंरुद्धकण्ठो
वचनमिदमवोचन्मत्तहंसस्वरेण ॥ ८ ॥

आवामित्यादि—स्पष्टम् ॥ ६ ॥

तत्तकार्येत्यादि—तेषां तेषां कार्यविशेषाणां साधनविधौ विभोः अस्य जीवस्येतिकर्तव्यतामुक्त्वा स्वकीयपृतनायाः सेनायाः संनाहं सज्जीभावमालोकितुं कदाचन सचिवे विज्ञानशर्मणि निष्क्रान्ते सति राजनि च एकाकितां भजति सति तत्समयं श्रुत्वा स ज्ञानशर्मा मन्त्री तदन्तिकभुवं राजसमीपं ययौ । इत्यन्वयः ॥ ७ ॥

अथ सुचिरवियोगादित्यादि—स्पष्टम् ॥ ८ ॥

---

(१) भेदं प्रापितोऽपि

चेतः शीतलतामुपैति नयने विस्तारिणी कौतुका-
न्निर्मर्यादमुपैत्यमानिव तनौ कोऽप्यन्तरानन्दथुः ।
बाहू मां परिरम्भणे त्वरयतस्त्वां वीक्ष्य कस्त्वं सखे !
पुण्यैः पूर्वकृतैश्चिरान्मम दृशोः पन्थानमारोहसि ॥६॥

कर्म—ततस्ततः ।

कालः—ततोऽसौ जीवस्य वचनमिदमाकर्ण्य ज्ञानशर्माऽकथयत् ।

सोऽहं जीव विभो ! चिरन्तनसखस्ते ज्ञानशर्मा तथा
प्राणेष्वन्यतमो मुहुस्तव हिताकांक्षी च सर्वात्मना ।
विज्ञानस्य कुमन्त्रितैः परवति त्वय्यव्यवस्थस्थितौ
शान्तस्त्वन्नगराद्विरक्तहृदयः प्रास्थामनास्थावशात् ॥ १० ॥

संप्रति हि—

दुःसामाजिकबोधनैः कुपदवीसंचारमासेदुष-
स्तेनापज्जलधौ निराश्रयतया राज्ञो वृथा मज्जतः ।
ब्रूते यो न हितं वचोऽप्रियमपि स्वेष्टं निगृह्याग्रहा-
त्स्वामिभ्यः स तु बुद्धिमत्पशुरिति प्राप्नोति मन्त्री प्रथाम् ॥११॥

चेतः शीतलतामित्यादि—कोपि विलक्षणः अन्तरानन्दथुः अन्तरानन्दः तनौ शरीरे अमान् इव निर्मर्यादं निःसीमत्वमुपैति । शेषं स्पष्टम् ॥ ६ ॥

सोऽहं जीवस्येत्यादि—प्राणेषु प्राणसदृशेषु सुहृत्सु अन्यतमः एकः, विज्ञानस्य विज्ञानशर्मणो मन्त्रिणः कुमन्त्रितैर्दुरुपदेशैः परवति परतन्त्रे अव्यवस्थस्थितौ व्याकुले त्वयि सति, शान्तः अनास्थावशात् विरक्तहृदयश्च सन् त्वन्नगरात् प्रास्थामिति योजना ॥ १० ॥

दुःसामाजिकबोधनैरित्यादि—दुःसामाजिकानां दुर्मन्त्रिणां बोधनैः उपदेशैः कुमार्गगमनमासेदुषः । तेन च निराश्रयतया निःसहायतया आपज्जलधौ विपत्समुद्रे वृथा मज्जतः राज्ञः, यः मन्त्री स्वेष्टं निगृह्य स्वामिभ्यः अप्रियमपि हितं वचो न आग्रहात् ब्रूते, स तु बुद्धिमत्पशुरिति प्रथां संज्ञां प्राप्नोति ॥ ११ ॥

अत: किल—

विज्ञानशर्महतकस्य वृथा कुमन्त्रै-
घोरामिमां सुमहतीं गतमापदं त्वाम् ।
आकर्ण्य देव ! हितवागुपदेशहेतो-
रद्यान्तिकं तव गतोऽस्म्यनृणो बुभूषुः ॥ १२ ॥

कर्म—ततस्ततः ।

काल:—ततश्च राजा सरलप्रकृतितया 'सखे ज्ञानशर्मन्' चिरेण दृष्टोऽसि । त्वत्तो मे श्रेयः संपादकः कोऽन्योऽस्ति ? तत्कथय प्रस्तुतोचितं हितम्' इति तमन्वयुङ्क्त ।

कर्म—ततस्ततः ।

काल:—ततो ज्ञानशर्मा राजानमुपह्वरे स्वैरमित्थं बोधयामास ।

शश्वन्नश्वरमेव विश्वविदितं पापप्ररोहस्थलं
मेदोमज्जवसास्थिमांसरुधिरत्वग्रोमकूपं वपुः ।
एतस्मिन्मलमूत्रभाण्डकुहरे हेये मनीषावतां
दुःखे न्यायविदो विमोहमिह के तन्वन्ति नन्वन्तिमे ॥१३॥

विज्ञानशर्महतकस्येत्यादि—स्पष्टम् ॥ १२ ॥

शश्वन्नश्वरमेवेत्यादि—इदं वपुः शरीरं शश्वत् सदा नश्वरं ध्वंसशीलमेव विश्वविदितं जगत्प्रसिद्धं पापानां दुष्कृतानां प्ररोहस्थलमुद्गमस्थानमस्ति। किम्भूतं मेदश्च मज्जा च वसा च अस्थि च मांसञ्च रुधिरं च रोमकूपाश्च सन्ति, यत्र । मलमूत्रयोः भाण्डकुहरे गर्तसदृशे दुःखे दुःखाकरे अन्तिमे अतिनिकटे (अन्तिमः अतिनिकट इत्यमरटीकायां नीलकण्ठः) मनीषावतां बुद्धिमतां हेये इह एतस्मिन्शरीरे के न्यायविदो विद्वांसो विमोहमास्थां तन्वन्ति ननु ॥ १३ ॥

जगत्प्रोतं यस्मिन् विविध इव सूत्रे मणिगणाः
समस्तं यद्भासा तदपि च विभाति स्फुटमिदम् ।
अखण्डानन्दं यन्निरवधिकसच्चित्सुखमयं
निराकारं यत्तत्त्वमसि परमं ब्रह्म न पुमान् ॥ १४ ॥

तत्तादृशः सुखघनस्य निरञ्जनस्य
सर्वात्मनाऽपि ननु हेयतरे पुरेऽस्मिन् ।
विज्ञानशर्मवचनैर्विपरीतवृत्ते-
र्मन्ये न युक्त इव ते ममताभिमानः ॥ १५ ॥

इत्यादिभिर्बहुविधैरुपपत्तिपूर्वै-
रेतैर्वचोभिरथ तेन रहः प्रयुक्तैः ।
कोषे बले रिपुवधे च बभूव सद्यो
जीवो विरक्तहृदयो विगताभिमानः ॥ १६ ॥

कर्म—भगवन् ! इत्थं ज्ञानशर्मणोपजप्तस्यापि जीवस्य राज्ञः कथमधुना रिपुवधे प्रवृत्तिः ।

जगत्प्रोतमित्यादि—सूत्रे विविधो मणिगण इव यस्मिन् ब्रह्मणि इदं समस्तं जगत्प्रोतमपि च यद्भासा तदिदं स्फुटं विभाति (यस्य भासा सर्वमिदं विभातीति श्रुतेः) अखण्डानन्दं निरवधिकसच्चित्सुखमयं निस्सीम सच्चिदानन्दस्वरूपं निराकारं निर्विशेषं यत्परमं ब्रह्म तुर्यमस्ति तत्त्वमसि पुमान् न इति ॥ १४ ॥

तत्तादृशः सुखघनस्येत्यादि—तत्तादृशः सुखघनस्यानन्दघनस्वरूपस्य निरञ्जनस्य निर्वासनस्य विज्ञानशर्मवचनैर्विपरीतवृत्तेः भवतः अपि सर्वात्मना सर्वतो भावेन हेयतरे हातुं योग्ये अस्मिन्पुरे ममताभिमानो ममत्वमतिः न युक्त एव इति मन्ये ॥ १५ ॥

इत्यादिभिरित्यादि—स्पष्टम् ॥ १६ ॥

कालः—श्रूयताम्, इत्थं ज्ञानशर्मा राज्ञो रहस्युपजापं कुर्वन् सेनानिवेशादागतः (स्य) विज्ञानशर्मेति (विज्ञानशर्मणः) वचनमाकर्ण्य न नःपरमिह स्थातव्यमिति राजानमामन्त्र्य जगाम।

कर्म—ततस्ततः।

कालः—ततश्च निष्क्रान्ते ज्ञानशर्मणि प्रविश्य विज्ञानशर्मा राजानमालोक्य, अये, किमयमपूर्व इव राजा पुरादिषु परित्यक्ताभिमान इव दृश्यते। तद्बहुधा ज्ञानशर्मणापजापितः स्यात्। भवतु। सर्वमिदं स्वमेव व्यक्ती भविष्यति। (इति राजसमीपं गतः)।

कर्म—ततस्ततः।

कालः—राजा च तमालोक्य सावहित्थस्तमनुसरन्निव सादरमपृच्छत्। मन्त्रिन्! कथय कीदृशः पुरवृत्तान्तः परवृत्तान्तश्च इति।

कर्म—ततस्ततः।

कालः—इति राज्ञा समाज्ञप्तो नयज्ञो मन्त्रिशेखरः।
प्रत्युत्तरं तदादत्त प्रज्ञाऽवज्ञातवाक्पतिः॥ १७॥

स्वायत्तं पुरमेव नः समजनि स्वामिन्भवच्छासना-
त्तत्तद्देशनिविष्टपत्रनिचयव्यापारसंरक्षितम्।

---

(१) सावहित्थं नाम—आकारगुप्तिपूर्वकमर्थात् ज्ञानशर्मोपदेशेन जातां शरीरविरक्तिं गोपयन्निति।

इति राज्ञा समाज्ञप्त इत्यादि—स्पष्टम्॥ १७॥

—स्वायत्तमित्यादि—स्वामिन्! भवच्छासनात्तव शासनात् नः पुरं स्वायत्तं स्वाधीनमेव समजनि, किम्भूतं तत्तद्देशेषु निविष्टा विहिता ये पत्रनिचयव्यापारा आज्ञापत्रोपदिष्टा उद्योगास्तैः संरक्षितमधुना

निर्दग्धा भवतः प्रतापमहसा नूनं पतङ्गा इव
प्रत्यर्थिप्रकरा भवेयुरधुना नामावशेषाः क्षणात् ॥ १८ ॥

कर्म—ततस्ततः ।

काल:—इत्याकर्ण्य राजा ज्ञानशर्मवचोऽनुस्मरन्नुभयोर्मतयोरपि दोलायमानमानस इति कर्त्तव्यतामव्यवस्यन्नित्थमाक्षेपमुखेन व्याजहार ।

निसर्गतो ये रिपवो हि रोगा वातादिभिस्तज्जनकैः समन्तात् ।
अधिष्ठितेऽस्मिन् कुटिलैः प्रवृत्त्या स्वायत्तता हन्त! कथं पुरे नः ॥१९॥

किंच—संरक्ष्यते निजवशंवदसेवकेन
यः पाण्डुना विमतखण्डनपण्डितेन ।
सोऽयं प्रतापपरिदग्धपुरो विसर्पन्
जेयः कथं कथय संप्रति राजयक्ष्मा ॥ २० ॥

भवतः प्रतापमहसा प्रतापानलतेजसा प्रत्यर्थिप्रकराः शत्रुसङ्घाः पतङ्गा इव निर्दग्धाः सन्तः क्षणात् नामावशेषाः भवेयुः ॥ १८ ॥

निसर्गतो ये इत्यादि—ये हि रोगा निसर्गतः रिपवः (सन्ति) तज्जनकैः प्रवृत्या कुटिलैर्वक्रगतिभिर्वातादिभिर्वातपित्तश्लेष्मभिः समन्तात् अधिष्ठितेऽस्मिन्पुरे शरीरे नः अस्माकं स्वायत्तता स्वाधीनता कथं हन्त इति खेदे ॥ १९ ॥

संरक्ष्यत इत्यादि—विमतो विपक्षः प्रकृतेः स्वास्थ्यं तस्य खण्डने निराकरणे पण्डितो दक्षस्तेन, प्रतापेन प्रभावेण प्रकृतेः सर्वशरीरवर्तिना संतापानुबन्धेन परिदग्धं विशोषितं पुरं शरीरं येन, राजा चासौ यक्ष्मा चेति कर्मधारयः, यद्वा—राज्ञश्चन्द्रस्य यक्ष्मा रोगविशेषः (सोमोऽस्माकं ब्राह्मणानां राजा—इति श्रुतेः) यद्वा—यक्ष्मणां रोगाणां राजा इति राजयक्ष्मा तथा च वाग्भटः—अनेकरोगानुगतो बहुरोगपुरोगमः । राजयक्ष्मा क्षयः शोषो रोगराट् इति च स्मृतः, इति । अत्र च यक्ष्मशब्दस्य (राजदन्तादिषु परं) इत्यनेन परनिपातः ॥ २० ॥

कर्म—ततस्ततः ।

कालः—इति राज्ञो वचनमाकर्ण्य समञ्जसयुक्तिकं वचोऽब्रवीत् ।

राजन् ! श्रूयताम् ।

वातादिजा यद्यपि सर्वरोगास्तथापि तानेव विनाशयन्ति ।
यथारणेर्वह्निरुदर्चिरुद्यन्दहत्ययत्नादरणिं तमेव ॥ २१ ॥

अपन्थानं त्विति न्यायादात्मद्रोहिषु तेष्वमी ।
आत्मजेष्वपि न स्नेहमातन्वन्त्यधुना प्रभो ! ॥ २२ ॥

अतस्तदधिष्ठितमपि पुरं स्वाधीनमेवेति निश्चिनु । किंच—

स्वायत्ते नगरे तस्मिन् स्वामिपादप्रसादतः ।
जयश्रियं हस्तगतां जानातु भगवान् क्षणात् ॥ २३ ॥

कर्म—ततस्ततः ।

कालः—इत्थं मन्त्रिवरवचननिशमनेन किंचिदिव निर्वृत्तचेतसा राज्ञा मन्त्रिन् ! इयतापि कालेन पुरस्य स्वायत्तत्वे किमनेन फलं पश्यसि, इति पृष्टो मन्त्री कथयामास ।

वातादिजा यद्यपीत्यादि—यद्यपि सर्वे रोगा वातादिजाः वातादिभ्य एव उत्पद्यन्ते तथापि ते शरीरविनाशकारित्वात् पर्यन्ते तान् वातादीन् विनाशयन्त्येव । यथा अरणेः—अग्न्युत्पादककाष्ठविशेषात् सकाशात् उद्यन्नाविर्भवन् उदर्चिः उद्गतज्वालो वह्निः अयत्नात् अनायासादनवधानाद्वा तमरणिं दहति एव ॥ २१ ॥

अपन्थानमित्यादि—हे प्रभो ! "अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति" इति न्यायात् आत्मद्रोहिषु तेषु रोगेषु आत्मजेषु सत्स्वपि अमी वातादयः अधुना स्नेहं न आतन्वन्ति, इत्यन्वयः ॥ २२ ॥

स्वायत्ते नगरे तस्मिन्नित्यादि—स्पष्टम् ॥ २३ ॥

पुरस्य दार्ढ्ये योगस्य सिद्धिः सर्वार्थसाधिनी ।
अखण्डानन्दासिद्धिश्च फलं तेनैव जायते ॥ २४ ॥

कर्म—ततस्ततः ।

कालः—इत्याकर्ण्य क्षुद्राभिमानेन न भवतीष्टसिद्धिः । प्रत्युत हानिरेव फलम् । अतः स्वयमेव त्यक्तेष्वेतेषु सिद्धैवात्मनो दृढयोगसिद्धिरखण्डानन्दता च । कुत एवान्यत्र, इति वदति राजनि पुनरपीत्थं समाहितवान्मन्त्री—

प्रारब्धरहितस्यैवं भवेदेव न संशयः ।
प्रारब्धपरतन्त्रं त्वां ते मुञ्चन्ति कथं पुनः ॥ २५ ॥

किं च—

श्लथाभिमाने पुरि हन्त देवे क्षोभो भवेत्त्वत्प्रकृतिष्वकस्मात् ।
ततोऽवकाशं प्रतिलभ्य सर्वे प्रत्यर्थिनस्ते प्रबला भवेयुः ॥ २६ ॥

पुरस्य दार्ढ्ये योगस्येत्यादि—पुरस्य शरीरस्य दार्ढ्ये स्थैर्ये सति सर्वानर्थान्धर्मार्थकामरूपान्साधयति या सा सर्वार्थसाधिनी योगस्य चित्तवृत्तिनिरोधरूपस्य संप्रज्ञातसमाधेः सिद्धिः स्यात्, तेनैव च शरीरदार्ढ्येनैव च अखण्डानन्दासिद्धिः अद्वैतानन्दोपलब्धिः (जीवन्मुक्ति सुखमिति यावत्) फलं जायते। तथा च भगवन्तो गोविन्दपादाः "इति धनशरीरभोगान् मत्वाऽनित्यान् सदैव यतनीयं । मुक्तौ, सा च ज्ञानात् तच्चाभ्यासात् स च स्थिरे देहे" इति ॥ २४ ॥

(१) शरीरादिनिष्ठेन ममत्वादिना ।

प्रारब्धरहितस्यैवमित्यादि—स्पष्टम् ॥ २५ ॥

श्लथाभिमाने इत्यादि—स्पष्टम् ॥ २६ ॥

अयं भावः, अपरोक्षात्मसाक्षात्कारमहिम्ना 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन' इत्याद्युक्तदिशा अनादिकालसञ्चितं संसारनिमित्तकर्मसु दग्धेषु, वर्तमानशरीरारम्भकेषु च प्रारब्धकर्मसु भोगादेव क्षीणेषु

किं च—

यद्मणि जाग्रति तस्मिन्पाण्डुज्वरसन्निपातपरिवारे ।
देवस्य कथं भविता स्थितिरिह यत्नादपि स्वरूपेण ॥ २७ ॥

इममर्थमप्रतिहतया प्रतिभया स्वयमेव विचारयतु देवः ।

कर्म—ततस्ततः ।

कालः—तत इत्यात्मनीनानि वचनान्याकर्णयन्कुतूहलाकुलितहृदयः समरयत्नकृतत्वरः मुहुर्मुहुस्तमित्थं प्रशंसन्नवोचत्—

त्वयि दत्तभरस्य मेऽधुना किं बहुनाऽनेन विचारणश्रमेण ।
भवते ननु रोचते यथा वा यतितव्यं हि तथैव निर्विशङ्कम् ॥ २८ ॥

कर्म—ततस्ततः ।

नित्यनिरतिशयस्वस्वरूपनिष्ठा संभवति । वर्तमानशरीरारम्भकाणां प्रारब्धकर्मणां विद्यमानत्वे तु तत्पारतन्त्र्यात् शरीरे रोगाद्याक्रमणं संभवेदेव । तस्मात् ज्ञानिनाऽपि प्रारब्धक्षयवाञ्छया शरीरे ममत्वाऽभिमानो न त्याज्यः, किन्तु आसक्तिं परित्यज्य स्वकर्मानुसारं भोगादिषु प्रवृत्तिरेव उचिता । शरीराभिमानशैथिल्ये तु तत्प्रकृतिभूतेषु वातादिषु संक्षोभो भवेत्, सति च तस्मिन् अवकाशं लब्ध्वा रोगाः प्रबलाः स्युः । तदुक्तं श्रीविद्यारण्यमुनिभिः—

मिथ्यात्ववासनादार्ढ्यें प्रारब्धक्षयकांक्षया ।
अक्लिश्यन्तः प्रवर्तन्ते स्वस्वकर्मानुसारतः ।
प्रवृत्तौ वा निवृत्तौ वा देहेन्द्रियमनोधियाम् ।
न किञ्चिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः ।
सङ्गी हि बध्यते लोके निःसङ्गः सुखमेधते ।
तस्मात्सङ्गः परित्याज्य सर्वदा सुखमिच्छता ॥
अत्र सङ्ग आसक्तिः, इति ॥ २५ । २६ ॥

यद्मणीत्यादि—स्पष्टम् ॥ २७ ॥

त्वयीत्यादि—स्पष्टम् ॥ २८ ॥

कालः—ततश्च किल यदेवं देवस्य मनसो व्याकुलीभावः, स सर्वोऽपि शत्रूपजाप इति मन्तव्यम्। अतो विज्ञापयामि। तिष्ठतु दार्ढ्यं मद्वचसि, इति राजानं पर्यवस्थाप्य स्वकार्य एव व्याप्रियते।

कर्म—भगवन्! ज्ञानविज्ञानयोरेकरूपयोरिव सतोः कुत इयान्विरोधः।

कालः—वत्स! मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।
तयोर्विरोध इत्येतत्किमाश्चर्यकरं तव॥ २९॥

कर्म—भवतु नाम तयोर्विरोधः। तदेवान्तरमुपलभ्य क्रियतां च द्विषद्भिरुपजापः, ज्ञानशर्म्मणा तु स्वामिहितैषिणा विपक्षानुकूलं पुराभिमानशैथिल्यं कथमुपदिष्टम्?

कालः—नहि विपक्षानुकूलमिति, न च तदीयोपजाप इति वा प्रवृत्तिरेतस्य। किं तु वस्तुतत्त्वमुपदेष्टव्यमित्येव तस्य स्वभावः।
ज्ञानमद्वैतसन्मात्रं विपक्षस्तत्र को वद।
स्वरूपस्थितिरेतस्य स्मारिता पारमार्थिकी॥ ३०॥
मूढवद्देहतादात्म्यं राजा न प्रतिपद्यताम्।
बाधितं तद्दग्धपटन्यायेनास्त्विति तस्य धीः॥ ३१॥

मोक्षे इत्यादि—मोक्षे मोक्षप्रतिपादके शास्त्रे या धीर्बोधः, तज्ज्ञानमिति, अन्यत्र शिल्पशास्त्रे या धीः सा विज्ञानम्। एवं सति तयोर्ज्ञानविज्ञानयोर्विरोध इत्येतदाश्चर्यकरं किम्?॥ २९॥

ज्ञानमित्यादि—ज्ञानं हि अद्वैतं सन्मात्रं, सत्तामात्रञ्च। तत्र ज्ञानस्य अद्वैतभावे विपक्षः प्रतिद्वन्द्वीकः न कोऽपि इत्यर्थः। एतस्य जीवस्य पारमार्थिकी वास्तविकी स्वरूपस्थितिरनेन ज्ञानेन स्मारिता॥ ३०॥

मूढवद्देहतादात्म्यमित्यादि—राजा जीवो मूढ इव देहेन सह तादात्म्यं न प्रतिपद्यतां, किन्तु तद्देहतादात्म्यं दग्धपटन्यायेन बाधितमस्तु। यथा दग्धः पटः पुनः प्रकृतिमायाति तद्वत् पुनः अस्य देहतादात्म्यं बाधितं माभूत् इति ज्ञानशर्मणः मतिः॥ ३१॥

तदुक्तमभियुक्तैः—

बाधितं दृश्यतामक्षैस्तेन बाधो न शक्यते ।
जीवन्नाखुर्न मार्जारं हन्ति, हन्यात् कथं मृतः ॥ ३२ ॥

किं च—

मायया बहुरूपत्वे सत्यद्वैतं न नश्यति ।
मायिकानां हि रूपाणां द्वितीयत्वमसंभवि ॥ ३३ ॥

कर्म—भगवन् ! युज्यत एतत् ।

कालः—एवं च ज्ञानशर्मणोपजप्तोऽपि विज्ञानशर्ममन्त्रिमन्त्रवशात्प्रोत्साहितो राजा यदाचरिष्यति तदालोकयिष्यावहे । (भुवमलोक्य) कथं विदूषकेण सहायमागच्छति राजा, तत्रैव गच्छावः । (इति परिक्रामतः)

(ततः प्रविशति राजा विदूषकश्च)

राजा—संख्यापेततया रसानपि भृशं षट् सेवमानस्य मे,
तेष्वेवातिबुभुक्षुता प्रतिमुहुर्हा हा ! सखे ! जायते ।

बाधितमित्यादि—बाधितं वस्तु अक्षैर्दृश्यतामबाधितत्वेनाभ्युपगम्यताम्, तेनाबाधिततयाभ्युपगमेन बाधो न शक्यते, सत्यस्य वस्तुनो बाधो भवितुं नार्हति ॥ ३२ ॥

मायया इत्यादि—मायया अनिर्वचनीयस्वरूपया अघटनघटनापटीयस्या अधिष्ठानस्य बहुरूपत्वे भासमानेऽपि अद्वैतमद्वैतबुद्धिर्न नश्यति । यतो मायिकानां, विवर्तभावेन मायया भासितानां रूपाणां द्वितीयत्वममायिकत्वं (वास्तविकत्वमिति यावत्) न संभवति ॥ ३३ ॥

संख्यापेततया रसानपीत्यादि—षडपि रसान्संख्यापेततया असंख्येयतया स्थितान् (ते रसानुरसतो रसभेदास्तारतम्यपरिकल्पनया च, सम्भवन्ति गणनां समतीता इत्युक्तेः) सेवमानस्यापि मे तेष्वेव रसेषु अतिबुभुक्षुता जायते । किञ्च ममैच्छिकी व्यापृतिः इच्छायाः

एवं व्यापृतिरैच्छिकी मम यतो भुञ्जेऽन्नराशीनहं
पीयन्ते च रसालमाक्षिकदधिक्षीराज्यकुल्या मया ॥ ३४ ॥

अन्नान्येव निरन्तरं विवृणुतां सर्वाणि सस्यानि भू-
र्वारि प्रावृषि कोऽपि वर्षतु दधिक्षीरात्मकं वारिदः ।
सर्वोऽयं लवणाम्बुराशिरपि चेद्दुग्धाम्बुधिर्जायताम्
भुञ्जानस्य तथापि हन्त पिबतो न क्षुत्पिपासाशमः ॥ ३५ ॥

तदतिशयेन संपादनीयो मम पानभोजनविधिरिदानीम् ।

विदूषकः—(सहर्षम्) अज्जं एव्व एदं करणिज्जं । जेण अहं वि एदस्सिं कज्जे तुअ सहाअत्तणे दक्खो होमि । जम्मेण तु विण्णाणेण भवं मिदभोअणे सव्वदा सिक्खीआदि, तेण विण्णत्तो वि तुमं तस्स वअणं मा करेहि ।

राजा—साधु सखे ! साधु । सम्यगुपदिष्टम् । तथा करिष्ये ।

कालः—वत्स ! श्रुतं भवता ?

कर्म—श्रुतमेव । एष पाण्डुना प्रहितामपथ्यताजननीं स्वस्य बुभुक्षां न जानाति, विदूषकोऽप्यजानन्नेव भाषते ।

राजा—कः कोऽत्र भोः ।

व्यापार एवमाकारो यतोऽहमन्नराशीन् भुञ्जे तथा रसालादीनां कुल्या मया पीयन्ते । अत्र रसालः "इक्षुः-आम्रः-पौण्ड्रेक्षुः" वा इति शब्दकल्पद्रुमः । तद्रसः वा रसाला । शिखरन इति भाषायाम् ॥ ३४ ॥

अन्नान्येव निरन्तरमित्यादि—सस्यानि-फलजातानि । शेषं स्पष्टम् ॥ ३५ ॥

(१) अद्यैवैतत्करणीयम् । येनाहमपि, एतस्मिन्कार्ये तव सहायत्वे दक्षो भवामि । जाल्मेन तु विज्ञानेन भवान्मितभोजने सर्वदा शिक्ष्यते । तेन विज्ञप्तोऽपि त्वं तस्य वचनं मा कुरु ।

विदूषकः—(क) सिक्खिदो वि मए किं तुमं पडिऊलकारिणो अमच्चस्स आआरणत्थं दोआरिअं आमन्तेसि ।

राजा—वयस्य मा बिभीहि । तव मतमेवानुसरामि ।

विदूषकः—(ख) जइ एव्वं थिरपडिण्णो होहि । एदस्स अविस्सरणत्थं वसणन्ते मए बद्धो गण्ठी । अहं जेव्व तं आणेमि ।

(इति निष्क्रम्यामात्येन सह प्रविशति)

अमात्यः—सति दौवारिके राज्ञा किमर्थं त्वं प्रहितः ।

विदूषकः—(ग) एत्थ कज्जे अहं जेव्व दोवारिओ ।

अमात्यः—कीदृशे कार्ये ।

कालः—कर्मन् ! मन्त्रिणाऽपि न विज्ञाता औपाधिकी राज्ञो बुभुत्वा ।

कर्म—वाढम् ।

विदूषकः—(घ) अमच्च ! रण्णो दाणिं बहुभक्खणणामहेए उवट्ठिदे कज्जे।

मन्त्री—कीदृशी बहुभक्षणता ।

विदूषकः—(ङ) किमण्णं । बुभुक्खिदो वग्घो विअ सव्वपकिदीणं अह्माणं जीवणं भक्खिदुकामो राआ, मा खु णं णिवारेहि जं पलअकालकुविदो रुद्दो विअ चिट्ठदि ।

(क) शिक्षितोऽपि मया किं त्वं प्रतिकूलकारिणोऽमात्यस्याकारणार्थं दौवारिकमामन्त्रयसि ।

(ख) यद्येवं, स्थिरप्रतिज्ञो भव । एतस्याविस्मरणार्थं वसनान्ते मया बद्धो ग्रन्थिः । अहमेव तमानयामि ।

(ग) अत्र कार्येऽहमेव दौवारिकः ।

(१) उपाधिर्नाम शत्रुकृतप्रयोगः, तज्जन्या ।

(घ) अमात्य ! राज्ञ इदानीं बहुभक्षणनामधेये उपस्थिते कार्ये ।

(ङ) किमन्यत् । बुभुक्षितो व्याघ्र इव सर्वप्रकृतीनामस्माकं जीवनं भक्षितुकामो राजा, मा खल्वेनं निवारय यत्प्रलयकालकुपितो रुद्र इव तिष्ठति ।

मन्त्री—(विहस्य । स्वगतम्) राज्ञः पानभोजनसंपादनेस्वस्यापि तद्भविष्यतीत्येतस्य हृदयम् । (प्रकाशम्) गच्छाग्रतः । अहमप्यागमिष्यामि । (आकाशे दत्तदृष्टिः) किं न्वेतत्स्यात् ।

कार्यान्ववेक्षणविधौ सदसि स्थितेन
येन क्षमाजनि चिरं सहितुं बुभुक्षा ।
भुक्त्वा च यस्य कियदप्यशनं नितान्तं
तृप्तिर्भवेत्स कथमीदृशबुद्धिमेति ॥ ३६ ॥

कालः—अहं खलु प्राणिनामव्यस्थितामवस्थां करोमि ।

कर्म—बाढम् । अलमिदम् । अन्यदप्यचिन्तनीयं बुद्धिविलसितमिति जानामि । यत्किल—

दृष्ट्वा दक्षकृतापराधजनितक्रोधोज्झिताङ्गीं सतीं
यः शान्तस्तपसि स्थितः स गिरिशः स्वं प्रत्युपात्तायुधम् ।
कोपोद्धाटितनैटिलेक्षणपुटप्रोद्दामधूमज्ज्वल-
ज्ज्वालाजालविजृम्भणेन सहसा भस्मीचकार स्मरम् ॥ ३७ ॥

कालः—(विहस्य) शृणु तावत् ।

कार्यान्ववेक्षणविधावित्यादि—कार्याणां कोषबलादिव्यापाराणामन्ववेक्षणं पर्यालोचनमेव विधिस्तस्मिन् । शेषं स्पष्टम् ॥ ३६ ॥

दृष्ट्वेत्यादि—दक्षो नाम प्रजापतिः तत्कृतेनापराधेन शिवावमानरूपेण जनितो यः क्रोधस्तेन उज्झितमाहुतीकृतमङ्गं शरीरं यया तां सतीं दृष्ट्वा (अपि) यः शान्तः अमर्षशून्यः सन् तपसि तपश्चर्यायां स्थितः अभवदिति शेषः । स गिरिशः रुद्रः स्वं प्रति उपात्तायुधं गृहीतशस्त्रं स्मरं कामं कोपेन रुषोद्घाटितं विस्फारितं यन्नैटिलेक्षणपुटं भाललोचनपुटं तस्मिन्प्रोद्दामधूमो अत एव ज्वलन् यो ज्वालाजालो वह्निः तस्य विजृम्भणेन सहसा भस्मीचकार ॥ ३७ ॥

मारुतं यः पिबन्नेव महर्षिस्तपसि स्थितः ।
तमहं कुम्भजन्मानं तोयराशिमपाययम् ॥ ३८ ॥

मन्त्री—अति बुभुक्षया राज्ञः किमप्याशङ्कते मे हृदयम् । यथाहुर्नीतिज्ञाः—अतिबुभुक्षा राज्ञो राज्यच्युतिसूचिका, इति । (राजानं निरूप्य)

शुष्यन्त्या धृतशोषणो रसनया शश्वल्लिहन्सृक्किणी
किंचिन्मग्नविलोचनः श्रमजलक्लिद्यत्कपोलालिकः ।
आरूढभ्रुकुटीभयङ्करमुखो निश्वासदूनाधरो
दृष्ट्या कूणितया विलोकयति मामायान्तमेवान्तिके ॥ ३९ ॥

(उपसृत्य) जयतु जयतु देवः ।

राजा—उपविश्यताम् । (इत्यासनं निर्दिशति)

विदूषकः-(क) वअस्स ! मए गहिदत्थो किदो अमच्चो ।

राजा—अमात्य ! सञ्जीक्रियतामनेनोक्तं सर्वमपि ।

मन्त्री—किमियमपूर्वा बुद्धिर्देवस्य विजृम्भते ससंरम्भम् ।
ननु कुर्वे यदिदानीमनेन दुर्मेधसा कथितम् ॥ ४० ॥

मारुतमित्यादि—स्पष्टम् ॥ ३८ ॥

शुष्यन्त्या धृतशोषण इत्यादि—शुष्यन्त्या रसनया धृतशोषणे शुष्यन्ती सृक्किणी ओष्ठप्रान्तभागौ "सृक्कणी ओष्ठयोः प्रान्तभागः, इति पाणिनिः, इत्यमरटीकायां भैरवः" । शश्वल्लिहन्, किञ्चिन्मग्ने निमीलिततारके विलोचने यस्य, श्रमजलेन स्वेदोदकेन क्लिद्यन्तौ आर्द्रौ कपोलौ अलिकं ललाटञ्च यस्य "अलिकं ललाटञ्च इत्यमरः" । आरूढा उन्नमिता या भ्रुकुटिः तया भयङ्करं भीषणं मुखं यस्य, निश्वासेन दूनः क्लान्तः अधरो यस्य सः । कूणितया कुञ्चितया एव दृष्ट्या अन्तिके आयान्तं मां विलोकयति ॥ ३९ ॥

(क) वयस्य ! मया गृहीतार्थः कृतोऽमात्यः ।

किमियमपूर्वा इत्यादि—स्पष्टम् ॥ ४० ॥

विदूषकः-(ख) दाणिं वअस्स ! तुमं जेव्व मह सरणं, जं कुविदो अमच्चो ।

राजा-अलं चापलेन ।

मन्त्री-तिष्ठ तूष्णीम् । जानामि ते दौष्ट्यम् ।

(विदूषको लज्जितस्तिष्ठति)

मन्त्री-(स्वगतं विचिन्त्य)

स्यादेतत्किं नात्र पश्यामि हेतुं, राज्ञो न क्षुद्राज्यविभ्रंशचिह्नम् ।
अस्य श्रेयःसिद्धये बद्धकक्षः किं नाहं स्यां किं न मे स्वामिभक्तिः ॥ ४१ ॥

परं त्वेवं निश्चिनोमि द्विषद्राजमन्त्रिणा पाण्डुना कृतमिदं वैकृतमिति । भवतु । अस्य चित्तं बहुभक्षणायत्तमन्यत्र व्याक्षिप्तामि । स एवास्य प्रतीकारः (प्रकाशम्) प्रासादस्योपरि चलतु देवः । तत्रैवं संपाद्यते महती वृत्तिः ।

राजा-बाढम् ।

(सर्वे प्रासादाधिरोहणं नाटयन्ति)

विदूषकः-(ग) (सर्वतो विलोक्य) भो वअस्स ! किं एदं भासिणीपाआरे अपुव्वं कि वि दीसइ ।

राजा-अमात्य ! किमिदम् ।

कर्म-भगवन् काल ! सन्ति खलु शरीरे भासिनीप्रभृतयः सप्त त्वचः । तत्र त्वग्रूपप्रथमप्राकारे सिध्मकपद्मककण्टका नाम

(ख) इदानीं वयस्य ! त्वमेव मम शरणम् । यत्कुपितोऽमात्यः ।

स्यादेतत्किमित्यादि—सरलम् ॥ ४१ ॥

(ग) वयस्य ! किमेतद्भासिनी प्राकारेऽपूर्वं किमपि दृश्यते ।

त्रयो रोगाः पाण्डुना प्रहिता दृश्यन्ते । तान्विदूषको राजा च न वेत्ति, अतः पृच्छति ।

कालः—सत्यमेवेदम् ।

मन्त्री—राजन् ! सिध्मकपद्मकण्टकाः ।

विदूषकः—(क) (सभयम्) वअस्स ! एदाणं एदे भटाः पहारं कुणन्ति तदो ते वि अह्माणं उवरि पडिस्सान्ति । ता अस्मदो सिग्धं पलाअणं करेह्म ।

मन्त्री—विदूषक ! मा भैषीः ।

गुञ्जाफलाग्निलेपः प्रतियोद्धा सिध्मपद्मयोः समरे ।
एष हरिद्राक्षारः कण्टकहृतये मया प्रहितः ॥ ४२ ॥

राजा—सुष्ठुकृतममात्येन ।

कालः—गुञ्जाफलाग्निलेपहरिद्राक्षारानौषधिविशेषान्प्रहरतो दृष्ट्वा विदूषको ब्रवीति ।

कर्म—एवमेतत् ।

विदूषकः—(ख) अज्ज ! को एसो ।

मन्त्री—व्यङ्गनामा रोगः (ग)

(क) वयस्य ! एतेषामेते भटाः प्रहारं कुर्वन्ति, तदा तेऽप्यस्माकमुपरि पतिष्यन्ति, तदस्माच्छीघ्रं पलायनं कुर्मः ।

गुञ्जाफलाग्निलेपः इत्यादि—स्पष्टम् । गुञ्जादिलेपश्च रसराजसुन्दरे, "गुञ्जाफलाग्निचूर्णं च लेपनं श्वेतकुष्ठजित्" इति ॥ ४२ ॥

(ख) आर्य, क एषः ।

(ग) तत्र व्यङ्गो नाम मुखे जायमानः नीरुक्तनुः श्यावश्च मण्डलः ।

अभिमुखमवेक्षमाणः शशरुधिरालिप्ततनुरिमं हन्तुम् ।
तिष्ठति मुखमावृण्वन् मञ्जिष्ठाप्रमुखसाधनो लेपः ॥ ४३ ॥

विदूषकः–(ग) किं एदं मल्लाणं आजोहणं विअ जं रत्तप्पवाहो दीसइ ।

मन्त्री–वैधेय ! शस्त्रधाराक्षुण्णं प्रवहति पुरो न रक्तं यत् ।
तव मूढ़तां धिगेष प्राकारो लोहिनी नाम ॥ ४४ ॥

कालः–त्वग्रूप एष द्वितीयः ।

कर्म–तथैव ।

विदूषकः–(घ) अहो पमादो । सुवेदाए उवरि सव्वत्थ गअ-कण्णा वित्थिण्णा ।

कालः–कर्मन् ! श्वेतनाम्नि तृतीयत्वक्प्राकारे चर्मदलं नामरोगं पृच्छति विदूषकः ।

राजा–क एते संवर्तन्ते श्वेतायाम् ।

मन्त्री–देव ! योधेन तत्रापि नियुक्तेन मया पुरा ।
आम्रपेश्यभिधानेन लेपेनाक्रम्य भूयते ॥ ४५ ॥

अभिमुखमित्यादि—स्पष्टम् । मंजिष्ठादिलेपश्चायम् "रक्तचंदन-मञ्जिष्ठाकुष्ठलोध्रप्रियङ्गवः । वटाङ्कुरा मसूराश्च व्यङ्गघ्नाः मुखकान्तिदाः ॥ व्यङ्गानां लेपनं शस्तं शशस्य रुधिरेण च ॥ ४३ ॥

(ग) किमेतन्मल्लानामायोधनमिव, यद्रक्तप्रवाहो दृश्यते ।

वैधेय–इत्यादि—हे वैधेय ! मूर्ख ! यत्पुरो दृश्यते तत् शस्त्रधारया क्षुण्णं रक्तं न प्रवहति । तव मूढ़तां धिक् । एष लोहिनीनाम प्राकारः ॥४४॥

(घ) अहो प्रमादः । श्वेताया उपरि सर्वत्र गजकर्णा विस्तीर्णाः ।

देवेत्यादि—हे देव ! तत्रापि मया पुरा नियुक्तेन योधेन आम्र-पेश्यभिधानेन लेपेन आक्रम्य भूयते । अर्थात् आम्रपेश्यभिधानो लेपः चर्मदलं पराभवितुं सन्नद्धोऽस्ति, इति ॥ ४५ ॥

विदूषकः–(ङ) वअस्स ! पेक्ख एत्थ का वि दुद्धतरङ्गिणी वि अ वहइ, ता अञ्जलीहिं गेह्निअ पिब ।

मन्त्री–धिगौदर्य ! सर्वत्राभ्यवहारभ्रान्तिः । भ्रान्त !

नेयं दुग्धतरङ्गिणी प्रवहति श्वित्रोऽयमिन्दुप्रभः
प्राकारं किल तुर्यतामुपगतं ताम्राख्यमाक्रामति ।
संरम्भो भवतो वृथा स्मरयसे किं त्वं तृषं विस्तृतां
पातुं शक्यत एष किं तव ततो मौढ्यं त्वयाऽऽविष्कृतम् ॥४६॥

(इति सभ्रूक्षेपं तर्जयते)

राजा–क एनमभिसरति ।

मन्त्री–एष मया नियुक्तो महातालेश्वरः ।

कालः–कर्मन् ! ओषधिविशेषोऽयम् ।

विदूषकः–(क) अथ वेदिणी लोहिदाणं उवरि के वि उल्लुठअन्तो विअ दीसन्ति ।

(ङ) वयस्य ! पश्यात्र कापि दुग्धतरङ्गिणीव वहति । तदञ्जलिभिर्गृहीत्वा पिब ।

(१) औदर्य—उदरम्भरे !

नेयमित्यादि—इयं दुग्धतरङ्गिणी क्षीरनदी न प्रवहति किन्तु असौ इन्दुप्रभः नाम सितच्छविः श्वित्रो नाम रोगः तुर्यतामुपगतं चतुर्थसंख्याकं ताम्राख्यं प्राकारमाक्रामति किल भवतः संरम्भः लौल्यं वृथा, त्वं किं विस्तृतां तृषं स्मरयसि । एष किं त्वया पातुं शक्यते ततस्त्वया तव मौढ्यमाविष्कृतमिति ॥ ४६ ॥

(२) अयं योगोऽस्य ग्रन्थस्य परिशिष्टांशे लिखितोऽस्माभिरिति तज्जिज्ञासुभिस्तत एव द्रष्टव्यः ।

(क) अथ वेदिनीलोहितयोरुपरि केऽप्युल्लुठन्त इव दृश्यन्ते ।

मन्त्री—सर्वेऽपि कुष्ठा गलगण्डादयश्च नृत्यन्ति ।

कर्म—भगवन् ! वेदिनीलोहिते पञ्चमीषष्ठ्यौ त्वचौ । तत्र कुष्ठादेरुत्पत्तिः ।

कालः—अस्त्येतत् ।

विदूषकः—(क) एत्थ उण थूलाणाम्मि सत्तमे पाआरे को वि लोहआरभत्थिआ विअ पूरिज्जमाणसरीरो दीसइ ।

मन्त्री—स्थूलायां विद्रधिरेष शत्रुमल्लः ।

विदूषकः—(सभयं संस्कृतमाश्रित्य)

प्राकारसप्तकमपि प्रसभं गृहीत्वा
खेयानि सप्त च विशोष्य तथैव कोषान् ।
उल्लुण्ठयिष्यति रिपोर्निवहो भटानां
म्लायँस्त्वमन्ध इव मूढ इव स्थितोऽसि ॥ ४७ ॥

राजा—धिक् प्रमादम् । हन्त विज्ञानशर्म्मन् ! आक्रान्तमेवारिभिरान्तरम् ।

मन्त्री—देव ! धीरो भव । यदि नाहं प्राणिष्यंस्तादिदमभविष्यत् ।

विदूषकः—(ख) (सकोपोपहासम्) एदं पच्चक्खं खु वट्टइ । तुमं उण अणुमाणेण एदं णत्थित्ति वण्णेसि । ता अच्चरिअं

(क) अत्र पुनः स्थूलानाम्नि सप्तमे प्राकारे कोऽपि लोहकारभस्त्रिकेव पूर्यमाणशरीरो दृश्यते ।

प्राकारसप्तकमपीत्यादि—प्राकारसप्तकं सप्त त्वचः प्रसभं बलाद्गृहीत्वा सप्त खेयानि रसादिधातुरूपसप्तपरिखा विशोष्य कोषानन्नप्राणमनोविज्ञानानन्दमयान् वेदान्तप्रसिद्धान्पञ्च कोषान् एष रिपोर्भटानां निवहः समूहः उल्लुण्ठयिष्यति । शेषं स्पष्टम् ॥ ४७ ॥

(ख) एतत्प्रत्यक्षं खलु वर्तते । त्वं पुनरनुमानेनैतन्नास्तीति वर्णयसि । तदाश्चर्यं ।

तक्को विण्णाणसम्ममन्तिणो । वअस्स आकण्णेहि मे वअणं। एसो अमच्चो एव्व सव्वदुवारेसु सत्तुहिं आकन्तेसु भिक्खुवेसं गेह्निअ पलाइस्सदि । तुह पुणो दुल्लहो मोक्खो । ता एहि । सुरङ्गादुवारेण तुमं णइस्से । (इत्युत्थाय सर्वतो विलोक्य) हद्धी हद्धी । किं करोमि मन्दभाग्गो । जलमत्तं वि कहिं वि ण दीसइ । सत्तापि जं परिहाओ रित्ताओ विअ दीसन्ति । (पुनर्दृष्ट्वा) वअस्स ! किं एदं इन्द्रजालं विअ दीसइ, जं सत्तावि परिहाओ दाणिं एव्व सुक्काओ पुणो वि अपरिमिदरसाओ दीसन्ति । कधं इमाओ उत्तारिअ गच्छह्म ।

राजा—अमात्य! श्रुतमेतस्य वचनम् ।

मन्त्री— एतन्न किंचन ततस्तव मास्तु भीति-
रोजायितं रिपुजनस्य निरीक्ष्य किञ्चित् ।
यत्खेयपूरणविशोषणयोः समर्थं
तन्मूलमेव हि विजृम्भणमप्यरीणाम् ॥ ४८ ॥

तर्को विज्ञानशर्ममन्त्रिणः । वयस्य ! आकर्णय मे वचनम् । एषोऽमात्यः सर्वद्वारेषु शत्रुभिराक्रान्तेषु भिक्षुवेषं गृहीत्वा पलायिष्यते । तव पुनर्दुलभो मोक्षः । तदेहि सुरङ्गाद्वारेण त्वां नेष्ये । हा धिक् हा धिक् । किं करोमि मन्दभाग्यः । जलमात्रमपि कुत्रापि न दृश्यते । सप्तापि यत्परिखा रिक्ता इव दृश्यन्ते । वयस्य ! किमेतदिन्द्रजालमिव दृश्यते यत्सप्तापि परिखा इदानीमेव शुष्काः पुनरप्यपरिमितरसा दृश्यन्ते । कथमिमा अवतीर्य गच्छामः ।

एतन्नेत्यादि—एतत् विदूषकस्य व्याकुलं वचनं किंचन न गण्यम् इत्यर्थः । ततः रिपुजनस्य रोगसमूहस्य किञ्चित् ओजायितं विक्रमं पराक्रमं निरीक्ष्य तव भीतिर्भयं मास्तु । खेयाणां परिखाणां पूरणे विशोषणे च समर्थं यदपि अरीणां विजृम्भणं तदपि तन्मूलम् एव हि अर्थात् भवद्भयनिमित्तमेव ॥ ४८ ॥

अपि च—

रिपवो लब्ध्वा मार्गं रसादिपरिखाः प्रकोप्य तन्मूलम् ।
देव ! भवन्ति यथेष्टं पुरमुल्लुण्ठयितुमीशानाः ॥ ४६ ॥

कालः—रसरक्तमांसमेदोऽस्थिमज्जशुक्ररूपाः परिखात्वेन निरूपिताः।

कर्म—एषां[१] वृद्धौ[२] श्लेष्मविद्रधिरक्तविसर्पादयो भवन्ति । कार्श्ये तु रौक्ष्यश्रमशोषादयः ।

कालः—युक्तं भवतोक्तम् ।

मन्त्री—एवमेते स्वामिकार्ये बद्धपरिकरा यतन्तु नाम । सन्त्येवैषां प्रतीकारशस्त्राण्यस्मदायत्तानि ।

विदूषकः—किं एसा वादाली विअ मह्ह अक्खीणिं आउलेदि (क) ।

राजा—अहो प्रचण्डोऽयमनिलः । तथा हि—

ताराश्च्यावयितुं घनान्विकिरितुं कृत्वार्कतूलोपमा-
न्भित्वा पातयितुं भुवि क्षितिभृतां तुङ्गानि शृङ्गाणि च ।
सद्यः शोषयितुं समुद्रमवनीं कर्तुं तु पांस्वात्मना-
द्रागुन्मूल्य च भूरुहान्भ्रमयितुं शक्तो भवत्यम्बरे ॥ ५० ॥

रिपवो लब्ध्वा मार्गमित्यादि—देव ! रिपवः तन्मूलं त्वद्भयनिमित्तं मार्गमवकाशं लब्ध्वा रसादिरूपाः परिखा विशोष्य पुरं यथेष्टं उल्लुण्ठयितुं ईशानाः समर्थाः भवन्ति ॥ ४६ ॥

(१) तदुक्तं वाग्भटे—रसोऽपि श्लेष्मवत् रक्तं विसर्पप्लीहविद्रधीन् इत्यादि ।

(२) कार्श्ये—क्षये, तदुक्तं वाग्भटे—"रसे रौक्ष्यं श्रमः शोषो ग्लानिः शब्दासहिष्णुता" इत्यादि ।

(क) किमेषा वातालीव ममाक्षिणी आकुलयति ।

ताराश्च्यावयितुमित्यादि—स्पष्टम् ॥ ५० ॥

मन्त्री–अयमेव वृद्धिशोषहेतुः परिखाणाम् । एतमुपजीव्योत्कु-प्यन्ति शुष्यन्ति च सर्वतः परिखाः ।

विदूषकः–किं मूढो विअ पेक्खसि । करेहि एदाणं पडीआरं । (क)

मन्त्री–अदृष्ट्वा किमेव प्रलपसि ।

विदूषकः–(उष्ट्रग्रीविकया विलोक्य) अच्चरिअं अच्चरिअं । एत्थ सत्तासत्ति वट्टइ । वड्ढन्तेसु सत्तुसु एदे वीरा रोअउलं पहरन्दि (ख)

मन्त्री–तत्र श्लेष्मप्रभृतीन रसपुत्रांश्चन्द्रप्रभा प्रहरति ।

विदूषकः–कहं इत्थि अवि सूराअदि (ग)

मन्त्री–रक्तपुत्राणां विसर्पप्लीहप्रभृतीनाममृतागुग्गुलु च तृ(ण)-पञ्चकादयः प्रहर्तारः । तथा मांसपुत्राणां शाखोटकतैल-प्रभृतयः । मेदसः पुत्राणां कफकेसरिप्रभृतयः ।

---

(१) एनं वातमेवोपजीव्य ।

(क) किं मूढ इव पश्यसि । कुर्वेतेषां प्रतीकारम् ।

(ख) आश्चर्यमाश्चर्यम् । अत्र शस्त्राशस्त्रि वर्तते । वर्धमानेषु शत्रुषु एते वीरा रोगकुलं प्रहरन्ति ।

(ग) कथं स्त्री अपि शूरायते ।

(२) अयं योगोऽस्य ग्रन्थस्य परिशिष्टांशे लिखितोऽस्माभिस्त-ज्जिज्ञासुभिस्तत एव द्रष्टव्यः ।

(३) तृणाख्यः पित्तजिद्दर्भः काशेक्षुशरशालिभिः ।

(४) मांसपुत्राणां—मांसजन्यानाम् गण्डार्बुदादीनां । तदुक्तं वाग्भटे "मांसगण्डार्बुदग्रन्थिः" इत्यादि ।

(५) गण्डमालापहं तैलं सिद्धं शाखोटकत्वचा इति "शाखोटकत्वचा स्वरसकल्करूपया, सुश्रुतेऽप्युक्तं "शाखोटकस्वरसेन सिद्धं तैलं हितं नस्यविरेचनेषु ।

(६) मेदसः पुत्राणां—मेदोजन्यानां श्रमस्वासादीनाम् । तदुक्तं वाग्भटे—"तद्वन्मेदस्तथाश्रमं—अल्पेपि चेष्टिते श्वसन्" इति ॥

कालः-कर्मन्, एवं वातपित्तकफेषु वात एको रसरक्तमांसादिधा-
तूनां शोषकः पोषकश्च ।

कर्म-एवमेवैतत् । धातूनां प्रकोपे धातुकार्श्ये च भिषजो वदन्ति
'कटुकादयो मांसवृद्धिहेतवः' इति

कटुकाद्वर्धते मांसं कषायाच्छोणितो रसः ।
लवणाद्वर्धते ह्यस्थि मज्जा त्वम्लात्प्रवर्धते ।
मधुराद्वर्धते शुक्रं तिक्तान्मेदः प्रवर्धते ॥

विदूषकः-(परिवृत्यावलोकितेन) अज्ज एदं होदु जुज्झदंसणम् ।
पेक्खदु भवं पुरट्ठिदं अच्चरिअं (क)

राजा-आर्य्य, किमेतत्पश्यसि ।

मन्त्री-(विहस्य) पश्याम्येतत् ।

एतत्पङ्गुद्वितयमनिलश्चारयत्याशयेषु
त्रिष्वश्रान्तं जरठगणिका काचिदेषा पुरस्तात् ।
आजान्वग्रप्रविततकुचा लोभयन्ती प्रसूते
हन्तानर्थाङ्कुरमनुगता सर्वदा देहभाजाम् ॥ ५१ ॥

कालः-सम्यगुक्तं मन्त्रिणा, यत्पित्तकफौ पङ्गू इति भिषक्प्रसिद्धिः[१] ।

(क) अद्यैतद्भवतु युद्धदर्शनम् । पश्यतु भवान्पुरः स्थितमाश्चर्यम् ।

एतत्पङ्गुद्वितयमित्यादि—त्रिष्वाशयेषु आमपच्यमानपक्वाशयेषु अनिलः एतत् पङ्गुद्वितयं पित्तकफौ चालयति प्रेरयति । आजान्वग्रं जान्वग्रभागपर्यन्तं प्रविततौ लम्बमानौ कुचौ यस्याः सा एषा काचित् जरठगणिका वृद्धवेश्या अप्रथ्यतेति यावत्, लोभयन्ती सती देहभाजां सर्वदानुगता अनर्थाङ्कुरं प्रसूते, हन्तेति खेदे ॥ ५१ ॥

(१) इति भिषक्प्रसिद्धिर्यथा "पित्तं पङ्गुः कफः पङ्गुः पङ्गवो मलधातवः । वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्" इति ।

आशयेष्विति कफपित्तवातानामाशया विवक्षिताः। अपथ्यतां जरठगणिकेति निरूपयन्ति। अनर्थाङ्कुर इति च तत्प्रभवरोगसमुदयम्।

कर्म—साधु निरूपितम्।

राजा—किमिदमप्यरिभिरेवं कृतम्।

मन्त्री—कः सन्देहः। श्रूयताम्—

पाण्डुः स्वस्य निशम्य मत्सरमुखात्तूलायितं विक्रमम्
सेर्ष्यो मामकवाचिकेन हृदये राज्ञा निषिद्धोऽपि सन्।
प्रज्ञागर्ववशान्मदीयविजये जाताभिलाषोऽब्रवी-
दित्थं सान्त्वमपथ्यतां निजकुले स्नेहप्रकर्षान्विताम्॥ ५२॥

विदूषकः—कहं सन्तं उत्तवन्तो पाण्डू (क)

मन्त्री—एवम्।

अय्यस्मत्कुलपक्षपातिनि यथाकामोपभोगप्रदे!
किं नात्मप्रभवं कुलं गणयसि प्रक्षीयमाणं शनैः।

पाण्डुः स्वस्येत्यादि—पाण्डुर्मत्सरमुखात्स्वस्य विक्रमं कामादिना चित्तविक्षेपरूपं तूलायितं तूल इव विनष्टं निशम्याकर्ण्य मामकवाचिकेन मदीयसन्देशेन हृदये सेर्ष्यं ईर्ष्यान्वितः सन् राज्ञा यक्ष्मणा निषिद्धोऽपि प्रज्ञागर्ववशान्मदीयविजये जाताभिलाषः सन् निजकुले रोगसमूहे स्नेहप्रकर्षान्वितां अपथ्यतां सान्त्वं शमपूर्वं यथा तथा इत्थमब्रवीत्॥ ५२॥

(क) कथं सान्त्वमुक्तवान्पाण्डुः।

अय्यस्मत्कुलपक्षपातिनीत्यादि—अयि! अस्मत्कुलपक्षपातिनि! किञ्च कामोपभोगप्रदे यथाऽभिलषितप्रदायिनि! आत्मप्रभवं त्वत्तः संभवत् कुलं सर्वेऽप्यामया अपथ्यप्रभवाः अपथ्यं नाम—नानाविधमहितसेवनम्, तच्चाऽऽमनन्त्येव रोगकारणत्वेनाऽऽचार्याः। यथा—"सर्वे

औदासीन्यमिदं कुतस्तव विनोपेक्षां यदि व्यापृता
त्वं नालं बलवानपि प्रभुररिः स्थातुं कुतोऽस्यानुगाः ॥ ५३ ॥

अतस्त्वां विज्ञापयामि । संप्रति शत्रुपुरं प्रविशन्ती तत्तदभिमतेन तेन तेन रसेनाशयगतानस्मत्कुलकारकान्रसवाहिनीभिर्नाडीभिश्च पोषयन्ती राजानमपि स्ववशं नयन्ती भेदय विज्ञानहतकात् इत्युपदिश्य मन्दाग्निना सह प्रेषितवान् ।

विदूषकः—अच्चरिअं एदाए दूतत्तणं जाए पङ्गुणो वि चालिदा । पेक्ख, दाणिं वि किं वि मन्तअन्ती चिट्ठदि । सुणाहि दाव तुह्वीओ भविअ । (क)

ततः प्रविशन्त्यपथ्यतया सह मन्दाग्निवातकफपित्ताः)

मन्दाग्निवातकफपित्ताः—अयि रसवति, किमु वक्तव्यमस्मदीया रोगा इति । यतस्त्वत्संततिः खल्वेते । त्वयैव वशीकृतेऽस्मिन् राजनि एतत्पुरे सुकरस्तेषां प्रवेशः । वयं तु तत्र निमित्तमात्रम् ।

कालः—कर्मन्, रसवतीत्यपथ्यतया नामान्तरेण भवितव्यम् ।

कर्म—रुचिमतीत्यप्येतस्या नाम ।

विदूषकः—एसा ताडआ विअ भीसणा अणुवट्टदि । (ख)

पामेवरोगाणां निदानं कुपिता मलाः । तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् इति । शनैः क्रमशः प्रक्षीयमाणं विनश्यत् किन्न गणयसि ? इदमेतादृशं तव औदासीन्यं कुतः—यदि त्वमुपेक्षां विना अपेक्षमाणा सती व्यापृता व्यापारे सन्नद्धा स्या इति शेषः । तर्हि बलवानप्यरिः स्थातुं (अस्मत्समक्षमिति शेषः) नालं प्रभुर्नात्यर्थं समर्थः, अस्यानुगास्तु पुनः कुतः ? ॥ ५३ ॥

(क) आश्चर्यमेतस्या दूतत्वं यया पङ्गवोऽपि चालिताः । पश्येदानीमपि किमपि मन्त्रयन्ती तिष्ठति । शृणु तावत्तूष्णीको भूत्वा ।

(ख) एषा ताडकेव भीषणानुवर्तते ।

मन्त्री—राजा चाहं च रामलक्ष्मणाविव वर्तावहे ।

विदूषकः—अहं वि कोसिओ विअ (क)

राजा—(विहस्य) तादृक्प्रभावो महर्षिः खलु भवान् ।

विदूषकः—भो वअस्स, एसो अमच्चो एदाए मं बलिं दाऊण अप्पाणं मोचेदुं अहिलसन्तो विअ दीसइ । दाणिं भवं जेव्व मह सरणम् । (ख)

मन्त्री—वैधेय ! क्षणं तूष्णीं तिष्ठ । शृणुमः शेषमपि वचनमेषाम् ।

वातादयः—अयि रुचिमति !

त्वां वीक्ष्य जागरूकां तस्यां तस्यां रुचौ (चि) प्रविष्टायाम् ।
स्वत एव म्रियतेऽसौ विज्ञानादञ्जसा राजा ॥ ५४ ॥

राजा—आलापादेतेषां कुलालदण्डावघट्टनादिव मे ।
हृदयं भ्रमतीदानीं सहसा चक्रमिव किं न्वेतत् ॥ ५५ ॥

विदूषकः—अण्णं किम् । दिढं खु णिग्गिहीदोऽसि तुमं एदाए अपत्थदापिसाचिआए । अहं उण छव्वेदो बह्मणो होमित्ति सज्झसेण इमाए विसज्जिदो ह्मि । (ग)

(क) अहमपि कौशिक इव ।

(ख) भो वयस्य ! एषोऽमात्य एतस्यै मां बलिं दत्वा आत्मानं मोचयितुमभिलषन्निव दृश्यते । इदानीं भवानेव मम शरणम् ।

त्वामित्यादि—प्रविष्टायां तस्यां तस्यां नानाविधायां रुचौ जागरूकां सावधानां त्वामपथ्यतां वीक्ष्य राजा जीवः विज्ञानात्स्वत एव अञ्जसा द्राक् म्रियते ॥ ५४ ॥

आलापादेतेषामित्यादि—कुलालदण्डावघट्टनादिव कुम्भकृद्दण्डचालनादिव एतेषामपथ्यतादीनामालापात् मिथः संलापात् इदानीं सहसा चक्रमिव मे हृदयं भ्रमति, एतत्किम् ? यथा—कुलालदण्डचालितं चक्रं भ्रमति तथा मे हृदयमिति भावः ॥ ५५ ॥

(ग) अन्यत्किम् । दृढं खलु निगृहीतोऽसि त्वमेतया अपथ्यतापिशाचिकया । अहं पुनः षड्वेदो ब्राह्मणो भवामीति साध्वसेनानया विसर्जितोऽस्मि ।

मन्त्री—(विहस्य) षड्वेदा इत्यनया संख्ययैव सूचितं वेदविज्ञानम्।
राजा—किं विस्मृतं त्वया, यत्प्रागेव मम मनीषितार्थं विदूषकेण बोधितोऽसि।

मन्त्री—(स्वगतम्) अहो त्रुटितसंघटितायाया दास्या विलासितं यदियन्तं कालं विस्मृतापि बुभुत्सा स्मृता सती राज्ञो हृदयमाकुलयति (प्रकाशम्) तदप्यग्रे भविष्यति। देवेन तु एतद्वैरिप्रयुक्तमिति निश्चित्य तद्वशे न भवितव्यमिति बहुशः प्रार्थये।

राजा—(सबहुमानम्) तथ्यं तथ्यं चाह भवान्। तदहमवहितोऽस्मि।

विदूषकः—(क) को एसो विज्जुपुञ्जो विश्र धगधग्गअम्माणो सव्वदो वि मह अच्छी आउलेदि।

मन्त्री—परिवारपरिवृतो ज्वरराज एषः। यमेनमुपरुध्य सर्वेऽपि रोगाः प्रहरन्ति। अत एवायं राजपदभागिति भिषग्व्यवहारः।

कर्म—युक्तमाह मन्त्री। तथा हि—

ज्वरो रोगपतिः पाप्मा मृत्युरोजोऽशनोऽन्तकः।
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः॥ ५७॥
जन्मान्तयो मोहमयः संतापात्मापचारजः।
विविधैर्नामभिः क्रूरो नानायोनिषु वर्तते॥ ५८॥

कालः—कर्मन्! नानायोनिष्विति सुष्ठूक्तं त्वया।

पाकलस्तद्यथेभानामभितापो हयेषु च।
वान्तादानामलर्कः स्यान्मत्स्येष्विन्द्रमदः स्मृतः॥ ५९॥

(क) क एष विद्युत्पुञ्ज इव धगधगायमानः सर्वतोऽपि ममाक्षिणी आकुलयति।

ज्वरो रोगपतिरित्यादि—स्पष्टम्॥ ५७॥
जन्मान्तयं इत्यादि—स्पष्टम्॥ ५८॥
पाकलस्तद्यथेत्यादि—स्पष्टम्॥ ५९॥

ओषधीषु तथा ज्योतिश्चुणपा धान्यजातिषु ।
जलेषु नीलिका भूमावूषो नृणां ज्वरो मतः ॥ ६० ॥

राजा—पश्य सखे ! पश्य ।

त्रिकूटाद्रेः कूटैस्त्रिभिरिव शिरोभिः प्रतिभयो
दिशः पश्यन्दृग्भिः शशरुधिरसोदर्यरुचिभिः ।
त्रयाणां पादानां तृणतरुसमुच्छ्रायजयिना—
मयं न्यासैर्भूमिं नमयति गदानामधिपतिः ॥ ६१ ॥

कालः—कर्मन् ! पश्यायं यस्मिन्नुदेष्यति तस्य जनस्य ।

आलस्यमश्ममयतां पुलकोद्गमं च
गात्रे करोति न रतिं क्वचिदातनोति ।
जाताश्रु जृम्भयति सन्निविघूर्णमल्प—
प्राणं तमम्बु च पिपासयतेऽनुवेलम् ॥ ६२ ॥

ओषधीषु तथा इत्यादि—स्पष्टम् ॥ ६० ॥

त्रिकूटाद्रेरित्यादि—त्रिकूटाद्रेः त्रिकूटशिखराख्यगिरेः कूटैः शिखरैरिव स्थितैः त्रिभिः शिरोभिः प्रतिगतं भयं यत्र स भयङ्करः, अयं गदानां रोगाणामधिपतिः 'ज्वर इति यावत्' शशरुधिरस्य सोदर्याः सदृशाः रुचयो यासां ताभिः शशरुधिरसोदर्यरुचिभिः दृग्भिः दिशः पश्यन् सन् तृणतरूणां समुच्छ्रायानां समुत्सेधानां जयिनां तिरस्कुर्वतां तत्सदृशामिति यावत् । त्रयाणां पादानां न्यासैर्भूमिं नमयति अधो गमयति ॥ ६१ ॥

(१) भविष्यतो ज्वरस्य पूर्वरूपाणि निबोधेति यावत् ।

आलस्यमित्यादि—गात्रे आलस्यम्, अश्ममयतां गुरुतामित्यर्थः । तथा पुलकोद्गमं च उद्भिन्नरोमाञ्चताञ्च करोति, किञ्च क्वचित् रतिं नातनोति, तथा जाताश्रु सन्निविघूर्णं च यथा तथा जृम्भयति । किञ्च अल्पप्राणं तं अनुवेलं प्रतिक्षणं अम्बु पिपासयते ॥ ६२ ॥

कर्म-एवमेतत् । अपि चानेनाविष्टः ।

यद्भक्ष्यमम्लकटुतिक्तमपेक्षते त-
न्न स्वादु खादति च सूर्च्छयते हितोक्तम् ।
जङ्घां विवेष्टयति हुंकृतिमादधाति
बालेषु न क्वचन दर्शयते रुचिं च ॥ ६३ ॥

विदूषकः-(क) दिट्ठी वि ण पहुवादि णं पेक्खिदुं ।

मन्त्री-एष ज्वरोऽपि[२] यक्ष्मराजसखः ।

क्रोधनारोचकाध्मानैस्त्रिभिः पुत्रैरुपैधते ।
भार्यया पञ्चविधया ग्रहण्यभिधया सह ॥ ६४ ॥

---

(१) ज्वरस्य पूर्वरूपाणि दर्शयति इति भावः ।

यद्भक्ष्यमित्यादि—अम्लकटुतिक्तम् अम्लकटुतिक्तरसभूयिष्ठं यद्भक्ष्यमपेक्षते वाञ्छति तत्स्वादु यथा तथा न खादति । यदभिलषति तन्नाऽस्मै रोचत इत्यर्थः । तथा हितोक्तं हितकारि वचः सूर्च्छयते असूयते तथा जङ्घामूरुं विवेष्टयति ॥ ६३ ॥

(क) दृष्टिरपि न प्रभवत्येनं प्रेक्षितुम् ।

(२) युज्यते ह्येतत् यस्मात् ज्वरमन्तरा यक्ष्मराजः स्वरूपत एव नावतिष्ठते । यथा—"अंसपार्श्वाभितापश्च संतापः करपादयोः । ज्वरः सर्वाङ्गजश्चेति लक्षणं राजयक्ष्मणः" इति । यदनुबन्धरहितश्च निर्बलो यक्ष्मा साध्यत्वेनाभिलप्यते । यथा—"ज्वरानुबन्धरहितं बलवन्तं क्रियासहम् । उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरमिति" । तस्माद्युक्तमुक्तं यज्ज्वरो यक्ष्मराजसख इति ।

क्रोधनारोचकेत्यादि—क्रोधनं क्रोधः अरोचकः सत्यप्यभिलाषे अन्नाभिनन्दनमाध्मानं वातनिरोधजन्यं रुजः पूर्वमुदरे ध्मातमिति तैरेतैः त्रिभिः पुत्रैः, ज्वरे जायमानत्वात् पुत्रस्थानीयैः उपैधते बर्द्धते । अत्र क्रोधः पित्तजे, अरोचकश्च श्लेष्मजे, आध्मानश्च वातजाते ज्वरे जायते इत्यवधेयम्—किञ्च पञ्चविधया ग्रहण्यभिधया भार्यया सह च

विदूषकः—(अन्यतो विलोक्य सभयकम्पम्) वअस्स ! अहं दाणिं ण जीविस्सं जदो खु करगहिदखग्गखेडअसरकम्मुअपरिघसूलगदा पच्चत्थिराअसेणा अभिवड्ढइ साअरो विअ । (क)

मन्त्री—(विलोक्य) एते व्रणराजपुत्रा[1] अष्टविधा भगन्दराः । एते च षड्विधा[2] मूलाधिष्ठानमभिव्याप्नुवन्ति । एते च कफसंभवा दश मेहाः पित्तसंभवैः षड्भिर्वातसंभवैश्चतुर्भिश्च सह विंशतिसंख्याका यक्ष्मराजपुत्राः । अपरत्र च त्रयोदश[3] मूत्राघाताः प्रसज्जन्ते । एतान्यपि च वातपित्तकफसन्निपातशुक्र[4]विटधात्वश्मरीकृच्छ्राण्यष्टौ कृच्छ्राणि चतसृभि[5]रश्मरीभिः सह सज्जीभवन्ति । एष गुल्मोऽपि शूल[6]मवलम्ब्य विजृम्भते । तथाष्ट-

---

उपधते । वातपित्तश्लेष्मसन्निपातजाश्चतस्रः, पञ्चमीच संग्रहणी इति ग्रहण्याः पञ्च विधाः । ग्रहण्यां भार्यात्वारोपात् ग्रहणीगतमपि पञ्चविधत्वं भार्यायां संक्रान्तमिति न विस्मर्तव्यम् ॥ ६४ ॥

(क) वयस्य ! अहमिदानीं न जीविष्ये, यतः खलु करगृहीतखड्गखेटकशरकार्मुकपरिघशूलगदा प्रत्यर्थिराजसेनाभिवर्द्धते सागर इव ।

(१) शतपोनकोष्ट्रग्रीवपरिस्रावि शम्बूकावर्तोन्मार्गिगाः पञ्च, प्रकृतिसमवायस्त्रिविधः इत्यष्टविधत्वम् ।

(२) एते च षड्विधाः । अर्शांसि इति शेषः । मूलाधिष्ठानं गुदवलीः ।

(३) वातकुण्डलिकाऽष्ठीलावातवस्तिमूत्रातीतमूत्रजठरमूत्रोत्सङ्गमूत्रक्षयमूत्रग्रन्थिमूत्रशुक्रोष्णवातमूत्रसादविड्विघातवस्तिकुण्डलसमाख्यास्त्रयोदश मूत्राघाताः ।

(४) शुक्रकृच्छ्रम्—शल्यजं मूत्रकृच्छ्रं धातुजमिति शुक्रजमिति ।

(५) चतसृभिः—वातपित्तकफशुक्रजन्याभिः ।

(६) शूलं नाम शूलाख्यं प्रहरणमिति ।

विधंशूलाश्च निरुन्धन्ति ।

कालः–कर्मन् ! समर्थोऽयं मन्त्री रोगविशेषपरिज्ञाने ।

मन्त्री–तथान्येऽप्यत्र बहवः प्रभवन्ति । ये किल

मन्दाग्न्युत्थोदरस्थामयसुहृद उदावर्तभेदा अशीति–
वातोत्थाः पित्तजा विंशतियुगगणिता विंशतिः श्लेष्मजाश्च ।
चत्वारोऽक्ष्णोर्वसन्तो नवतिरपि चतुःसप्ततिर्वक्त्रनिष्ठा
मूर्धस्थाः पङ्क्तिसंख्याः कृमिगदनिवहोऽप्यस्ति नैके च शोफाः ॥६५॥

तथा भूतोन्मादा विंशतिः ।

आमवात इति कोऽपि चतुर्धा जायते निखिलरोगनिवासः ।
वातपित्तकफशोणितमद्यक्ष्वेडजाः षडुदयन्ति च मूर्च्छाः ॥ ६६ ॥

अपि च–

एते षोढा भिन्ना उन्मादाश्च प्रवर्तन्ते ।
अभिवर्तन्ते चामी हृद्रोगाः पञ्चधा भिन्नाः ॥ ६७ ॥

---

(१) अष्टविधाः शूलाश्च दोषैरेकैकशः संसृष्टैश्च षट्, सन्निपातजन्यश्चापरः आमजश्चान्यः इति अष्टविधाः शूलाः ।

मन्दाग्नीत्यादि—मन्दाग्नितः उत्था ये उदरस्थाः आमयाः उदररोगाः तेषां सुहृदः मित्राणि उदावर्तभेदाः, तत्र वातमूत्रवेगाघातजन्यास्त्रयोदश, मिथ्याहारजन्यश्चैकः, वातोत्था वातप्रभवा अशीतिसंख्याकाः, पित्तजाः विंशतियुगगणिताश्चत्वारिंशत्, श्लेष्मजा विंशतिसंख्याकाः । अक्ष्णोर्वसन्तश्चतुर्नवतिसंख्याकाः, वक्त्रनिष्ठाः मुखगताः चतुः सप्ततिः, मूर्धस्था दशसंख्याकाः, क्रिमिगदनिवहः क्रिमिरोगसमूहोऽप्यस्ति, नैकेऽसंख्याकाः शोफाः, इति ॥ ६५ ॥

आमवात इतीत्यादि—चतुर्धा इति पृथक् सन्निपातैश्च दोषैरुन्नेयम् । क्ष्वेडो विषं, शेषं स्पष्टम् ॥ ६६ ॥

एते षोढेत्यादि—एकैकशः सर्वशश्च वातपित्तकफैः चत्वारः, मानसदुःखजन्यश्चान्यः, विषजश्चापरः इति षड् उन्मादाः । वातपित्तकफसन्निपातक्रिमिजन्याश्च पञ्च हृद्रोगाः ॥ ६७ ॥

विदूषकः—पमादो पमादो । एदेहिं अरिहिं दुवाराइं पाआरा परिखा कोसा आराइं असव्वं वि अक्कन्तम् । किं बहुजम्पिदेण । हृदयं गुम्मं करिअ अधिट्टिदं । तिलप्पमाणो वि देसो अणक्कन्तो ण दीसइ । (अञ्जलिं बद्ध्वा) वअस्स ! अदो वरं णत्थि मे जीविदासा । मम बह्मणीए विहुराए अन्धकूबणेत्ताए तुमं एव्व सुमरिअ जो अक्खेमं वहेहि । पढमं एव्व एसो अणत्थो सुणाविदो सि मए । तुमं उण दुम्मत्तिणो से वअणवीसम्भेण इमं दुरवत्थं पावदो सि । पेक्ख दाव तस्स फलं एदं संवुत्तम् । (क)

राजा—अमात्य ! संवदत्येवं विदूषकवचनम् ।

त्वद्बुद्धिप्रसरोऽत्र धिग्विफलितो निक्षिप्य सर्वामपि
त्वय्येवात्मधुरां मया निवसता संप्राप्तमीदृक्फलम् ।

(क) प्रमादः प्रमादः । एतैररिभिर्द्वाराणि प्राकाराः परिखाः कोषागाराणि च सर्वमप्याक्रान्तम् । किं बहुजल्पितेन । हृदयं गुल्मं कृत्वाधिष्ठितम् । तिलप्रमाणोऽपि देशोऽनाक्रान्तो न दृश्यते । वयस्य ! अतः परं नास्ति मे जीविताशा । मम ब्राह्मण्या विधुराया अन्धकूपनेत्रायास्त्वमेव स्मृत्वा योगक्षेमं वह । प्रथममेव एषोऽनर्थः श्रावितोऽसि मया । त्वं पुनर्दुर्मन्त्रिणोऽस्य वचनविश्रम्भेणेमां दुरवस्थां प्रापितोऽसि । पश्य तावत्तस्य फलमिदं संवृत्तम् ॥

(१) संवदत्येव—युज्यते एव ।

त्वद्बुद्धिप्रसरोऽत्रेत्यादि—अत्र यवमराजनिराकरणलक्षणे कार्ये त्वद्बुद्धिप्रसरः तव प्रतिभाशालिता विफलितो वितथोऽभूत् । इति धिक् । किञ्च सर्वामात्मधुरामपि आत्मनश्चिन्त्यमपि विषयं (धूश्चिन्ता इत्येकाक्षरकोशः इति शब्दकल्पद्रुमः) त्वयि भवति एव निक्षिप्य विन्यस्य निवसता निश्चिन्तमवतिष्ठमानेन मया, ईदृक् प्रत्यक्षतो दृश्यं फलं

वैयग्र्यं हृदि सर्वथास्मि गमितो द्वाराणि कोषालयाः।
प्राकाराः परिखाश्च हा निखिलमप्याक्रान्तमेवारिभिः ॥६८॥

एवं स्थिते किमन्यद्ब्रवीमि—

गात्रं मे परितप्यते पदयुगं शक्नोति न स्पन्दितुं
स्तब्धं चोरुयुगं, भुजौ च भजतः कम्पं मुखं शुष्यति।
नास्त्यक्ष्णोर्विषयग्रहः श्रवणयोरप्येवमेव त्वचो—
प्यन्यत्किं चलतीव हृन्निजपदादाशा भ्रमन्तीव च ॥६९॥

अपि च—

ननु मे दुःखभागात्मा न धैर्यमवलम्बते।
काठिन्यमिव मृत्पिण्डो घनवारिसमुक्षितः ॥ ७० ॥

किं च—

मया भवत्संविहितरसगन्धकौषधघटितरसायनप्रत्याशया

सम्प्राप्तम्। किञ्च अरिभिः द्वाराणि कोषालयाः प्राकाराः परिखाश्च, हा! निखिलमपि आक्रान्तमेव, इति सर्वथा सर्वतोभावेन हृदि वैयग्र्यं व्यग्रतां गमितोऽस्मि प्रापितोऽस्मि ॥ ६८ ॥

गात्रमित्यादि—मे गात्रं परितप्यते परितापं गच्छति, पदयुगं स्पन्दितुं किञ्चिदपि चलितुं न शक्नोति। ऊरुयुगं च स्तब्धं, भुजौ च कम्पं भजतः। मुखञ्च शुष्यति, तथा अक्ष्णोर्विषयग्रहो नास्ति अक्षिणी-रूपग्रहणं न विधत्त इति यावत्। श्रवणयोरपि तथा त्वचोऽपि एवमेव विषयग्रहो नास्तीति यावत्, अन्यत् किं हृदयं निजपदात् स्वस्थानात् चलतीव, आशा च भ्रमतीव ॥ ६९ ॥

न्वित्यादि—स्पष्टम् ॥ ७० ॥

(१) भवता संविहितानां परिष्कारेण सामर्थ्यमवापितानां रस-गन्धकयोः औषधानाञ्च घटितं सम्पादितं यद्रसायनं जराव्याधि-विध्वंसि भेषजं तस्य प्रत्याशा, तया।

त्वदुपदेशवशंवदचेतसा वपुषि नश्वरके ममता वृथा ।
विदधता शिवभक्तिरसायनं शिवशिवान्तरितं परमार्थदम् ॥ ७१ ॥

मन्त्री—सत्यमेतच्छिवभक्तिरसायनं परमार्थदमिति सकलैहिकसंकटविघटनं च । किंतु—

पुराभिमानो न वृथा तद्दार्ढ्येन विना कथम् ।
चित्तस्वास्थ्यं विना तच्च शिवभक्तिर्दृढा कथम् ॥ ७२ ॥

अतो विज्ञापयामि—

कृच्छ्रेऽपि धैर्यग्रहणं राज्ञो विजयसाधनम् ।
इति नीतिविदः प्राहुर्धैर्यमालम्ब्यतां ततः ॥ ७३ ॥

किं च तव निदर्शयामि तादृशमितिहासम् । यथा—

श्रेयः प्रापदगस्तिना स नहुषः शप्तोऽपि धैर्यग्रहा—
न्नन्वालम्ब्य धृतिं शुभं नलहरिश्चन्द्रावपि प्रापतुः ।
कृत्वा छद्म कृतेऽरिणा प्रणयिनीचौर्येऽपि धैर्यं वह—
न्बध्वा सेतुमुदन्वदम्भसि न किं रामो विजिग्ये रिपून् ॥ ७४ ॥

त्वदुपदेशे इत्यादि—परमार्थो हि अपवर्गः तदुपपादकं शिवस्य भक्तिरूपरसायनमन्तरितं दूरे नीतम् । शिव ! शिव ! महदनर्थपरम्परेति यावत् । शेषं सुगमम् ॥ ७१ ॥

पुराभिमानो नेत्यादि—पुरस्य वपुषोऽभिमानः ममत्वं । शेषं सरलम् । शिवभक्तिर्दृढा सत्येव परमार्थप्रदाने क्षमा, तद् दार्ढ्यसम्पादने च चेतः स्वास्थ्यमेव प्रधानं साधनं, तत्स्वास्थ्याधानञ्च शरीरस्वास्थ्याधीनम् इति वपुरेव निरामयं सत् सर्वसौख्यसम्पादकमिति भावः ॥ ७२ ॥

कृच्छ्रेऽपीत्यादि—स्पष्टम् ॥ ७३ ॥

श्रेयः प्रापदित्यादि—अरिणा रावणेन छद्म कृत्वा कपटं विधाय प्रणयिनी प्रेयसी सीता तस्याश्चौर्ये हरणे कृतेऽपि रामो धैर्यं वहन्, उदन्वतः समुद्रस्याम्भसि सेतुं बद्ध्वा रिपून् किं न विजिग्ये । अपि तु जितवानेव । शेषं स्पष्टम् ॥ ७४ ॥

विदूषकः—वअस्स ! सुदं किं दाणिं वि एदस्स मन्तिणो एदं एव्व वअणम् । संपदं एसो अत्ताणं वि ण जाणादि राजकज्जं कुदो उण उम्मादं वा उवजावं वा सत्तुकिदम् । (क)

मन्त्री—(विहस्य) वैधेय ! किं वृथा प्रलपसि । देव ! अलं धैर्यत्यागेन । एते च मत्संनिहिता रसौषधिविशेषा भवत्सेवनमेव प्रतीक्षमाणा विपक्षक्षपणाय सज्जीभवन्ति तानेतानुगृहाण ।

(नेपथ्ये)

देव ! एते वयम्—

शिवभक्तिप्रसादेन लब्धा मन्त्रिवरेण च
सम्यक् संविहिताः सर्वे विपक्षान् विजयामहे ॥ ७५ ॥

पुरस्तादचिरादेवास्माभिर्बाध्यमानं यक्ष्माणं सामात्यं सपुत्रकलत्रं ससैन्यं च पश्य ।

राजा—(दृष्ट्वा) प्रियं प्रियम् । सर्वे यूयमप्रमत्ता विपक्षक्षपणाय यतध्वम् ।

(ततः प्रविशति यक्ष्मा पाण्डुश्च)

यक्ष्मा—पाण्डो, क्व पुनरस्मदीया भटाः प्रहारार्थं वर्तन्ते ?

पाण्डुः—देव, पश्य । केचिदनुगच्छन्ति, केचित्पुरो गच्छन्ति ।

कालः—कर्मन्, यदुक्तं पाण्डुना तत्तथैव । यतः—

अनेकरोगानुगतो बहुरोगपुरोगमः ।
राजयक्ष्मा क्षयः शोषो रोगराडिति यः स्मृतः ॥७६॥

(क) वयस्य ! श्रुतं किमिदानीमप्येतस्य मन्त्रिण इदमेव वचनम् । सांप्रतमेष आत्मानमपि न जानाति राजकार्यं कुतः पुनरुन्मादं वा उपजापं वा शत्रुकृतम् ।

शिवभक्तिप्रसादेनेत्यादि—स्पष्टम् ॥ ७५ ॥

अनेकरोगानुगतो—इत्यादि स्पष्टम् ॥ ७६ ॥

कर्म—जानामि यादृश एष इति ।

नक्षत्राणां द्विजानां च राजाभूद्यो विधुः पुरा ।
तं प्रजग्राह यक्ष्मासौ राजयक्ष्मा ततः स्मृतः ॥ ७७ ॥
देहेषु यः क्षयकृतेः क्षयस्तत्संभवाच्च सः ।
रसादिशोषणाच्छोषो रोगराड्रोगरञ्जनात् ॥ ७८ ॥

यक्ष्मा—सखे पाण्डो ! प्रबलेषु सामदानभेदा न प्रसरन्ति, अतोऽन्तिम एव प्रयोगः संप्रतिपत्तव्यः । तदत्र किं विलम्बेन ।

शस्त्राशस्त्रि प्रसह्याथ प्रवृत्ते रणवैशसे ।
अजीवकमरोगं वा पुरमेतद्भविष्यति ॥ ७९ ॥

तदेहि । तत्क्षमां भूमिमेव गच्छामः ।

(इति पाण्डुना सह निष्क्रान्तः)

कालः—कर्मन्, पश्य पश्य विपक्षविजयाय विज्ञानमन्त्रिप्रयुक्तान् भटान् ।

राजा—वयस्य, मन्त्रिणा दर्शितेन विक्रमव्यापारेण हृदयं मम निर्वृणोति । यतः—

भूपतिरससिन्दूरज्वराङ्कुशानन्दभैरवैः साकम् ।
चिन्तामणिश्च शत्रून् राजमृगाङ्कश्च जेतुमुद्युङ्क्ते ॥ ८० ॥

पश्य चात्रारोग्यचिन्तामणेरुत्तरेण ।

नक्षत्राणामित्यादि—स्पष्टम् ॥ ७७ ॥

देहेष्वित्यादि—स्पष्टम् ॥ ७८ ॥

शस्त्राशस्त्रीत्यादि—शस्त्रैः शस्त्रैश्च प्रहृत्य प्रवृत्तं युद्धं तस्मिन् शस्त्राशस्त्रि रणवैशसे प्रसह्य प्रवृत्ते एतत्पुरमजीवकमरोगं वा भविष्यति ।

(१) इमे भूपतिप्रभृतिरसास्तत्तदायुर्वेदतन्त्रेभ्यः संगृह्यास्माभिरस्य ग्रन्थस्य परिशिष्टे लिखितास्तज्जिज्ञासुभिस्ततोवश्यमेव द्रष्टव्याः ।

कृतसिद्धरसेश्वरः पुरस्तात्करमालम्ब्य च वातराक्षसस्य ।
समराङ्गणमेति पूर्णचन्द्रोदय एषोऽग्निकुमारदर्शिताध्वा ॥८१॥

प्रतापलङ्केश्वर एष यश्च प्रतापयत्यत्र निजप्रतापात् ।
गदान्धनुर्वातमुखानशेषाँल्लङ्केश्वरः शत्रुभिरप्रसह्यः ॥ ८२ ॥

वसन्तकुसुमाकरः सरभसं विधत्ते रणम्
सुवर्णरसभूपतिर्वशयते रुजां मण्डलम् ।
प्रसह्य बडवानलाभिधमिदं च चूर्णं जवा-
द्विशोषयति सर्वतः प्रबलमग्निमान्द्याऽरुचिम् ॥ ८३ ॥

सुदर्शनं चक्रमिवामरारीन्सुदर्शनं चूर्णमिदं रणाग्रे ।
निहन्ति जीर्णज्वरमाशु पित्तजन्या रुजश्चूर्णयति प्रसह्य ॥८४॥

प्रबलानलसंकुलितं गदगहनं दुरवगाढमन्येन ।
हन्ति धुरि तीक्ष्णसारो वातकुठारः समूलमुन्मूल्य ॥ ८५ ॥

असकृत्स्खलतः किंच गतिमान्द्यविधायिनः ।
प्रमेहान्माद्यतो हन्ति मेहकुञ्जरकेसरी ॥ ८६ ॥

गतिमन्थरताधायिवर्ष्मनैर्बल्य (वैपुल्य) शालिनः ।
सर्वान् वातगजान् हन्ति वातविध्वंसनो हरिः ॥ ८७ ॥

विदूषकः—देव, अचेतणा बि एदे चिन्तामणिपहुदिणो संपदं संपहारं कुणन्तित्ति अच्चरिअम् । ता इन्दजालं विअ एदं मे पडिभादि । (क)

राजा—धिङ्मूर्ख, अनभिज्ञोऽसि शास्त्रतत्त्वस्य । अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः । अभिमानदेवताश्चैषां सचेतनाः

---

(१) ८१ तः ८७ पर्यन्तं पद्यानि सर्वाणि स्पष्टार्थानि ।

(क) देव ! अचेतना अप्येते चिन्तामणिप्रभृतयः सांप्रतं संप्रहारं कुर्वन्तीत्याश्चर्यम् । तदिन्द्रजालमिवैतन्मे प्रतिभाति ।

श्रूयन्ते । (कर्णं दत्वा) मन्त्रिन् कोऽयं कलकलाविर्भावः ।

मन्त्री—पश्यतु देवः—

शस्त्राशस्त्रि गदागदि प्रथमतो निर्वर्तिते संयुगे
मुष्टीमुष्टि तलातलि प्रववृत्ते पश्चादिदं भीषणम् ।
जित्वारीनिह देव ! तावकभटैरापूर्यते काहला
शङ्खः सम्प्रति शब्द्यते दृढतरं संताड्यते दुन्दुभिः ॥ ८८ ॥

अपि च—

आस्फालयन्ति दृढमूरुयुगं कराग्रैः
कुर्वन्ति कुण्ठितघनारवमट्ट (मन्द)हासम् ।
जीवोऽयमस्मदधिपो जितवानमित्रा-
नित्युद्धतं युधि भटास्तव पर्यटन्ति ॥ ८६ ॥

शस्त्राशस्त्रीत्यादि—प्रथमतः पूर्वं शस्त्रैःशस्त्रैश्च प्रहृत्य प्रवृत्तं तस्मिन् तथा गदाभिः गदाभिश्च प्रहृत्य प्रवृत्ते संयुगे युद्धे निवर्तिते संजाते सति पश्चात् इदं मुष्टीमुष्टि तलातलि च भीषणं भयावहं युद्धमिति शेषः प्रववृते प्रवृत्तमभूत् । अत्र मुष्टीमुष्टि तलातलि शब्दौ शस्त्राशस्त्रिवत् विगृहीतव्यौ । किञ्च हे देव ! तावकभटैः त्वदीयसैनिकैः इह संयोगे अरीन् जित्वा काहला वाद्यभाण्डविशेषः आपूर्यते आध्मायते । सम्प्रति शङ्खः शब्द्यते ध्वन्यते, तथा दुन्दुभिः भेरी दृढतरमत्यर्थं संताड्यते आपीड्यत इति । एतैरस्माकं भटैः काहलाशङ्खदुन्दुभिध्वानैर्जितमस्माभिरिति स्वीयान्प्रति बोध्यते निहततरांश्च परान् पलायनपरायणताम् अवलम्बितुम् उद्घोष्यते इति भावः ॥ ८८ ॥

आस्फालयन्तीत्यादि—तव भटाः कराग्रैः हस्ततलैः ऊरुद्वयम् ऊरुयुगं दृढं यथा तथा आस्फालयन्ति ताडयन्ति, तथा कुण्ठितस्य संकुचितस्य वातवेगात् गाढतरं मिथःसंघटितस्येति यावत् घनस्येवारवः शब्दो यस्मिन्नेवम्भूतम् अट्टहासं कुर्वन्ति । किञ्चायमस्मदधिपो जीवः अमित्रान् शत्रून् जितवान् विजिग्ये इति उद्धतम् अत्युच्चं यथा तथा शब्दायमानाः इति शेषः । युधि संयुगभुवि पर्यटन्ति ॥ ८६ ॥

(१) "द्वेष्योऽभियातिरमित्रः" इति रत्नकोषः ।

विदूषकः—कहं एत्थ एव भग्गमणोरहदाए परुएणो विश्र जक्खराश्रो लक्खीश्रदि । (क)

राजा—वयस्य, सम्यङ्निरूपितं भवता ।

गण्डस्थलप्रसृमराश्रुकरं करेण
निष्पीडयन् कटकटाकृतदन्तपङ्क्तिः ।
यक्ष्मा ललाटघटितभ्रुकुटिः किलाय-
मन्तः स्पृशं रुषमभीक्ष्णमभिव्यनक्ति ॥ ६० ॥

मन्त्री—न केवलां रुषं शुचं च ।

विदूषकः—एसो सोएण पलवन्तो विश्र दीसइ । (ख)

मन्त्री—श्रृणुमस्तर्हि प्रलापमेतस्य । विषूचीमत्सरावप्येनमनुवर्तेते ।

(ततः प्रविशति विषूचीमत्सराभ्यां सहितो यक्ष्मा)

यक्ष्मा—हन्त कथं तादृशानामपि मत्सैन्यानामीदृशीयं दुरवस्था ।
आश्चर्यमाश्चर्यम् ।

जीवस्य ध्वजिनीचरानतिबलाञ्शक्नोति कः शासितुं
दुर्वारैर्युधि पातितानि मम यैः सर्वाणि सैन्यानि च ।

(क) कथमत्रैव भग्नमनोरथतया प्ररुदित इव यक्ष्मराजो लक्ष्यते ।

गण्डस्थल इत्यादि—गण्डस्थले कपोलतले प्रसृमराणि विलसन्ति अश्रूणि यस्मिंस्तत् यथा तथा करं करेण निष्पीडयन् विमर्दयन्, कटकटाकृदन्तपाङ्क्तिः रोषाद् घर्षितदशनावलिः ललाटे घटिता विरचिता भ्रकुटिः येन सोऽयं यक्ष्मा अन्तः स्पृशम् अन्तर्निहितां रुषम् अभीक्ष्णं नितराम् अभिव्यनक्ति प्रकटयति ॥ ६० ॥

(ख) एष शोकेन प्रलपन्निव दृश्यते ।

जीवस्येत्यादि—यैः दुर्वारैर्वारितुमशक्यैः मम सर्वाणि सैन्यानि युधि पातितानि विनाशितानि, ताननतिबलान् जीवस्य ध्वजिनीचरान्

पाण्डुर्मे सचिवः परैरबधि वा भीतः पलायिष्ट वा
नो जाने मम जीवतो बत ! हताः पुत्रास्तथा बान्धवाः ॥ ६१ ॥
(सशोकावेगम्)
भो भोः सुताः क्व नु गताःस्थ विना भवद्भि-
र्जीर्णाटवीव जगती परिदृश्यते मे ।
आक्रम्यते च तमसा हरिदन्तरालं
शोकाग्निसंवलितमुत्तपते वपुश्च ॥ ६२ ॥
(इति मूर्च्छति)
मत्सरः—समाश्वसिहि समाश्वसिहि ।
यक्ष्मा—(समाश्वस्य)
वत्सा हे वदनाम्बुजानि मुदितो द्रक्ष्यामि केषामहं
केषां माक्षिकमाक्षिपन्ति वचनान्याकर्णयिष्ये मुदा ।
मर्त्यानां तनुषु प्रविष्टमचिरान्मां वर्धयिष्यन्ति के
यूयं मत्समरे परैरतिबलैर्नामावशेषीकृताः ॥ ६३ ॥

सैनिकान् शासितुं विजेतुं कः शक्नोति न कोऽपि इत्यर्थः । मे सचिवः पाण्डुः परैः शत्रुभिः रबधि हतो वा भीतो वा पलायिष्ट इति नो जाने । तथा जीवतो मम मयि जीवति इति भावः । मम पुत्राः तथा बान्धवाः हताः । बत इति खेदे ॥ ६१ ॥

भो भोः सुता इत्यादि—भवद्भिर्विना जगती समग्रमपि भूतलं मे मम जीर्णाटवीव शून्येति शेषः । परिदृश्यते । तमसा अन्धकारेण च हरितामन्तराले दिङ्मण्डलमाक्रम्यते शोकाग्निना संवलितं संयुक्तं वपुश्च उत्तपते संतापं गच्छति ॥ ६२ ॥

वत्सा हे वदनाम्बुजानीत्यादि—माक्षिकं मधु आक्षिपन्ति तिरस्कुर्वन्ति मधुनोऽपि मधुराणीति भावः । मर्त्यानां तनुषु प्रविष्टं माम् अचिरात् के वर्धयिष्यन्ति ? । एतेनोपद्रवसमाख्याताश्चेदपरे विकाराः यक्ष्माणं नानुपतेयुः, तदा अकिंचित्करोऽयं जनानामिति व्यज्यते । नामावशेषीकृताः नाशिता इत्यर्थः । शेषं स्पष्टम् ॥ ६३ ॥

कालः—पुत्रप्रविलयाद्दुःखं न सोढुं शक्यते जनैः ।
वसिष्ठोऽपि महान् येन ववाञ्छ पतनं भृगोः ॥ ६४ ॥
तदिमं पुत्रशोकसन्तप्तं यक्ष्माणमवेक्षितुं न शक्नोमि ।
कर्म—अहमप्येवमेव ।
(इत्युभौ निष्क्रामतः)
मत्सरः—देवालं शोकेन द्विषि जीवति न खलु धर्मोऽयम् ।
(यावच्छक्ति ततोऽरीन्हत्वा शोचन्ति नैव तान्वीराः)
यावच्छक्ति ततोऽरीन्घ्नन्ति न शोचन्ति ते वीराः ॥ ६५ ॥
अत इदानीं पुनरानीय परिभवमरिहतानामस्मदीयानामानृण्यमृच्छतु भवान् ।
विषूची—दाणिं खुएव दिट्ठा राअकुमारा कहिं गदा तुम्हे । (क)
डज्झइ हिअअं सोओ अग्गी विअ सुक्कतिणजालम् ॥ ६६ ॥
यक्ष्मा—गण्डद्वयेऽपि गलितैर्नयनाम्बुपूरै-
रामृष्टपत्त्रलतमाकुलकेशपाशम् ।

पुत्रप्रविलयादुःखमित्यादि—जनैः पुत्रप्रविलयात् सुतविनाशात् उद्भूतमिति शेषः, दुःखं सोढुं न शक्यते येन यतः महानपि योगवरिष्ठोऽपि वसिष्ठः पुत्रशोकाभिभूतः भृगोः अतटात् "प्रपातस्त्वतटो भृगुः" इत्यमरः । पतनं ववाञ्छ ॥ ६४ ॥

देवालमित्यादि—हे देव ! शोकेनालं न किञ्चित्साध्यमित्यर्थः, किञ्च द्विषि शत्रौ जीवति सति अयं धर्मो न, द्विषः समक्षं स्वीयानां शोकानुभवः कदर्यभावं प्रत्याययतीति भावः । ततः तस्मात् यावत् शक्तिः अरीन् घ्नन्ति न च शोचन्ति ते एव वीराः ॥ ६५ ॥

(क) इदानीं खल्वेव दृष्टा राजकुमाराः कुत्र गता यूयम् । दहति हृदयं शोकोऽग्निरिव शुष्कतृणजालम् ॥ ६६ ॥

गण्डद्वयेऽपीत्यादि—गण्डद्वयेऽपि उभयोरपि कपोलतलयोः गलितैः स्रवद्भिः नयनाम्बुपूरैः अश्रुनिवहैः आमृष्टाः पत्त्रलता अगुर्वा-

पाणिद्वयप्रहतपाटलबाहुमध्य-
मस्या वपुर्मम शुचं द्विगुणीकरोति ॥ ६७ ॥

मत्सरः-राजन्, धैर्यमवलम्ब्यताम् । कृतं शोकेन, संप्रति हि कतिपये देवपादमूलोपजीविनः सैन्याः केनापि दुरपनेयप्रवृत्तयः ।

यक्ष्मा-ततः किम् ।

मत्सरः-ततश्च तत्प्रयोगेण कुण्ठितशक्तिर्भविष्यति विज्ञानमन्त्रिहतकः । तथा च वैरनिर्यातनं कर्तुमुचितमिति प्रतिभाति ।

यक्ष्मा-(सविमर्शम्) अबन्ध्योऽयं प्रयत्नः । तदर्थमेव शत्रून्मूलनाय गच्छामः ।

(इति विषूचीमत्सराभ्यां सह निष्क्रान्तः)

मन्त्री-मत्सरेण कर्णेऽस्मज्जयार्थं किमप्युपदिष्टो यक्ष्मा निष्क्रान्तः, तद्वयमपि तदिङ्गितानुमितं पर्यालोच्य तत्प्रतिविधानाय व्याप्रियमाणा इष्टं साधयामः ।

(इति निष्क्रान्ताः सर्वे)

इति षष्ठोऽङ्कः ।

भिः कपोलतलेषु निर्मिता आकृति विशेषाः यस्य तत्, तथा आकुलः इतस्ततः विक्षिप्यमाणः केशपाशो यस्य तत्, तथा पाणिद्वयेन प्रहतमाहतम् अत एव पाटलम् आरक्तं बाहुमध्यं वक्षो यस्य तत्, अस्याः विषूच्याः वपुः मम शुचं शोकं द्विगुणीकरोति ॥ ६७ ॥

इति श्रीजीवानन्दरसायने संक्षिप्तटिप्पणे षष्ठोऽङ्कः ॥

विजयतां श्रीहरिः ।

सप्तमोऽङ्कः

(ततः प्रविशति जीवराजो विज्ञानमन्त्री च)

जीवराजः–(सहर्षम्)

मन्त्रिंस्त्वदीयमतिकौशलनौबलेन
तीर्णो रणाम्बुधिरभूदतिदुस्तरोऽपि ।
यस्मिन्भयङ्करगतिर्ज्वरपाण्डुमुख्यो
रोगव्रजः किल तिमिंगिलतामयासीत् ॥ १ ॥

किं ब्रवीमि, संकुलयुद्धेऽस्मदीयानां तदीयेषु प्रवृत्तमोजायितम् ।

एकत्र मण्डभेदो गुटिका (भेदो) बन्धः परत्र मन्दाग्निम् ।
निखिलामयजननकरं निज (पानं) घान प्रथममिदमहमदर्शम् ॥ २ ॥

मन्त्रिन्नित्यादि—अयि मन्त्रिन् ! त्वदीयमतेः कौशलं नैपुण्यमेव नौ तरिः, तस्याः बलेन साहाय्येन अतिदुस्तरः दुःखेन तरितुं शक्यः अपि रणाम्बुधिः समरसमुद्रः मया तीर्णोऽभूत् । यस्मिन् किल, भयङ्करगतिः भीषणप्रसरः ज्वरः पाण्डुश्च मुख्यो यस्मिन् एवम्भूतः रोगव्रजः तिमिङ्गिलतामतिभीषणमत्स्यविशेषसारूप्यम् , अयासीत् प्राप्तः । तिमिङ्गिलस्वरूपन्तु "अस्ति मत्स्यास्तिमिर्नाम शतयोजनविस्तरः । यस्तं गिलति वेगेन स तिमिङ्गिल उच्यते" इति बोध्यम् ॥ १ ॥

एकत्रेत्यादि—एकतो मण्डभेदः शालितण्डुलकृतः पेयविशेषः । परत्र गुटिकाबन्धः एतन्नामको रसविशेषः, निखिलामयजननकरं सकलरोगोत्पादकं मन्दाग्निं निजघान अहं प्रथममिदमदर्शम् । अत्र निजघानेति लिड्विधिः भूतानद्यतनमात्रे बोध्यः । "यथा धौम्योपाख्याने स मामुवाचाम्बुचरः कूर्मो मानुषदेहधृक्" इति ॥ २ ॥

अथ गुलूच्यादिपञ्चभद्रकषायं निकषा यत्नवं(?) तमवलोक्य[1] पलायन्त पित्तसमीरज्वराः । तदनन्तरं जगदन्तरप्रसिद्धः स्वमनश्वरसारो यक्ष्मपरिक्षपणदक्षिणः सन्नपि संननाह स्वयं त्रैलोक्यचिन्तामणिर्विनिपाताय संनिपातेन साकमष्टविधानामपि ज्वराणाम्[2]।

स्थावरजङ्गमगरलं ज्वरमामोत्थं व्रणोपजातं च ।
आरोग्यपूर्वचिन्तामणिरपि निघ्नन्मया रणे दृष्टः ॥ ३ ॥

ततः सर्वज्वरानपि निगृहीतवन्तं ज्वराङ्कुशमुत्तरेण गुल्मार्शःसंग्रहणीर्विपाटितवतो ग्रहणीकपाटस्य पूर्वभागे ।

या पञ्चामृतपर्पटी ग्रहणिकायक्ष्मातिसारज्वर—
स्त्रीरुक्पाण्डुगदाम्लपित्तगदरुक्चुन्मान्द्यविध्वंसिनी ।
तामद्राक्षमहं रणे स्त्रियमपि व्यातन्वतीं पौरुषं
चामुण्डामिव चण्डमुण्डसमरप्रक्रान्तदोर्विक्रमाम् ॥४॥

---

(१) पञ्चभद्रकषायं निकषा यत्नवन्तं समुद्यतं गुडूच्यादिमेतन्नामकं कषायमवलोक्येति ।

(२) सन्निपातेन साकं सह अष्टविधानामपि पृथक् द्वन्द्वसन्निपातानामागन्तूनां ज्वराणामिति । अत्र सन्निपातेन साकमित्युक्तिः सन्निपातस्य कष्टसाध्यतमत्वेन प्राधान्यद्योतनार्था ।

स्थावरेत्यादि—स्थावरं जङ्गमं च गरलं विषमामोत्थमामसमुद्भवं व्रणोपजातं व्रणजन्यं च ज्वरं रणे निघ्नन् प्रहरन् मयाऽऽरोग्यपूर्वचिन्तामणिनामा रसो दृष्टः ॥ ३ ॥

या पञ्चामृतेत्यादि—चण्डमुण्डयोः एतन्नामकप्रसिद्धदानवयोः समरे सङ्ग्रामे प्रक्रान्त आरब्धः दोर्विक्रमो बाहुबलं यया सा तां चामुण्डां चण्डिकामिति । शेषं सुगमम् ॥ ४ ॥

पश्चाद्भागे तस्याः—

अरुचिप्लीहवमिज्वरकासार्शःश्वासशूलानाम् ।

सूक्ष्मैलादिमचूर्णं निरवर्णयमाशु युधि निहन्तारम् ॥ ५ ॥

तदनु जलजाच्च इव दनुजलोकस्य सिद्धवसन्तः शुक्रदोषस्य, गोक्षुरकादिचूर्णमिश्रितपयःपानविधिः पुंस्त्वदोषस्य, त्रिविक्रमरसो मूत्रकृच्छ्राश्मर्योर्विष्यन्दनतैलयोगो भगन्दरस्य, लघुलङ्केश्वरः कुष्ठस्य, नित्योदितरसो मूलानाम्, विद्याधररसो गुल्मानाम्, त्रिनेत्ररसः शूलानाम्, महावह्निरस उदररोगाणाम्, गिरिकर्ण्यादिविधिर्गुञ्जातैललेपश्च शिरोरोगस्य, चन्द्रोदयवर्तिश्च चक्षूरोगस्य, सौवीरादिपक्वतैलनिषेकः कर्णरोगाणाम्, सिद्धार्थत्रिफलाद्यौषधयोगविशेषपानविधिः कृत्योन्मादविषज्वरसर्वग्रहाणाम्, मधुसर्पिर्युत (नवायस) चूर्णविशेषलेहनविधिः पाण्डुहृद्रोगभगंदरशोफकुष्ठोदरार्शसां मेहकुञ्जरकेसरी प्रमेहाणां च विजयमहोत्सवेन समुत्सारितसर्वरोगखेदाः समरजनैरप्यस्तूयन्त । ततः किमप्यवशिष्यते कार्यमस्माकम् ।

मन्त्री—स्वामिन् ! श्रूयताम्—

जन्यार्णवोऽरिजनितः सुमहानिदानीं
तीर्णोऽप्यतीर्ण इति निश्चिनुते मनो मे ।
यन्मत्सरेण रणभुव्युपदिष्टकार्यः
कर्णे स तत्परमितो विदधीत यक्ष्मा ॥ ६ ॥

अरुचीत्यादि—स्पष्टम् ॥ ५ ॥

(१) मूलद्वारोद्भवानामर्शसामित्यर्थः ।

जन्यार्णव इत्यादि—जन्यं युद्धमेवार्णवः समुद्रः । शेषं स्पष्टम् ॥ ६ ॥

राजा—विज्ञान सचिव ! यथार्थनामधेय, मत्सरेण यक्ष्मणः कर्णे किमुक्तं भवेत् । यक्ष्मा च तदाकर्ण्य किं विदध्यात् । तद्विधानेन चास्माकमुत्तिष्ठेत कीदृशमत्याहितम् ।

मन्त्री—(क्षणं विचिन्त्य) किमन्यद्ब्रवीमि । केचिदसाध्यरोगा यक्ष्माणमुपासते तैरस्मान्बाधितुं यक्ष्माणं प्रति मत्सरेण संकेतितमिति शङ्के ।

राजा—(सवितर्कम्) एवमेवास्मासु यक्ष्मा यदि वक्रं विधिमुपक्रंस्यते तत्र कमुपायं पश्यति भवान् ।

मन्त्री—'भक्ताय भवते कदापि मया दर्शयिष्यते साम्बः' इति भगवत्या तुभ्यं जातुचिदावेदितं भक्त्या इति कदाचित्कथान्तरे देवेनैव मां प्रति प्रागुक्तम् । तदिदानीं तामेव भगवतीं भक्तिं हृदि दृढमवलम्ब्य भगवद्दर्शनार्थं संनिधानानुग्रहः प्रार्थ्यताम् । तत एवासाध्यरोगाभिभवः सुलभः प्रतिभाति ।

राजा—यद्येवमनुध्याय विध्यादिविबुधकृतनिषेवणं करोमि मनसा-शरणं शङ्करम् (इत्यनुध्यायति)

मन्त्री—आश्चर्यमाश्चर्यम् । भक्तवत्सलता भगवतश्चन्द्रचूडस्य परां कोटिमवलम्बते । यदनुध्यानमात्रमनुतिष्ठति स्वामिनि तदाविर्भावसूचनमेतदालक्ष्यते । यत्किल—

शैलस्थूलशिरोभिरुग्रभुजगप्रायश्रवोभूषणै-
जानुस्पर्शिबृहत्पिचण्डचटुलैस्तालद्रुदीर्घाङ्घ्रिभिः ।

शैलस्थूलेत्यादि—शैलस्थूलशिरोभिः गिरिबृहन्मस्तकैः, उग्रभुजगा एवेति उग्रभुजगप्रायाणि श्रवसां कर्णानां भूषणानि येषान्तैः, तथा जानुस्पृंशि बृहन्ति पिचण्डानि उदराणि येषान्ते तैः, चटुलाश्च-

प्रावृण्नैशतमिस्त्रनीलतनुभिर्भस्मात्रिपुण्ड्राङ्कितैः
शूलोद्भासिभुजैः समावृतमिदं भूतैरभूद्भूतलम् ॥ ७ ॥

राजा—(ध्यानाद्विरम्य कर्णं दत्वा) अहो भाग्यप्रकर्षो जीवलोकस्य । यतः—

जय विश्वपते ! जयेन्दुमौले ! जयशंभो ! जयशङ्करेति शंसन् ।
परितः श्रुतिगोचरो जनानां कलुषं लुम्पति काहलीनिनादः ॥८॥

मन्त्री—(सहर्षम्) राजन् ! फलितस्ते मनोरथः । पश्य—
आरूढः स्फाटिकक्ष्माधरनिभवृषभं सार्धमद्रीन्द्रपुत्र्या
वीतावष्टम्भकुम्भोदरकरयुगलोदस्तमुक्तातपत्रः ।
गायद्गन्धर्वनृत्यत्सुरयुवति (गणिक) पुरोभागघोषन्मृदङ्गो
गङ्गाभृत्युत्तमाङ्गे शशिशकलधरः शङ्करः संनिधत्ते ॥ ९ ॥

पलाश्च तैस्तथा तालद्रुवद्दीर्घा अङ्घ्रयो येषान्ते तैः । तथा प्रावृण्निशाभवं यत्तमिस्रं ध्वान्तं तद्वन्नीलास्तनवो येषान्ते तैः । तथा भस्मत्रिपुण्ड्रैरङ्किताश्चिह्निताः तैः । शूलैरुद्भासिनो भुजा येषान्ते तैरेवंभूतैर्भूतैः पिशाचैः समावृतमिदं भूतलमभूत् ॥ ७ ॥

जयविश्वपत इत्यादि—काहली क्षुद्रढक्का, निनादः कलकलः अथवा काहलीनां तरुणीनां दिव्याप्सरसामिति भावः । "काहली तरुणी इति विश्वकोषः" । शेषं स्पष्टम् ॥ ८ ॥

आरूढ इत्यादि—अद्रीन्द्रपुत्र्या पार्वत्या सार्धं, स्फाटिकः स्फटिकमयो यः क्ष्माधरस्तेन तुल्य इति तन्निभो यो वृषभस्तमारूढस्तथा वीतोऽवष्टम्भो निष्पन्दीभावो यस्य तस्य कुम्भोदरस्य करयुगलेनोदस्तमुद्धतं मुक्तावत्स्वच्छमातपत्रं यस्य तथा, गायन्तो गन्धर्वाश्च नृत्यन्त्यः सुरयुवतयश्च तासां पुरोभागे प्राग्देशे घोषन्मृदङ्गो वाद्यविशेषो यस्य सः, गङ्गाभृत्युत्तमाङ्गे सुरनदीवति शिरसि, शशिशकलधरश्चन्द्रकलाधरः शिवः सन्निधत्ते ॥ ९ ॥

अपि च—

मौलिन्यस्ताञ्जलीनां दरमुकुलितदृङ्निर्यदानन्दबाष्प-

क्लिद्यद्गण्डस्थलानामविरलपुलकालङ्कृतस्वाकृतीनाम्।

वेदान्तप्रायभूरिस्तुतिमुखरमुखाम्भोजभाजामृषीणां

पङ्क्त्या पाश्चात्यभागो झटिति निबिडितो दृश्यतामस्य शम्भोः॥१०॥

राजा—मन्त्रिन् ! इतः परं प्रणिपातादिना भगवन्तं प्रसाद्य स्वाभीष्टमर्थं प्रार्थयिष्ये।

मन्त्री—अनितरसाधारणमेतस्य भक्ताभीप्सितप्रदानचातुर्यम्। यः प्रसादितवते पार्थाय पाशुपतमस्त्रं प्रतिपादितवान्। येन च निखिलक्षत्रियकुलजिघृक्षवे भार्गवाय प्रसादीकृतः परशुः।

राजा—उपपन्नमिदम्। एवमपरिमितानि महान्त्याश्चर्यचरितानि देवस्य। यच्च कपिलभस्मीकृतप्रपितामहसंघसमुत्तारणकृतप्रयत्नभगीरथप्रसादितायाः सुरापगायाः भुवमुत्तरन्त्या गर्वभञ्जनं नाम मृत्युंजयस्य चरितं, तदपि परमाद्भुतमेव।

मन्त्री—जगत्प्रसिद्धमेवेदम्। तथा हि—

मौलिन्यस्ताञ्जलीनामित्यादि—मौलिषु न्यस्ता अञ्जलयो यैस्तेषाम्, दरमुकुलिताभ्य ईषदाकुञ्चिताभ्यो दृग्भ्यो निर्यन्ति यानि आनन्दवाष्पाणि प्रेमाश्रूणि तैः क्लिद्यन्ति स्विद्यन्ति गण्डस्थलानि येषां तेषाम्, तथा अविरलेन घनेन पुलकेन अलङ्कृताः, अत एव शोभना आकृतयो येषां तेषाम्, तथा वेदान्तप्राया वेदान्तबहुला या भूरिस्तुतयः बहुस्तोत्राणि, ताभिर्मुखराणि मुखाम्भोजानि भजन्ते ये तेषामृषीणां पङ्क्त्या निबिडितः सान्द्रीभूतोऽस्य शम्भोः पाश्चात्यभागो दृश्यताम्॥ १०॥

---

१ सङ्कुलीभूत इत्यर्थः।

वेगाकृष्टोडुचक्रानुकरणनिपुणश्वेतडिण्डीरखण्ड-
शिलष्टोर्मीनिर्मितोर्वीवलयविलयनाशङ्कसातङ्कदेवा ।
विभ्रम्याकाशगङ्गा विधिभुवनभुवः सर्वदुर्वारगर्वा
निर्विण्णा धूर्जटीयोद्भटघटितजटाजूटगर्भे निलिल्ये ॥११॥

किञ्च अध्वरविधावपराधिनो दक्षप्रजापतेः शिक्षणावसरे रोषसन्धुक्षितेन नीललोहितेन विसृष्टः स्वांशभूतः प्रभूतकोपविधूतविनयमुद्रो वीरभद्र एव किं न कृतवान् । तथा हि—

शूलाग्रक्षतदक्षकण्ठरुधिरैः शोणे रणप्राङ्गणे
कीर्णो दन्तगणश्चपेटदलितादर्कस्य वक्त्रान्तरात् ।
वीरश्रीकरपीडनोत्सवविधावेतस्य वैश्वानर-
प्रक्षिप्तोज्ज्वललाजविभ्रमकरो नालोकि लोकेन किम् ॥१२॥

वेगाकृष्टोडुचक्रानुकरण इत्यादि—वेगेन जवेन आकृष्टस्योडुचक्रस्य नक्षत्रमण्डलस्यानुकरणे निपुणानि यानि श्वेतडिण्डीरखण्डानि शुभ्रफेनशकलानि तैः श्लिष्टाभिर्मिलिताभिरूर्मिभिस्तरङ्गैर्निर्मिता ऊर्वीवलयविलयनाशङ्का भूमण्डलप्रलयशङ्का येषामेवंभूताः सातङ्काश्चिन्तान्विताः देवा यया सा । एवम्भूताऽऽकाशगङ्गा विधिभुवनभुवोऽखिलब्रह्माण्डं विभ्रम्य निर्विण्णा खिन्ना सती धूर्जटीयः शाम्भवो य उद्भटघटितो विकटबद्धो जटाजूटस्तस्य गर्भे मध्ये निलिल्ये लीनाभूत् ॥ ११ ॥

शूलाग्रेत्यादि—शूलाग्रेण त्रिशूलधारया क्षतस्य दक्षकण्ठस्य प्रजापतिगलस्य रुधिरैरसृग्भिः शोणे रणप्राङ्गणे चपेटेन हस्ततलप्रहारेण दलितात् भग्नात् अर्कस्य पूष्णो वक्त्रान्तरात् कीर्णः दन्तगणः दन्तसमूहः एतस्य शंकरस्य वीरश्रियः शौर्यलक्ष्म्याः करपीडनोत्सवविधौ पाणिग्रहमङ्गले वैश्वानरे विवाहाग्नौ प्रक्षिप्तानामाहुतानामुज्ज्वलानां लाजानां विभ्रमं विलासं करोति, इत्येवम्भूतः किं लोकेन नालोकि किन्त्वालोक्येवेति ॥ १२ ॥

राजा—किमिति वर्ण्यतामयमाश्चर्यचर्यो भगवान् ।

क्रोधारूढभ्रुकुटिरलिके क्रूरखड्गप्रहार-
शिछन्नग्रीवात्रिदशनिकरच्छन्नसंग्रामभूमिः ।
शक्रश्रीशद्रुहिणशरणालाभविद्राणविद्या-
दानोन्निद्रः प्रणतजनताभद्रदो वीरभद्रः ॥ १३ ॥

कः पुनरस्य स्वरूपं तत्वतः शक्नोत्यवधारयितुं यदन्तर्वाणयः (क) सर्वेऽपि स्वच्छन्दानुरोधात्कल्पयन्ति स्वरूपमेतस्य । तथा हि—

कर्तारं कतिचित्किलानुमिमते कार्यार्थमुर्व्यादिभिः
केऽप्याहुः पुरुषस्य यस्य पुरतः सृज्यं प्रकृत्या जगत् ।
क्लेशैः कर्मभिराशयैश्च सकलैरस्पृष्टरूपोऽखिल-
प्रज्ञोऽनादिगुरुः स ईश्वर इति व्याख्यान्ति केचित्तु यम् ॥ १४ ॥

क्रोधारूढेत्यादि—अलिके ललाटे क्रोधेनारूढाऽऽरोपिता भ्रुकुटिर्येन सः, तथा क्रूरखड्गप्रहारेण छिन्ना ग्रीवा येषामेवंभूतैस्त्रिदशनिकरैर्देवसमूहैश्छन्ना आच्छादिता सङ्ग्रामभूमिर्येन सः । तथा शक्रश्च श्रीशो विष्णुश्च द्रुहिणः, अब्जयोनिश्चैतेषां शरणालाभे यद्विद्राणं पलायनं तदेव विद्या तस्या दाने उन्निद्रः प्रयतो वीरभद्रः प्रणतजनताभद्रदो भूयादिति शेषः ॥ १३ ॥

(क) अन्तर्वाणयो देवास्ते स्वच्छन्दानुरोधात् स्वेच्छावशात् एतस्य शम्भोः स्वरूपं कलयन्ति एतदाकारोऽयमिति वर्णयन्ति ।

कर्तारमित्यादि—कतिचिन्नैयायिका वैशेषिकाश्च कार्यार्थं कार्यनिमित्तमुर्व्यादिभिः क्षित्यङ्कुरादिभिः कर्तारमनुमिमते अर्थाद्यावत्कार्यं कर्तृजन्यत्वव्याप्यमिति विलक्षणैः क्षित्यङ्कुरादिकार्यैरल्पशक्तिव्यतिरिक्तं कर्तारमनुमिमते इति । केऽपि सांख्याः पुरुषस्य पुरतः साक्ष्ये प्रकृत्या सत्वरजस्तमोमय्या जगत्सृज्यमाहुः । केचित्तु योगिनः क्लेशैरविद्यादिभिः पञ्चभिः कर्मभिः शुक्लाशुक्लरूपैस्त्रिभिराशयैर्वासनाभिश्च

अपि च—

श्रुतमिति निगमान्तेष्वेकमेवाद्वितीयं
निरवधि परिपूर्णं ब्रह्म सच्चित्सुखात्म ।
विलसति किल यस्मिन्विश्वमेतत्तमिस्रे
स्रजि फणिवदबोधादित्थमाहुः किलान्ये ॥ १५ ॥

मन्त्री—तत्तादृशमेनमवाङ्मनसगोचरमहिमानं पङ्कजासनपाकशासनप्रभृतयो देवाः प्रणमन्ति भगवन्तम् । अतः सेवावसरं प्रतिपालय क्षणमात्रम् ।

राजा—सम्यङ्निरूपितममात्येन ।

नमदमरसहस्रमौलिमालापरिगलितैर्भुवि पारिजातपुष्पैः ।
अलिकुलमनवाप्तदिव्यगन्धग्रहणकुतूहलि कृष्यते समन्तात् ॥ १६ ॥

काराज्जात्यायुर्भोगरूपैर्विपाकैश्च न स्पृष्टमपरामृष्टं रूपं यस्य सः, अखिलप्रज्ञः सर्वज्ञः, तथा च पातञ्जलसूत्रम्—"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः इति। 'तत्र निरतिशयं सर्वज्ञबीजम्' इति च । अनादिश्चासौ गुरुरथवाऽनादीनां ब्रह्मादीनां गुरुः स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात्, इति यं व्याख्यन्ति स ईश्वरः ॥ १४ ॥

श्रुतमितीत्यादि—निगमान्तेषु वेदान्तेषु 'एकमेवाद्वितीयं ब्रह्मे'ति श्रुतमत्र हि—ऐक्यावधारणद्वैतप्रतिषेधप्रतिपादकैरेकम्-(१) एव (२) अद्वितीयम् (३) इति त्रिभिः पदैः सद्रूपात्मवस्तुन्यपि वस्तुत्वसामान्यादनात्मनीव प्रसक्तं स्वगतसजातीयविजातीयभेदत्रयं क्रमान्निवार्यतेऽर्थाद्यथा पत्रपुष्पफलादिभिः स्वगतो भेदो वृक्षान्तराच्च सजातीयो भेदः शिलादिभिश्च विजातीयो भेदोऽस्ति तथा न ब्रह्मणः । निरवधि परिपूर्णं देशकालवस्तुभिरपरिच्छिन्नं सच्चिदानन्दस्वरूपं ब्रह्म, यस्मिन् किलैतद्विश्वं दृश्यजातं तमिस्रे तमसि अबोधात् भ्रमात्स्रजि फणिवद्विलसति । इति इत्थमन्ये वेदान्तिनः आहुः किल ॥ १५ ॥

नमदमरेत्यादि—नमद्यदमरसहस्रं तस्य मौलिमालाभ्यः परिगलितानि तैः पारिजातपुष्पैः कल्पतरुविशेषकुसुमैरनवाप्तदिव्यगन्धस्य ग्रहणे कुतूहलि कौतुकवदलिकुलं समन्तात् कृष्यते ॥ १६ ॥

मन्त्री—अवसरोऽयमखिलसुरासुरगुरोः(क) सरोरुहाकरसंवेशविद्यादेशिककलाशेखरस्य सेवनाय देवस्य । अत एव—

सम्भ्रान्तनन्दिकरघूर्णितवेत्रपात—
भीतापगत्वरगणव्रजवर्जितेन ।
एतेन कीर्णकुसुमेन पथा महेशं
सेवस्व भक्तिमददुर्लभसंनिधानम् ॥ १७ ॥

(ततः प्रविशति यथानिर्दिष्टः परमेश्वर्य्या सह परमेश्वरः)

परमेश्वरः—अयि गिरीन्द्रसुते !

अनितरसाधारणया भक्त्या जीवस्य मामनुस्मरतः ।
सपदि मयास्य पुरस्तात्संनिहितं सपरिवारेण ॥ १८ ॥

देवी—देव, तुरिअं तुह आगमणं एव्व दंसेदि अण्णण्णतुल्लं भत्तिमत्तणम् ।

राजा—(मान्त्रिणा सह त्वरितमुपसृत्य)

(क) सरोरुहाकरस्य कमलसमूहस्य संवेशविद्यायां निर्मीलनशिक्षायां देशिक आचार्यश्चन्द्र इत्यर्थस्तस्य कला शेखरे यस्य तस्य शंकरस्येत्यर्थः ।

सम्भ्रान्तेत्यादि—संभ्रान्तो यो नन्दी गणविशेषः तस्य करे घूर्णितमितस्ततश्चालितं यद्वेत्रं दण्डः तस्य पातेन भीतास्त्रस्ता अत एवापगत्वराः धावन्तः ये गणाः तेषां व्रजेन समूहेन वर्जितो रहितस्तेन । कीर्णानि कुसुमानि यत्र एवम्भूतेन एतेन पथा भक्तिमतां भक्तानां न दुर्लभं सन्निधानं सन्निधिर्यस्य एवम्भूतम्महेशं सेवस्व ॥ १७ ॥

अनितरेत्यादि—स्पष्टम् ॥ १८ ॥

(१) देव ! त्वरितं तवागमनमेव दर्शयत्यनन्यतुल्यं भक्तिमत्त्वम् ।

विधिहरिविषमेक्षणात्मकः सन्सृजति बिभर्ति निहन्ति यो जगन्ति ।
तदहममलमेकमेव सच्चित्सुखवपुषं परमेश्वरं नतोऽस्मि ॥ १६ ॥

(इति प्रणमति)

भगवन्—वत्स, मन्त्रिणा सममभिमतेन युज्यस्व ।

जीवः—

(मन्त्रिणा सहोत्तिष्ठन् । शिरस्यञ्जलिं बद्ध्वा)

(क) जय जय जगदीश ! देवासुरावध्यतादर्पवेगोद्धृतत्वत्पदाङ्गुष्ठनिष्पीडनस्तब्धकैलासमूलात्तदोर्विंशतिप्रस्तुतस्तोत्रपुष्यद्दयारक्षितोन्मुक्तलङ्कापते ! निष्प्रपञ्चाकृते !

(ख) जननमरणलाभपौनःपुन्योदीतितद्भञ्जनारब्धघोरव्रतोत्पीडितत्वक्कठोरश्रवःप्रार्थनाजात कोपोत्थशापामिषाशभिवत्त्रापसत्राणकृद्रामरूपग्रह ! स्वेषु सानुग्रह !

विधिहरीत्यादि—विधिर्ब्रह्मा हरिर्विष्णुः विषमेक्षणः शिवश्चात्मा स्वरूपं यस्यैवम्भूतस्सन् यः जगन्ति लोकान् सृजति उत्पादयति, बिभर्ति रक्षति निहन्ति तम् अमलं निर्मलम् एकमेवाद्वितीयं सच्चित्सुखवपुषं सच्चिदानन्दस्वरूपं परमेश्वरमहं नतोऽस्मि ॥ १६ ॥

(क) देवासुरैः (कर्तृभिः) याऽवध्यता सैव दर्पस्तस्य वेगेनोद्धतस्ततस्त्वत्पदाङ्गुष्ठनिष्पीडनेन स्तब्धः स्थिरीभूतो यः कैलाशस्तस्य मूलेनात्ताऽऽक्रान्ता पिच्चिता पीडिता वा दोर्विंशतिर्यस्य तेन प्रस्तुतं स्तोत्रं तेन पुष्यन्ती या दया तया रक्षित उन्मुक्तश्च लङ्कापतिर्येन तत्सम्बुद्धौ ।

(ख) जननमरणलाभस्य यत् पौनःपुन्यं तदेवोदीतिः उत्कटा ईतिः उपद्रवविशेषः तस्य भञ्जनायारब्धं यद् घोरं कठिनं व्रतं तपस्तेन पीडिता प्रक्षुण्णा त्वक् यस्यैवम्भूतो यः कठोरश्रवा मुनिविशेषस्तस्य प्रार्थनया जात ! गृहीतविग्रह, ! कोपोत्थशापेन क्रोधजन्यविरुद्धा-

(क) अनुपमितगृहीततारुण्यलक्ष्मीनिरीक्षोन्मिषद्दारुकारण्यनारीव्रत-
भ्रंशकुप्यन्मुनीन्द्राभिचारोत्थितं तुङ्गनादं कुरङ्गं ज्वलज्ज्वाल-
मग्निं कराभ्यां वहन् दृश्यसे सद्भिरामृश्यसे ।

कलशभवमहर्षिवातापिनिर्वापणाविन्ध्यसंस्तम्भना-
दक्षिणोर्वीगृहा (भरा) पादनासिन्धुनाथाम्बुनिः
शेषनिष्पानशक्तिप्रदायिस्वपादाम्बुज-
ध्यानमाहात्म्य ! शंभो ! नमस्ते नमस्ते (ख)

प्रसूनशरदाहिने प्रबलकालकूटाशिने
कृतान्तपरिपन्थिने त्रिपुरगर्वनिर्वासिने ।

भिध्यानेन आमिषाशीभवद्भ्यः रक्षोभवद्भ्यः तापसानां त्राणकृति तपस्विजनरक्षके रामरूपे दाशरथिस्वरूपे ग्रहो यस्य तत्सम्बुद्धौ । भगवान् शिव एव रामकृष्णादिनानालीलाविग्रहेषु अवतीर्य दानवोपप्लवेभ्यो भूमिभारमुद्धरतीति शैवसम्प्रदायविदः ।

(क) अनुपमितं गृहीता (शिवेनेति शेषः) या तारुण्यलक्ष्मीर्यौवनश्रीस्तस्या निरीक्षया (मुनिपत्नीकृतया) उन्मिषन्नुत्पन्नो यो दारुकारण्ये नारीणां व्रतभ्रंशस्तेन कुप्यतां मुनीन्द्राणामभिचारेण विरुद्धाभिशंसनेनोत्थितं तुङ्गनादं भीषणरवं कुरङ्गं ज्वलज्ज्वालं देदीप्यमानमग्निञ्च कराभ्यां वहन् दृश्यसे ।

(ख) कलशभवमहर्षेरगस्त्यस्य वातापिनिर्वापणायां वातापिनाम्नो दैत्यस्य विनाशने, विन्ध्यस्य गिरेः संस्तम्भनायां वृद्ध्यवरोधने, दक्षिणोर्व्यां दक्षिणदिशि गृहापादनायां गृहनिर्माणे तथा सिन्धुनाथाम्बुनो निःशेषःनिष्पाने च शक्तिप्रदायि स्वपदाम्बुजध्यानस्य माहात्म्यं यस्य तत्सम्बुद्धौ ॥ २० ॥

प्रसूनशरेत्यादि—हे प्रमथनाथ ! प्रबलं कालकूटमशितुं शीलमस्य तस्मै, प्रसूनशरः कामः तं दग्धुं शीलमस्य तस्मै, त्रिपुरः राक्षसविशेषः

जटापटलयन्त्रितामरतरङ्गिणीस्रोतसे
प्रपन्नभयहारिणे प्रमथनाथ ! तुभ्यं नमः ॥ २१ ॥

निष्क्रियस्यापि देवस्य जगत्सृष्ट्यादिकर्मणि ।
प्रवृत्तिं कुर्वतीं देवीं प्रपद्ये भक्तवत्सलाम् ॥ २२ ॥

देवी—णाह इमस्स मणोरहं पुच्छिअ झत्ति तं णिवत्तेहि (१) ।

भगवान्—प्रिये, किमत्र प्रष्टव्यम्, विदितमेव । यत्त्वमराजः कैश्चिदसाध्यरोगैः सहानुगतो विकुर्वाणो निर्मूलं छेत्तव्य इत्येतस्य मनोरथ इति तत एतस्मै योगसिद्धिमुपादिश्य निर्जितनिखिलरोगं ब्रह्मरन्ध्रस्थितचन्द्रमण्डलनिष्यन्दमानामृताप्लुतशरीरं निजानन्दानुभवतुच्छीकृताखिलप्राकृतसुखान्तरं सफलमनोरथमेनं कृतार्थयिष्यामि ।

देवी—(सहर्षम्) सरिसं खु एदं तुम्हकेरस्स भत्तवच्छलस्स । (२)

भगवान्—वत्स जीव ! योगसिद्धिमुपदिशामि ते ।

जीवः—भगवन् को नाम योगः कीदृशी वा तस्य सिद्धिः ।

तस्य गर्वमहङ्कारं निर्वासितुं निराकर्तुं शीलमस्य तस्मै, कृतान्तो यमः तस्य परिपन्थी शत्रुः तस्मै, जटापटले जटाजूटे यन्त्रितममरतरङ्गिण्या गङ्गायाः स्रोतो येन तस्मै, प्रपन्नः शरणागतः तस्य भयं हर्तुं शीलमस्य तस्मै तुभ्यं नमः ॥ २१ ॥

निष्क्रियस्यापीत्यादि—निष्क्रियस्य क्रियारहितस्यापि देवस्य शिवस्य जगतः सृष्ट्यादिकर्मणि उत्पत्तिस्थितिलयादिकर्मणि प्रवृत्तिं नियुक्तिं कुर्वतीं विदधतीं भक्तवत्सलां भक्तप्रियां देवीं प्रपद्ये शरणमागतोऽस्मि ॥ २२ ॥

(१) नाथ, अस्य मनोरथं पृष्ट्वा झटिति तं निर्वर्तय ।
(२) सदृशं खल्वेतद्युष्मादृशस्य भक्तवत्सलस्य ।

भगवान्—वत्स ! श्रूयताम्, योगश्चित्तवृत्तिनिरोधः । चित्तं नामान्तःकरणम् । यच्चक्षुरादिकरणद्वारा बहिर्निर्गच्छद्विषयाकारेण-परिणमति । यत्तादात्म्यापन्नो द्रष्टापि तद्रूपाकार एव परिभाव्यते, तदुक्तम्—

ध्यायन्त्यां ध्यायतीवात्मा चलन्त्यां चलतीव च ।
बुद्धिस्थे ध्यानचलने कल्प्येते बुद्धिसाक्षिणि ॥ इति ॥

'ध्यायतीव लेलायतीव' इति श्रुतिः । तस्य वृत्तयो नाम कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्याद्याः श्रुतीरिता आन्तराः, बाह्याश्च शब्दस्पर्शादिविषयग्राहिण्यः । सत्त्वरजस्तमोरूपगुणत्रयात्मिकानां च तासां दैवासुरसंपद्रूपत्वेन द्वेधा विभाग उक्तो गीतायाम् ।

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥

इत्यादिर्दैवीसंपत् । 'दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।' इत्यादिरासुरी संपत् । तत्र दैवी संपत्सात्त्विकी । आसुरी तु रजस्तमःप्रधाना । 'दैवी संपद्विमोक्षाय निबन्धायासुरी मता' । तासां च सर्वासामन्तराणां बाह्यानां च चित्तवृत्तीनां निरोधो नाम स्वविषयेभ्यः प्रतिनिवर्त्य क्वचित्सगुणे निर्गुणे वा वस्तुनि चित्तस्य समवस्थानम् । (क) तच्च दृढतरवैराग्यसत्कारनिरन्तरसेवनाभ्यां सबलेन लभ्यते । तदुक्तम्—

(क) तच्च चित्तस्य समवस्थानं दृढतरवैराग्येण सत्कारपूर्वक-निरन्तरसेवनेन अभ्यासेन सबलेन लभ्यते, तथा च योगसूत्रम् (स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः,) इति ।

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ इति

एतादृशयोगस्य सिद्धिर्नाम ध्येयवस्तुसाक्षात्काररूपावस्थितिः।

मन्त्री–भगवन् !

एवं भूताः क इव घटते चित्तवृत्तीर्निरोद्धुं
वैराग्येणाभ्यसनविधिना स्याच्चिरात्तन्निरोधः ।
जेयः शीघ्रं रिपुरपरथा न स्थितिर्नः पुरेऽतो
योगे सिद्धिर्भवति च यथाऽनुग्रहस्ते तथाऽस्तु ॥ २३ ॥

जीवः–भगवन् ! स्मृतिस्ते सकलाभीष्टं दत्ते किमुत दर्शनम् ।
तत्प्राप्तममितैः पुण्यैः सद्यः सिद्धिं ददातु मे ॥ २४ ॥

देवी–(सदर्पम्) देव, संकप्पादो जेव्व से जोअसिद्धी होदु त्ति अणुगेह्णीअदु एसो (१)

भगवान्–वत्स ! देव्यैवमनुगृहीतोऽसि । सङ्कल्पादेव ते योगसिद्धिर्भवतु ।

मन्त्री–राजन् ! भगवत्या भगवता च संकल्पादेवाखिलयोगसिद्धिरनुगृहीता । तत्सर्वथाः कृतार्थाः स्मः ।

एवंभूता इत्यादि—एवम्भूताः पूर्वोक्ताः बाह्या आभ्यन्तराश्च चित्तस्यान्तःकरणस्य वृत्तीः व्यापारान् निरोद्धुं नियन्तुं क इव घटते क्षमः, वैराग्येण अभ्यसनविधिना अभ्यासेन च चिरात् बहुना कालेन तन्निरोधः स्यात् । रिपुर्यक्ष्मा च शीघ्रं यथा स्यात् तथा जेयः, अपरथा पुरे शरीरे नः अस्माकं स्थितिर्नस्यात् अतः यथा योगे सिद्धिर्भवति तथा ते अनुग्रहः अस्तु ॥ २३ ॥

स्मृतिस्त इत्यादि—स्पष्टम् ॥ २४ ॥

(१) देव संकल्पादेवास्य योगसिद्धिर्भवत्वित्यनुगृह्यतामेषः ।

राजा—(सप्रणामम्) अनुगृहीतैवेयम् । यतः—

या प्रत्यक्षपदार्थमात्रविषया सा योगसंस्कारतः (क)
संस्कारान्प्रतिबध्नतीतरकृतान्धीः कापि मे जृम्भते ।
सूक्ष्मं यत्तु विदूरमव्यवहितं सर्वान्विशेषान् स्फुटं
पश्याम्येष यथावदद्य परमार्थोद्भूतया प्रज्ञया ॥ २५ ॥

आश्चर्योऽयं भगवत्प्रसादमहिमा ।

या प्रत्यक्षेत्यादि—या प्रत्यक्षपदार्थमात्रविषया सा योगसंस्कारत इतरकृतसंस्कारान् व्युत्थानसंस्कारान् प्रतिबध्नती (तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धीति पातञ्जलसूत्रम्) काऽपि धीः (ऋतम्भरा नाम्नी) मे जृम्भते परिस्फुरति तया परमार्थोद्भूतया प्रज्ञया यद्दूरं यच्च सूक्ष्मं तत्सर्वमव्यवहितं व्यवधानरहितं स्फुटं च सर्वान् विशेषान् यथावत् भ्रान्तिरहितमद्य पश्यामि ॥ २५ ॥

(क) सम्यक् संशयविपर्ययरहितत्वेन प्रज्ञायते भाव्यस्य स्वरूपं येन स सम्प्रज्ञातो नाम समाधिः भावनाविशेषः सवितर्क-निर्वितर्क-सविचार-निर्विचार-सानन्द-साऽस्मित-भेदात् षड्विधः । तत्र भावना नाम विषयान्तरपरिहारेण भाव्यस्य चेतसि पुनः पुनर्निवेशनम् । भाव्यश्च द्विविधं जडाजडभेदात् । जडानि चतुर्विंशतिः अजडः पुरुषः । तत्र यदा महाभूतेन्द्रियाणि स्थूलानि विषयत्वेनाऽऽदाय पूर्वापरानुसंधानेन शब्दार्थोल्लेखसंभेदेन च भावना क्रियते तदा सवितर्कः समाधिः[1] । अस्मिन्नेवावलंबने पूर्वापरानुसंधानशब्दार्थोल्लेखशून्यत्वेन यदा भावना क्रियते तदा निर्वितर्कः[2] । एवं तन्मात्रान्तःकरणलक्षणं सूक्ष्मविषय-

---

(१) इदमेव योगिनोऽपरं प्रत्यक्षम् ।

(२) इदमेव योगिनः परं प्रत्यक्षमसदारोपगन्धस्याऽप्यभावात् । इदमेव श्रुतानुमानयोर्बीजम्, अतो हि श्रुतानुमाने प्रभवतः । अनेनैव परेण प्रत्यक्षेण योगिनोऽर्थतत्त्वं गृहीत्वा उपदिशन्ति उपपादयन्ति च ।

भगवान्–देवि ! एवं संप्रज्ञात (क) समाधिरेतस्य प्रादुर्भूतः, य एवमालम्बनामनुभवति ऋतंभरां नाम प्रज्ञाम् । अतःपरं निर्बीजयोगसंज्ञमसम्प्रज्ञातसमाधिमस्यानुगृह्णामि ।

देवी–अणुगेह्णीअदु अप्पणिव्विसेसो एसो । (१)

मालम्ब्य तस्य देशकालधर्मावच्छेदेन यदा भावना प्रवर्तते तदा सविचारः । अस्मिन्नेवावलम्बने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वेन भावना क्रियमाणा निर्विचार इत्युच्यते । एवं पर्यन्तः समाधिः ग्राह्यसमापत्तिरित्युच्यते । यदा तु रजस्तमोलेशानुविद्धमन्तःकरणसत्त्वं भाव्यते तदा गुणभावात् चितिशक्तेः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात् सानन्दः समाधिर्भवति । इयं च ग्रहणसमापत्तिरिति व्यपदिश्यते ।

ततः परं रजस्तमोलेशानभिभूतं शुद्धसत्त्वमालम्बनीकृत्य या भावना प्रवर्तते, तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावात् चितिशक्तेरुद्रेकात् सत्तामात्रावशेषत्वेन समाधिः साऽस्मित इत्युच्यते । अस्मिन्नेव समाधौ ये कृतपरितोषाः परमात्मानं पुरुषं न पश्यन्ति, तेषां चेतसि स्वकारणे लयमुपगते ते प्रकृतिलया इत्युच्यन्ते । ये तु परं पुरुषं ज्ञात्वा भावनायां प्रवर्तन्ते तेषामियं विवेकख्यातिः गृहीतसमापत्तिरित्युच्यते । अत्र समाहितचित्तस्य योगिनो या प्रज्ञा जायते तस्या ऋतंभरेति अन्वर्था संज्ञा भवति । सा हि सत्यमेव बिभर्ति, न हि तत्र विपर्य्यासगन्धो विद्यते तस्मादन्वर्था । सैषा श्रुतप्रज्ञातः अनुमानप्रज्ञातश्च भिन्नविषया यतः श्रुतप्रज्ञानुमानप्रज्ञे च सामान्यविषये, इयन्तु विशेषविषयेति । एतत्प्रज्ञाप्रभवश्च संस्कारो व्युत्थानसंभवान् संस्कारान् प्रतिबध्नाति इति ता एताः पूर्वोक्ताः षडपि समाधयः साऽलम्बनत्वात् सबीजाः सम्प्रज्ञाता इत्युच्यन्ते । ततः तस्यापि सम्प्रज्ञातस्य निरोधे सति, सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयाद् या संस्कारमात्रा वृत्तिरुदेति तस्यास्तस्या. नेति नेतीति केवलं पर्युदासनान्निर्वीजः समाधिराविर्भवति यस्मिन् सति पुरुषः स्वरूपनिष्ठः शुद्धो भवतीति ।

(१) अनुगृह्यतामात्मनिर्विशेष एषः ।

जीवः—(सहर्षोल्लासरोमाञ्चम्) आश्चर्यमाश्चर्यम् ।

भगवत्करुणासमित्समिद्धे दृढनिर्बीजसमाधियोगवह्नौ ।
प्रविलापितसर्वचित्तवृत्तिः परमानन्दघनोऽस्मि नित्यतृप्तः ॥ २६॥

भगवान्—देवि, झटिति विघटिताखिलपराग्वृत्तिः प्रत्यगात्मैक्यानुभवरूपोऽसंप्रज्ञातसमाधिराविर्भूतो वत्सस्य । यत एवमनुभूतमर्थमनुवदति ।

देवी—देव, किदत्थो क्खु एसो जो एवंविधस्स देवाणुग्गहस्स भाअणं जादो । (१)

भगवान्—संप्रत्येनं व्युत्थाप्य प्रकृतकार्यप्रवणं करोमि (जीवं प्रति) वत्स ! अन्यदपि किंचिदनुशासनीयोऽसि ।

जीवः—(व्युत्थाय) भगवन् अवहितोऽस्मि ।

भगवान्—प्राचीनः सचिवः प्रियस्तव सुहृद्यो ज्ञानशर्मा मुनिः
सोऽन्यस्यापि सुदुर्लभः स भवता मान्यः सदाहं यथा ।
श्रेयःसंघटनाय हन्त भवतः सत्यं स एवार्हति
प्रेयस्त्वैहिकमातनोतु सततं विज्ञानशर्मापि ते ॥ २७ ॥

भगवदित्यादि—भगवतः करुणैव समित् तया समिद्धे उद्दीपिते दृढश्चासौ निर्बीजसमाधिरूपोऽसम्प्रज्ञातसमाधिरूपो योग एव वह्निस्तस्मिन्प्रविलापिता लयं गमिताः सर्वाः अशेषाः चित्तवृत्तयो यस्य। नित्यतृप्तः परमानन्दघनः संवृत्तोऽस्मि ॥ २६ ॥

(१) देव, कृतार्थः खल्वेष य एवं विधस्य देवानुग्रहस्य भाजनं जातः।

प्राचीनः सचिव इत्यादि—यः ज्ञानशर्मा मुनिः तव प्राचीनः सचिवः प्रियः सुहृच्चास्ति, सोऽन्यस्य सुदुर्लभः अपि (अपिः एवार्थे) भवता च सोऽहं यथा अहमिव सदामान्यः । हन्त ! स एव भवतः सत्यं श्रेयःसंघटनाय वास्तविककल्याणप्राप्तये अर्हति । ऐहिकं लौकिकं प्रेयस्तु विज्ञानशर्माऽपि ते सततमातनोतु ॥ २७ ॥

शश्वज्ज्ञानादभिन्नः सन्विज्ञानमपि मानय ।
एवं सति घटेयातां भुक्तिमुक्ती करे तव ॥ २८ ॥

राजमन्त्रिणौ-(साष्टाङ्गं प्रणम्योत्थाय) अनुगृहीतौ स्वः ।

देवी-सुमरणमेत्तसंणिहिदं णाणसम्माणं सचिवं विण्णाणेण समं-मुत्तविरोहं करिअ दुवे वि मन्तिणो रण्णो हत्थे समप्पअन्तेण भअवदा बहुलीकिदं भत्तवत्सलत्तणम् । (१)

(नेपथ्ये)

जीवे शिवप्रापितयोगसिद्धौ कल्ये जनान्ध्येन समं तमोवत् ।
पापो विषूच्या सह राजयक्ष्मा गदैरसाध्यैः सह नाशमेति ॥ २९ ॥
ईशानस्य निदेशात्प्राप्ता साप्यत्र शांकरी भक्तिः ।
चत्वारोऽपि पुमर्थाः पुंभिर्यस्याः प्रसादतो लभ्याः ॥ ३० ॥

मन्त्री-(आकर्ण्य) प्रियं नः प्रियम् । भगवान् काल एष एवं नः प्रियमाचष्टे ।

राजा-(सहर्षोल्लासम्)

शश्वदित्यादि—स्पष्टम् ॥ २८ ॥

(१) स्मरणमात्रसंनिहितं ज्ञानशर्माणं सचिवं विज्ञानेन सम-मुक्तविरोधं कृत्वा द्वावपि मन्त्रिणौ राज्ञो हस्ते समर्पयता भगवता बहुलीकृतं भक्तवत्सलत्वम् ।

जीवे शिवेत्यादि—जीवे, शिवेन प्रापिता प्रदत्ता योगसिद्धिर्यस्मिंस्तस्मिन्सति, कल्ये उषसि जनानामान्ध्येन समं सह तमोवत् तिमिरमिव विषूच्या सह पापः राजयक्ष्मा असाध्यैः गदैः सह नाशमेति ॥२९॥

ईशानस्येत्यादि—ईशानस्य शङ्करस्य निदेशात् कृपयाऽत्र शाङ्करी शिवसम्बन्धिनी भक्तिरपि प्राप्ता। यस्याः प्रसादतश्चत्वारश्चतुः संख्याका अपि पुमर्थाः धर्मार्थकाममोक्षाः पुंभिर्लभ्याः भवन्तीति शेषः ॥ ३० ॥

मूर्धन्यमण्डलनिकेतसुधांशुबिम्ब-
निःष्यन्दिशीतलसुधास्रुतिनिर्वृताङ्गः ।
मेघावृतिव्यपगमे गगनं यथाच्छं
चैतन्यमावरणवर्जितमस्मि तद्वत् ॥ ३१ ॥

मन्त्री—एवमेवायं जीवो राजा भगवतोः प्रसादान्नीरोगो नित्यमुक्तो निराबाधो बहुकालं जीयादिति प्रार्थये ।

भगवान्-तथैवास्तु ।

देवी—तह होदु (२) ।

राजा—(सहर्षविस्मयं मन्त्रिणं प्रति)

मन्त्रिञ्जन्मैव दोषः प्रथममथ तदप्याधिभिर्व्याधिभिश्चे-
ज्जुष्टं कष्टं बतातः किमधिकमपि तु त्वन्मतेर्वैभवेन ।
देव्या भक्त्याः प्रसादात्परमशिवमहं वीक्ष्य कृच्छ्राणि तीर्णः
सर्वाणि द्राक्तदत्यद्भुतमिह शुभदं संविधानं तवेदम् ॥ ३२॥

मूर्धन्यमण्डलेत्यादि—मूर्धन्यमण्डलं ब्रह्मरन्ध्रमेव निकेतं स्थानं यस्यैवम्भूतं यत्सुधांशुबिम्बं चन्द्रमण्डलं तस्मात् निष्यन्दिनी क्षरन्ती शीतला हिमा या सुधास्रुतिः पीयूषनिर्झरः तया निर्वृतानि सुखितानि अङ्गानि, यस्य सः, मेघावृतिव्यपगमे घनावरणव्यपाये यथा गगनमच्छं भवति तद्वदावरणवर्जितं चैतन्यमस्मि ॥ ३१ ॥

(२) तथा भवतु ।

मन्त्रिन्नित्यादि—हे मन्त्रिन् ! प्रथमं जन्म एव शरीरपरिग्रह एव दोषः, अथ तदपि जन्म चेत् आधिभिर्मानसीभिर्व्याधिभिः शारीरीभिश्च व्यथाभिः जुष्टं चेत् अतोऽधिकं किं कष्टं बत इति खेदे । अपि तु त्वन्मतेः तव बुद्धेः वैभवेन माहात्म्येन देव्याश्च भक्त्याः प्रसादात् अहं परं शिवं श्रीशङ्करं वीक्ष्य साक्षात्कृत्य द्राक् झटिति सर्वाणि कृच्छ्राणि तीर्णोऽभवम् । इह अस्मिन्प्रसङ्गे तव इदं संविधानमायोजनं अत्यद्भुतं शुभदं जातमिति शेषः ॥ ३२ ॥

मन्त्री–राजन् !

बहुजन्मार्जितैः पुण्यैस्तावकैरेष तोषितः ।
सर्वाभीष्टं ददातीशः संविधानं किमत्र मे ॥ ३३ ॥

भगवान्–वत्स ! किमतः परमन्यत्तव प्रियं कुर्मः ।

राजा–देवदेव भगवन् ! सर्वमपि प्रियमाचरितमेव ।

सर्वेऽपि मे प्रशमिता रिपवः पुरेऽभू–
दारोग्यमैक्षिषि भवन्तमुमासहायम् ।
योगं ततस्त्वदुपदिष्टमवाप्य जीव–
न्मुक्तोऽस्मि ते करुणया किमतः प्रियं मे ॥ ३४ ॥

तथापीदमस्तु भरतवाक्यम्–

पर्जन्यः समयेऽभिवर्षतु फलं वाञ्छानुरूपं मही
प्रौढामात्यनिरूपिते पथि महीपालाः पदं तन्वताम् ।

बहुजन्मार्जितैरित्यादि—स्पष्टम् ॥ ३३ ॥

सर्वेऽपीत्यादि—सर्वेऽपि मे रिपवो यक्ष्मादयः प्रशमिताः । पुरे शरीरे च आरोग्यमभूत् । उमासहायं भवन्तमैक्षिषि, त्वदुपदिष्टं योगमवाप्य ते करुणया जीवन्मुक्तोऽस्मि, अतः परं मे किं प्रियमिति ॥ ३४ ॥

पर्जन्य इत्यादि—पर्जन्यो जलपूर्णो मेघः समये यथाकालम् अभिवर्षतु, मही वाञ्छानुरूपं यावदपेक्षं फलम्, उत्पादयतु इति शेषः । प्रौढामात्येन सुसचिवेन निरूपिते उपदिष्टे ।

कर्णालङ्कृतये भवन्तु विदुषां कान्ताः कवीनां गिरो
भूयादस्य कवेश्चिरायुररुजो भक्तिश्च शैवी दृढा ॥ ३५ ॥

(इति निष्क्रान्ताः सर्वे)

इति सप्तमोऽङ्कः ।

कवीनां कान्ता गिरः विदुषां कर्णालङ्कृतये भवन्तु । चिरायुश्चासावरुक् च तस्यास्य कवेरिति । शेषं सुगमम् ।

नभोग्रहाङ्केन्दुमिते शुभे विक्रमवत्सरे ।
चैत्रशुक्लदले रामनवमीकुजवासरे ॥ १ ॥
'खुर्जा'नगरवास्तव्य-नारायणभिषक्कृतम् ।
परिपूर्तिमगाच्छ्रीमज्जीवानन्दरसायनम् ॥ २ ॥

इति श्रीजीवानन्दरसायने संक्षिप्तटिप्पणे सप्तमोऽङ्कः ॥

विजयतां श्रीहरिः ।

श्रीजीवानन्दनरसायनटिप्पणस्य

परिशिष्टभागः

(१) प्रथमेऽङ्के—सप्तदशे (१७) पद्ये प्रथमे पादे द्वितीयस्य चादावित्थं पाठः—

यद्ध्रस्वदीर्घप्लुतं प्रायो वर्णनिभमिति, प्रायो बाहुल्यतुल्ययोरिति विश्वः। प्रायो बाहुल्येन वर्णनिभमिति वर्णसदृशम्। ह्रस्वदीर्घेत्यादि वर्णनिभमिति च ताम्रचूडरसितस्य विशेषणम्। शिष्टं यथोक्तम्।

(२) प्रथमेऽङ्के—एकोनत्रिंशत्तमं २९ पद्यमेवं पठनीयम्—

दुर्जाते सुमहत्यपि क्षितिपतेः शालीनतामत्यज—
ञ्छत्रूञ्जेतुमथेप्सितं घटयितुं शक्नोत्युपायेन यः।
प्रायो मन्त्रिपदं महोन्नतमतिः प्राप्तुं स एवार्हति
स्वोत्सेकी न तु पण्डितो भुवि जनो वाचा वदन्पौरुषम्॥ २९॥

एवं च व्याख्येयम्—यः (मनीषी) कर्ता क्षितिपते राज्ञः सुमहत्यपि सुविशाले दीर्घतरेऽपि दुर्जाते व्यसने 'दुर्जातं व्यसनं प्रोक्त' मितिविश्वः। समापतिते सतीतिशेषः। तथा च कालिदासः "दुर्जातबन्धुरयमृक्षहरीश्वरो मे" इति रघुवंशे। शालीनतां विनयवत्त्वम् अत्यजन् न मुञ्चन् उपायेन सामादिना शत्रून् अरातीन् जेतुं वशीकर्तुमथ चेप्सितं राज्ञोऽभिलषितं च घटयितुं साधयितुं शक्नोति क्षमते समर्थो भवतीत्यर्थः। प्रायः विशेषतः बाहुल्येन प्रायो बाहुल्यतुल्ययोरिति विश्वः। महोन्नतमतिः महानुभावो मनीषी स एव भुवि लोके मन्त्रिपदममात्यपदवीं लब्धुमर्हति योग्यो भवति। तु किन्तु स्वोत्सेकी स्वस्मिन् उत्सेको गर्वः यस्यास्ति सः आत्मश्लाघी वाचा वाङ्मात्रेण पौरुषं पराक्रमं वदन् ख्यापयन् हुं मयेदंकृतं, तत्कृतं, तदेतत्करिष्यामि कियदिदं क्षुद्रं कार्यजातम्, सर्वमहं क्षणेनैव विधातुं क्षमोऽस्मीत्यादि भृशं शंसनपरः। न तु क्रियात्मना तद्भाषणं परिणमयन्। पण्डितोऽपि अधीतशास्त्रोऽपि बुधोऽपि नार्हति न मन्त्रिपदं लब्धुं योग्योऽस्तीति।

राज्ञि सङ्कटव्यापन्ने सति यः स्वविनयं रक्षन् स्वनीतिचातुर्येण सामादिभिरुपायैस्तद् व्यसनं परिहर्तुं शत्रूञ्जेतुं च समुद्युङ्क्ते, स एव मनीषी मन्त्रिपदयोग्यो भवति, नान्यो वाङ्मात्रेणाऽऽत्मपराक्रमविकत्थनपरः पण्डितोऽपीति भावार्थः ।

(३) द्वितीयेऽङ्केऽष्टाविंशतितम (२८) पद्यस्य तृतीयं पदमित्थं पठनीयम्—

"स्थानं मे यदि शक्यतेऽपगतये प्रातस्तदा दीयताम्" इति ।

अर्थश्चास्येति करणीयः—

यदि चेत् शक्यते पार्य्यते तदा प्रातः प्रभाते अपगतये अपगमनाय यथास्थानं गन्तुमित्यर्थः तुमर्थे चतुर्थी । मे मह्यं स्थानं निवासो दीयताम् ।

भिक्षामटतो मे सायं जातम्, इति रात्रौ न हि गन्तुं पारये दूरे स्थितत्वान्मदीयवसतेरिति रात्रिमात्रविश्रमार्थं शक्यते चेत्स्थानं दीयताम्, प्रातस्तूत्थाय गमिष्यामि यथागतमितिभावार्थः । शिष्टं यथोदितम् ।

(४) षष्ठेऽङ्के त्रयोदशं (१३) पद्योत्तरार्धमित्थं व्याख्यातव्यम्—

चतुर्थचरणान्तभागे—"तन्वन्ति तन्वन्तिमे" इत्यत्र ननु अन्ति मे इतिच्छेदः । मे अन्ति इत्यन्वयश्च, तथा हि—

इह संसारे मलमूत्रभाण्डकुहरे, दुःखे, मनीषावतां हेये, एतस्मिन् शरीरे, मे मम अन्ति समीपे (वर्तमानाः) अर्थात् मयि समीपवर्तिनि, के न्यायविदः विद्वांसः विमोहं तन्वन्ति कुर्वन्ति ननु, न केऽपि कुर्वन्तीतिभावः ।

अन्तिरिति समीपार्थेऽव्ययम्, तदेव श्रीमद्भागवते दशमस्कन्धे ब्रह्मस्तुतौ "असन्तमप्यन्त्यहिमन्तरेण, सन्तं गुणं तं किमु यन्ति सन्तः" इत्यत्र अन्ति अहिमिति पदच्छेदः । अन्ति समीपे अहिं सर्पमिति च व्याख्यातारः । एवमत्रापि ज्ञानशर्मण उक्तिरियं सूपयोगा, यन्मे अन्ति मान्तिके (वर्तमानाः) अर्थात् मयि समीपवर्तिनि सति के धीराः शरीरे मोहं कुर्वन्ति ? सति ज्ञाने सर्वे देहगेहादिममत्वं नश्यतीति वेदान्तिनः, शेषं यथोक्तम् ।

श्रीजीवानन्दनस्य षष्ठे सप्तमेऽङ्के च समुद्दिष्टानां रसादिप्रयोगाणां परिचयः।

१—षष्ठेऽङ्के षट्चत्वारिंशत्तमपद्यानन्तरं मन्त्रिणा उक्तौ महातालेश्वरो रसः—

सोऽयं रसावताराद‌वतारितः। रसयोगसागरे प्रथमः।

संशुद्धतालाद्‌ द्विपलं पलार्धं, शिलाहिलेलीतरसायसानाम्।
सजातरूपाभ्रकताम्रताप्य,विषाब्ददन्तीफलटङ्कणानाम्॥ १॥

अर्कस्नुहीधूर्तरसेन सप्त विभावितं ताम्रपुटे विपक्वम्।
मृदूकृतं लाङ्गलिकाकुमारीनिशाविशालाचिरबिल्वनिम्बैः॥ २॥

ज्योतिष्मतीसूरणनीलपुष्पीगदारिवृन्ताकविषाकलिङ्गैः।
सबीजकाऽवल्गुजवाणचक्रत्रिवृत्समङ्गार्तगलाग्निभृङ्गैः॥ ३॥

एषां कषाये स्वरसे विशुद्धो रसो महान्सिद्ध्यति तालकेशः।
प्रणम्य विश्वार्तिहरं दिनेशं शुभेऽह्नि सन्मङ्गलमाददीत॥ ४॥

एवं रसेन्द्रं नियतेन्द्रियस्य समस्तकुष्ठामयनाशनाय।
सितासितोदुम्बरदद्रुभिन्नो विशीर्णनासाङ्घ्रिकरो मनुष्यः॥ ५॥

आख्यातकीर्तिर्न च कापि शक्तिर्न चेह सौख्यं न च वा परत्र।
यतो महापापभवं गदं हि निवारयत्येष रसः प्रसिद्धः॥ ६॥

२—चन्द्रप्रभावटी—(तत्रैव पंचाशत्तम (५०) पद्यानन्तरं मन्त्रिणाउक्तौ निर्दिष्टा) भैषज्यरत्नावल्यामित्थं साधिता—

चन्द्रप्रभा वचा मुस्ताभूनिम्बसुरदारवः।
हरिद्राऽतिविषा दार्वी पिप्पलीमूलचित्रकम्॥ १॥

त्रिवृद्दन्तीपत्त्रकं च त्वगेलावंशलोचना।
प्रत्येकं कर्षमात्राणि कुर्यादेतानि बुद्धिमान्॥ २॥

धान्यकं त्रिफला चव्यं विडङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं व्योषं द्वौ क्षारौ लवणत्रयम् ॥ ३ ॥
एतानि कर्षमात्राणि सङ्गृह्णीयात् पृथक् पृथक् ।
द्विकर्षं हतलौहं स्याच्चतुष्कर्षा सिता भवेत् ॥ ४ ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेभिः कर्तव्या गुटिका शुभा ॥ ५ ॥
चन्द्रप्रभेति विख्याता सर्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥ ६ ॥
चतस्रश्चाश्मरीस्तद्वन्मूत्राघातांस्त्रयोदश,
अण्डवृद्धिं पाण्डुरोगं कामलाञ्च हलीमकम् ।
कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम्
वातपित्तकफव्याधीन्, बल्या वृष्या रसायनी ।
समाराध्य शिवं यस्मात् प्रयत्नाद् गुटिकामिमाम्
प्राप्तवांश्चन्द्रमा देवस्तस्माच्चन्द्रप्रभा स्मृता । इति ।

३—अमृतागुग्गुलुः—तत्रैव मन्त्रिणा समुद्दिष्टः, सोऽयं चक्रदत्तेनेत्थं प्रतिपादितः—

पलमेकं गुडूच्यास्तु अर्धप्रस्थं च गुग्गुलोः ।
प्रत्येकं त्रिफलायाश्च तत्प्रमाणं विनिर्दिशेत् ॥ १ ॥
सर्वमेकत्र संक्षुद्य साधयेत्त्वर्मणेऽम्भसि ।
पादमेकं परिस्राव्य पुनरग्नावधिश्रयेत् ॥ २ ॥
तावत्पचेत्कषायं तं यावत्सान्द्रत्वमागतम् ।
दन्तीव्योषविडङ्गानि गुडूचीत्रिफलात्वचः ॥ ३ ॥
ततश्चार्धपलं पूतं गृह्णीयाच्च पृथक् पृथक् ।
कर्षं च त्रिवृतायास्तु सर्वमेकत्र कारयेत् ॥ ४ ॥
तस्मिन् सुसिद्धं विज्ञाय कवोष्णे प्रक्षिपेद् बुधः ।
ततश्चाग्निबलं ज्ञात्वा तस्य मात्रां प्रदापयेत् ॥ ५ ॥

वातरक्तं तथा कुष्ठं गुदजान्यग्निसाधनम् ।
दुष्टव्रणप्रमेहांश्च सामवातं भगन्दरम् ॥ ६ ॥
नाड्याढ्यवातश्वयथून् सर्वानेतान्व्यपोहति ।
अश्विभ्यां निर्मितः पूर्वममृताख्यो हि गुग्गुलुः ॥ ७ ॥

(अर्धप्रस्थं त्रिफलायाः प्रत्येकमिह गृह्यते) इति ।

४—भूपतिरसः—तत्रैव एकोनाशीतितम (७९) पद्यानन्तरं जीवराजेन समुद्दिष्टः । सोऽयं व्याससंहितायामेवं निरूपितः—

शुद्धविषपारदगन्धकजयपालबीजानि, त्रिकटुकरामठे चैतानि समभागानि विचूर्ण्य चित्रककाथेन सप्तदिनावधि मर्दयित्वा मरिचप्रमाणां वटीं कृत्वा मधुमिश्रितार्द्रकरसेन सेवेत । तदेतेन श्वासकासयुताः सन्निपातदोषा जिह्वादोषाश्च नश्यन्ति । पथ्यं यथोचितम् । इति ।

५—रससिन्दूरम्—तत्रैव तत्समनन्तरमेव दर्शितम् । तदिदं रसेन्द्रकल्पद्रुमादुपलब्धम् । यथा—

पलमात्रं रसं शुद्धं तावन्मात्रं तु गन्धकम् ।
विधिवत्कज्जलीं कृत्वा न्यग्रोधाङ्कुरवारिभिः ॥ १ ॥
भावनात्रितयं दत्वा स्थालीमध्ये निधापयेत् ।
विरच्य कवचीयन्त्रं वालुकाभिः प्रपूरयेत् ॥ २ ॥
दद्यात्तदनु मन्दाग्निं भिषग्यामचतुष्टयम् ।
जायते रससिन्दूरं तरुणादित्यसन्निभम् ॥ ३ ॥
अनुपातविशेषेण करोति विविधान्गुणान् । इति ।

६—ज्वराङ्कुशरसः—अयं रसेन्द्ररत्नकोषे समुल्लसति, यथा—

सोमलं रसगन्धाभ्रं शिलातालकखर्परम् ।
हिङ्गुलं ताम्रभस्माथ मर्दयेत्तुलसीरसे ॥ १ ॥
कारवल्लीरसैः सप्त भावनाश्च पृथक् पृथक् ।
गुडोषणाभ्यां संयुक्तं गुञ्जामात्रं प्रदीयते ॥ २ ॥
सर्वज्वरहरो नाम संनिपातांस्त्रयोदश ।
ऐकाहिकादीन्सकलान्निहन्त्येष ज्वराङ्कुशः ॥ ३ ॥

७—आनन्दभैरवो रसः—रसेन्द्रसारसंग्रहे यथा—

हिङ्गुलं च विषं व्योषं मरिचं टङ्कणं कणा ।
जातीकोषः समं चूर्णं जम्बीरद्रवमर्द्दितम् ॥ १ ॥
रक्तिमानां वटीं कुर्यात्खादेदार्द्रकसंयुताम् ।
वट्या द्वयं त्रयं वापि सन्निपाते सुदारुणे ॥ २ ॥
ज्वरमष्टविधं हन्ति ज्वरातीसारनाशनः ।
जीर्णज्वरहरश्चैव तथा सर्वाङ्गभेदकः ॥ ३ ॥
आमवातादिरोगश्च नाशयेदविकल्पतः । इति ।

८—चिन्तामणिरसः—एष भैषज्यरत्नावल्यां चकास्ति, यथा—

रसविषगन्धकटङ्कणताम्रयवक्षारकञ्च सव्योषम् ।
दन्तीफलद्वयं च क्षौद्रं दत्त्वा शतं वारान् ॥ १ ॥
संमर्द्य रक्तिविमिता वटिका कार्या भिषग्वरैः प्राज्ञैः ।
शुण्ठीपिष्टेन समं चैकां द्वे वाऽथवा तिस्रः ॥ २ ॥
संप्राश्य नारिकेलीजलमनुपेयं प्रयुञ्जीत ।
भेदानन्तरमेव प्रक्षालितभक्तं तक्रञ्च ॥ ३ ॥

सैन्धवजीरकसहितं तक्रं पाने प्रयोक्तव्यम् ।
प्रशमयति सन्निपातज्वरं तथा जीर्णकज्वरं विषमम् ॥ ४ ॥
प्लीहानं चाध्मानं श्वासं कासं च वह्निमान्द्यम् ।
चिन्तामणी रसोऽयं किल स्वयं भैरवेण निर्दिष्टः ॥ ५ ॥ इति ।

९–राजमृगाङ्को रसः–रसेन्द्रसारसङ्ग्रहतो गृहीतः, यथा—

रसभस्मत्रयो भागा भागैकं हेमभस्मकम् ।
मृततारस्य भागैकं शिलागन्धकतालकम् ॥ १ ॥
प्रतिभागद्वयं शुद्धमेकीकृत्य विचूर्णयेत् ।
वराटिका तेन पूर्या चाजाक्षीरेण टङ्कणम् ॥ २ ॥
पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे तां निरोधयेत् ।
शुष्कं गजपुटे पाच्यं चूर्णयेत्स्वाङ्गशीतलम् ॥ ३ ॥
दशपिप्पलिकैः क्षौद्रैर्मरिचैर्वा घृतान्वितैः ।
गुञ्जाचतुष्टयं चास्य क्षयरोगप्रशान्तये ॥ ४ ॥
सघृतैर्दापयेद्वाऽथ वातश्लेष्मभरे क्षये ।
रसो राजमृगाङ्कोऽयं नानारोगनिषूदनः ॥ ५ ॥ इति ।

१०–वातराक्षसः–रसपारिजात इत्थं फलति यथा—

शुद्धं सूतं स्वर्ण-गन्धं कान्तं चाभ्रकमौक्तिकम् ।
ताम्रवैक्रान्तकं सम्यङ् मारयित्वा विनिक्षिपेत् ॥
पुनर्नवागुडूच्यग्निसुरसाभृङ्गसिन्धुकैः ।
पृथक् पृथक् दिनं भाव्यं दद्याल्लघुपुटं ततः ॥
स्वाङ्गशीतं समुद्धृत्य श्लक्ष्णचूर्णं तु कारयेत् ।
वातराक्षसनामाऽयं बिल्वमात्रं प्रयोजयेत् ॥
मधुपिप्पलिमिश्रं च अनुपाने यथाबलम् ।
सर्ववातानशेषांश्च क्षयान् पाण्डून्हलीमकम् ॥

पक्षाघातं धनुर्वातं कम्पमुन्मादकं तथा
निहन्यात्कुरुते दीप्तिं कान्तिपुष्टिबलप्रदः ।

११–पूर्णचन्द्रोदयो रसः–एष रसचाण्ड्यायनादुद्धृतः ।

शुद्धं च तालकं लौहं गगनं च पलं पलम् ।
कर्पूरं पारदं गन्धं प्रत्येकं वटकोन्मितम् ॥
जातीकोषो मुरापत्रं शठीतालीसकेशरम् ।
व्योषं चोचं कणामूलं लवंगं पिचुसंमितम् ॥
भक्षयेत् प्रातरुत्थाय गुरुदेवद्विजार्चकः ।
नानारूपमतीसारं ग्रहणीं सर्वरूपिणीम् ॥
अम्लपित्तं तथा शूलं शूलं च परिणामजम् ।
रसायनवरश्चायं वाजीकरणमुत्तमम् ॥

१२–अग्निकुमारो रसः–भैषज्यरत्नावल्या उल्लासितः ।

रसं गन्धं विषं व्योषं टंकणं लौहभस्मकम् ।
अजमोदाऽहिफेनं च सर्वतुल्यं मृताभ्रकम् ॥
चित्रकस्य कषायेण मर्द्दयेद्याममात्रकम् ।
मरिचाभां वटीं खादेदजीर्णे ग्रहणीं तथा ॥
नाशयेन्नात्र सन्देहो गुह्यमेतच्चिकित्सितम् ।
रसश्चाग्निकुमारोऽयं दीपयत्याशु पावकम् ॥

१३–प्रतापलङ्केश्वरो रसः–अयं रसकामधेनोः प्राप्तः ।

अपामार्गस्य मूलानां चूर्णं चित्रकमूलजैः ।
वल्कलैमर्दयित्वाऽथ रसं निष्पीड्य रक्षयेत् ॥ १ ॥

तेन सूतसमं गन्धमस्तकं दरदं विषम् ।
टंगणं तालकं चैव मर्दयेद्दिनसप्तकम् ॥ २ ॥
त्रिदिनं मुसलीतोयैर्भावयेद्धर्मरक्षितम् ।
मूषां च गोस्तनाकारामापूर्य परिरक्षितम् ॥ ३ ॥
सप्तभिर्मृत्तिकावस्त्रैर्वेष्टयित्वा पुटेल्लघु ।
रसतुल्यं लौहवंगं रजतं ताम्रकं तथा ॥ ४ ॥
मधूकसारजलदौ रेणुका गुग्गुलुः शिला ।
चाम्पेयं च समांशं स्याद्भागार्धं शोधितं विषम् ॥ ५ ॥
तत्सर्वं मर्दयेत्खल्वे भावयेद्भिषनीरतः ।
आतपे सप्तधा तीव्रे मर्द्दयेद्धटिकाद्वयम् ॥ ६ ॥
कटुकत्रिकषायेण कनकस्यरसेन च ।
समुद्रफलनीरेण विजयावारिणा तथा ॥ ७ ॥
चित्रकस्य कषायेण ज्वालामुख्या रसेन च ।
प्रत्येकं सप्तधा भाव्यं तद्वत्पित्तैश्च पंचभिः ॥ ८ ॥
सर्वस्य समभागेन विषेण परिधूपयेत् ।
गुञ्जैकं वन्हिचूर्णेन शृंगवेररसेन च ॥ ९ ॥
ददीत रोगिणां तीव्रमौढ्यविस्मृतिशान्तये ।
क्षुरेण तालुन्याहत्याऽऽर्द्रकनीरेण मर्द्दयेत् ॥ १० ॥
नोद्धाट्यन्ते यदा दन्ता तदा कुर्यादमुं विधिम् ।
सेचयेन्मन्त्रविद्भिश्च धाराकुंभशतैर्नरम् ॥ ११ ॥
भोजनेच्छा यदा तस्य जायते रोगिणः परा ।
दध्योदनं सितायुक्तं दद्यात्तक्रं सजीरकम् ॥ १२ ॥
पाने पानं सिताजातं यदीच्छेत्तत्तदन्तिकम् ।
एवं कृते न शान्तिः स्यात्तापस्य रसजस्य च ॥ १३ ॥
सचन्द्रचन्दनरसालेपनं कुरु शीतलम् ।
तूलिकामल्लिकाजातीपुंनागबकुलावृताम् ॥ १४ ॥
विधाय शय्यां तत्रत्यं लेपयेच्चन्दनैर्मुहुः ।
हावभावविलासोक्तिकटाक्षैश्चावलोकनैः ॥ १५ ॥

पीनोत्तुङ्गकुचोत्पीडैः कामिनीपरिरम्भणैः ।
रम्यवीणानिनादाद्यैर्गायनैः श्रवणामृतैः ॥ १६ ॥
पुण्यश्लोककथाद्यैश्च सन्तापहरणं कुरु ।
एभिःप्रकारैस्तापस्य जायते शमनं परम् ॥ १७ ॥
वर्जयेन्मैथुनं तावद् यावन्न बलवान् भवेत् ।
दद्यात्सर्वेषु वातेषु सिद्धगुग्गुलुवन्हिभिः ॥ १८ ॥
दद्यात्कणामाक्षिकाभ्यां कामलाक्षयपाण्डुषु ।
तत्तद्रोगानुपानेन सर्वरोगेषु योजयेत् ॥ १६ ॥
अयं प्रतापलङ्केशः सन्निपातनिकृन्तनः । इति ।

१४–लङ्केश्वरो रसः–रसेन्द्रचिन्तामणौ भणितः । यथा—

सूताभ्रशुल्वानि च मारितानि सगन्धकं तालशिलाद्रवौ च ।
विषाम्लवेतौ च समं समस्तं दिनत्रयं चाम्लरसैर्विपेश्यम् ॥ १ ॥
समाक्षिकेणैव मृतेन कुर्याद् वटीं द्विगुञ्जां च शतारुहन्त्रीम् ।
लङ्केश्वराख्यस्तु रसः प्रसिद्धो निहन्ति कुष्ठांश्च शतारुकादीन् ॥२॥
फलत्रयं निम्बवचाऽरुणाश्च पटोलमूलं कटुका निशाख्या ।
काथीकृतं चानुपिबेच्च नित्यं लङ्काधिपाख्यं तु रसं निषेव्य ॥ ३ ॥

१५–वसन्तकुसुमाकरो रसः–सोऽयं वाहटादुत्पाटितः । यथा—

हेमतारं प्रवालञ्च वज्रं वैदूर्यमौक्तिकम् ।
अभ्रकं मृतलौहं च द्विगुणं सूतभस्मकम् ॥ १ ॥
वङ्गं नीलं च वैक्रान्तं नागभस्म प्रयोजयेत् ।
एतद्विशुद्धं युञ्जीत भावनेक्षुगणेन च ॥ २ ॥
शतपत्त्रप्रसूनोत्थैर्मालत्याः कुसुमाम्बुभिः ।
पश्चान्मृगमदैर्भाव्यः सुसिद्धो रसराड् भवेत् ॥ ३ ॥
मधुना सर्पिषा दध्ना गुञ्जामात्रप्रमाणतः ।
क्षयकासारुचिश्वासशोथपाण्ड्वामयांस्तथा ॥ ४ ॥

मूत्रकृच्छ्राश्मरीं हन्ति मेहानां विंशतिं तथा ।
ग्रहणीं कामला चैव सर्वरोगव्रणं तथा ॥ ५ ॥
शूलाध्मानौ वन्हिनाशं कामदः पुष्टिवर्धनः ।
रेतोवृद्धिकरः पुंसां प्रजाजननमुत्तमम् ॥ ६ ॥
कुसुमाकरविख्यातो वसन्तपदपूर्वकः । इति ।

१६–सुवर्णभूपतिरसः—सोऽयं रसपारिजाततोऽवचितः ।

शुद्धं सूतं समं गन्धं मृतं शुल्वं तयोः समम् ।
अभ्रलौहकयोर्भस्म कान्तभस्म सुवर्णजम् ॥ १ ॥
रजतं च विषं सम्यग् पृथक् सूतसमं भवेत् ।
हंसपादीरसैर्मर्द्य दिनमेकं वटीकृतम् ॥ २ ॥
काचकूप्यां विनिक्षिप्य मृदा संलेपयेद्बहिः ।
शुष्कां तां बालुकायन्त्रे शनैर्मृद्वग्निना पचेत् ॥ ३ ॥
चतुर्गुञ्जामितं देयं पिप्पल्यार्द्रद्रवेण तु ।
क्षयं त्रिदोषजं हन्ति संनिपातांस्त्रयोदश ॥ ४ ॥
आम्रवातं धनुर्वातं शृंखलावातमेव च ।
आढयवातं पङ्गुवातं कफवाताग्निमान्द्यनुत् ॥ ५ ॥
कटीवातं सर्वशूलं नाशयेन्नात्र संशयः ।
गुल्मशूलमुदावर्तं ग्रहणीमतिदुस्तराम् ॥ ६ ॥
प्रमेहमुदरं सर्वामश्मरीं मूत्रविड्ग्रहम् ।
भगन्दरं सर्वकुष्ठं विद्रधिं महतीं तथा ॥ ७ ॥
श्वासं कासमजीर्णं च ज्वरमष्टविधं तथा ।
कामलां पाण्डुरोगं च शिरोरोगं च नाशयेत् ॥ ८ ॥
अनुपानविशेषेण सर्वरोगान्विनाशयेत् ।
यथा सूर्योदये नश्येत्तमः सर्वगतं तथा ॥ ९ ॥
सर्वरोगविनाशाय सर्वेषां स्वर्णभूपतिः । इति ।

१७–बड़वानलचूर्णम्–तदिदं चक्रदत्तादुपात्तम् । यथा—

सैन्धवं पिप्पलीमूलं पिप्पलीचव्यचित्रकम् ।
शुण्ठी हरीतकी चेति क्रमबद्धानि चूर्णयेत् ॥ १ ॥
बडवानलनामैतच्चूर्णं स्यादग्निदीपनम् । इति ।

१८–सुदर्शनचूर्णम्–तदिदं भावप्रकाशत आसादितम् ।

त्रिफला रजनीयुग्मं कण्टकारीयुगं शठी ।
त्रिकटुग्रन्थिकं मूर्वा गुडूची धन्वयासकः ॥ १ ॥
कटुका पर्पटी मुस्तं त्रायमाणा च बालकम् ।
निम्बः पुष्करमूलं च मधुयष्टी च वत्सकम् ॥ २ ॥
यवानीन्द्रयवो भार्ङ्गी शिग्रुबीजं सुराष्ट्रजा ।
वचा त्वक् पद्मकोशीरं चन्दनातिविषा बला ॥ ३ ॥
शालिपर्णी पृष्टिपर्णी विडङ्गं तगरं तथा ।
चित्रको देवकाष्ठं च चव्यं पत्रं पटोलजम् ॥ ४ ॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचना ।
पुण्डरीकं च काकोली पत्रकं जातिपत्रकम् ॥ ५ ॥
तालीसपत्रं च तथा समभागानि चूर्णयेत् ।
सर्वचूर्णस्य चार्धांशं कैरातं निक्षिपेत्सुधीः ॥ ६ ॥
एतत्सुदर्शनं नाम चूर्णं दोषत्रयापहम् ।
ज्वरांश्च निखिलान्हन्यान्नात्र कार्या विचारणा ॥ ७ ॥
पृथग् द्वन्द्वागन्तुजांश्च धातुस्थान्विषमज्वरान् ।
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत् ॥ ८ ॥
शीतज्वरैकाहिकादीन्मोहं तन्द्रां भ्रमं तृषाम् ।
श्वासं कासं च पाण्डुं च हृद्रोगं हन्ति कामलाम् ॥ ९ ॥
त्रिकपृष्ठकटीजानुपार्श्वशूलनिवारणम् ।
शीताम्बुना पिबेद्धीमान् सर्वज्वरनिवृत्तये ॥ १० ॥

सुदर्शनं यथा चक्रं दानवानां विनाशनम् ।
तद्वज्ज्वराणां सर्वेषामिदं चूर्णं प्रणाशनम् ॥ ११ ॥ इति ।

१९–वातकुठारो रसः–सोऽयं व्याससंहितायामाहितः । यथा—

शुद्धपारदगन्धकविषटङ्कणतालकजयपालबीजानि लवंगत्रिकटु-त्रिफलाश्च समभागानि भृंगार्द्रकरसाभ्यां प्रतियामचतुष्टयं विमर्द्य मरिचाभां वटीं कृत्वाऽऽर्द्रकरसानुपानेन मधुना सह सकलपित्तज्वरेषूपयोजनीयम् । पथ्यं रोगानुरूपम् । इति ।

२०–प्रमेहकुंजरकेसरी रसः–रसकल्पलतायामुपकल्पितः । यथा—

रसगन्धकताम्राभ्रजयावङ्गान् क्रमोत्तरम् ।
भागाः स्युस्तुलितास्तत्र गुडूचीसत्त्वसम्भवाः ॥ १ ॥
विमर्द्य मुसलीरंभाशाल्मलीगोक्षुरद्रवैः ।
द्विमाषं ससितं खादेन्मेहकुञ्जरकेसरी ॥ २ ॥

२१–वातविध्वंसनरसः–बृहद्योगतरङ्गिण्यां तरङ्गितः । यथा—

रसं गन्धकं नागवङ्गौ च लौहं
तथा ताम्रजं व्योमनिश्चन्द्रकं च ।
कणा टंगणं चोषणं नागरं वै
पृथक् भागमेकं विमर्द्यैकयामम् ॥ १ ॥
ततो वत्सनाभं चतुःसार्धभागं
दृढं मर्दयेद्भावना व्योषजा त्रिः ।
वरा चित्रकैर्मार्कवैः कुष्ठतोयै—
स्तथा कारहाटैः सनिर्गुण्डितोयैः ॥ २ ॥

मनो धात्रिकैरार्द्रकैर्निम्बुनीरैः
त्रिभिर्भावयेद्वातविध्वंसनोऽयम् ।
समीरे च शूले महाश्लेष्मरोगे
ग्रहण्यां तथा संनिपाते च मौढ्ये ॥ ३ ॥
अपस्मारमान्द्ये सशैत्ये सपित्तो-
दरप्लीहकुष्ठार्शसि स्त्रीगदे च ।
निषेवेत गुंजाद्वयं चास्य तत्त—
द्गदघ्नानुपानैरयं रोगजित्स्यात् ॥ ४ ॥ इति ।

---

(२)

सप्तमेऽङ्के द्वितीये पद्ये जीवराजोक्तौ—

१—गुटिकाबन्ध (भेदः) रसज्ञानात्सङ्कलितः । यथा—

चतुर्विंशतिधान्यानां संचुर्णं रजतं स्मृतम् ।
शुल्वमष्टादशमितं रुक्मं सार्धचतुष्टयम् ॥ १ ॥
एतद्यन्त्रे समुत्काल्य कूपिकां कारयेद्दृढाम् ।
सूचीमुखप्रमाणेन पूर्वोक्तं सूतकं क्षिपेत् ॥ २ ॥
ततश्च मुद्रणं कृत्वा तेन त्रितयकेन तु ।
प्राशयेत्तच्छुभे योगे निर्गच्छेद्गुदमार्गतः ॥ ३ ॥
पुनः प्रक्षाल्य तद्बद्धेत् प्रयत्नेन च धीमता ।
देहो हाटकवत्तस्य षण्मासाज्जायते ध्रुवम् ॥ ४ ॥
वीर्य-स्तम्भो न शस्त्राणि प्रहितानि लगन्ति हि ।
सम्वत्सराद्भवेत्सिद्धिः शृणु कौतूहलं परम् ॥ ५ ॥
वक्त्रे निक्षेपमात्रेण सर्वसिद्धिः प्रजायते ।
यं यं प्रार्थयते कामं तं तमाप्नोति निश्चितम् ॥ ६ ॥
वङ्गं स्तम्भयते सम्यङ्नात्रकार्या विचारणा ।
लभते भाग्ययोगेन नान्यथा यतिरब्रवीत् ॥ ७ ॥ इति ।

२–पंचभद्रकषायः–

छिन्नोद्भवापर्पटवारिवाहभूनिम्बशुण्ठीजनितः कषायः।
समीरपित्तज्वरजर्जराणां करोति भद्रं खलु पञ्चभद्रः॥१॥ इति।

३–त्रैलोक्यचिन्तामणिः–अयं रसचण्डांशुतोऽवगलितः। यथा–

भागद्वयं स्वर्णभस्म द्विभागं तारमभ्रकम्।
लौहात्पंच प्रवालं च मौक्तिकं वन्हिभागिकम्॥ १॥
भस्मसूतं सप्तभागं सर्वं मर्द्यन्तु कन्यया।
छायाशुष्का वटी कार्या छागीदुग्धानुपानतः॥ २॥
क्षयं हन्तिं तथा कासं गुल्मं चापि प्रमेहनुत्।
जीर्णज्वरहरश्चायमुन्मादस्य निकृन्तनः॥ ३॥
सर्वदोषहरश्चापि वारिदोषनिवारणः। इति।

४–ग्रहणीकपाटो रसः–सोयं भैषज्यरत्नावल्याम्।

मुक्ता सुवर्णं रसगन्धटङ्कणं घनं कपर्दोऽमृततुल्यभागम्।
सर्वैः समं शङ्खकचूर्णयुक्तं खल्वे च भाव्योऽतिविषाद्रवेण॥ १॥
गोलं च कृत्वाऽमृतकर्करस्थं संरुद्ध्य चाग्नौ हि पचेद्दिनार्धम्।
सुस्वाङ्गशीतो रस एष भाव्यो धत्तूरवह्न्योर्मुसलीद्रवैश्च॥ २॥
लौहस्य पात्रे परिपाचितश्च शुद्धो भवेत् संग्रहणीकपाटः।
वातोत्तरायां मरिचाज्ययुक्तः पित्तोत्तरायां मधुपिप्पलीभिः॥ ३॥
श्लेष्मोत्तरायां विजयारसेन कटुत्रयेणापि युतो ग्रहण्याम्।
क्षये ज्वरेऽप्यर्शसि विड्विकारे सामातिसारेऽरुचिपीनसे च॥ ४॥
मोहे च कृच्छ्रे गतधातुवृद्धौ गुञ्जाद्वयं चापि महामयघ्नम्। इति।

५–पंचामृतपर्पटी रसः–सोऽयं रसचण्डांशुतः समुत्फाणितः। यथा–

अष्टौ गन्धकमाषका रसदलं लौहं तदर्धं शुभम्।
लौहार्धं च वराभ्रकं सुविमलं ताम्रं तथाऽभ्रार्धकम्॥
पात्रे लौहमये च मर्दनविधौ चूर्णीकृतं चैकतः।
दर्व्या बादरवह्निनातिमृदुना पाकं विदित्वा दले॥ १॥

रंभाया लघु ढालयेत्पटुरियं पंचामृता पर्पटी।
ख्याता क्षौद्रघृतान्विता प्रतिदिनं गुञ्जाद्वयं वृद्धितः॥
लौहे मर्दनयोगतः सुविमलं भक्ष्यक्रिया लौहवत्।
गुञ्जाऽष्टावथवा त्रिकं त्रिगुणितं सप्ताहमेवं भजेत्॥ २॥

नानावर्णग्रहण्यामरुचिसमुदये दुष्टदुर्नामकादौ।
छर्द्यां दीर्घातिसारे ज्वरभवकसिते रक्तपित्ते क्षयेऽपि॥
वृष्याणां वृष्यराज्ञी वलिपलितहरा नेत्ररोगैकहन्त्री।
तत्स्थं दीप्तस्थिराग्निः पुनरपि नवकं रोगिदेहं करोति॥ ३॥
पाकोऽस्यास्त्रिविधः प्रोक्तो मृदुर्मध्यः खरस्तथा।
आद्ययोर्दृश्यते सूतः खरपाके न दृश्यते॥ ४॥

मृदौ न सम्यग् भंगः स्यान्मध्ये भंगश्च रौप्यवत्।
खरे लघुर्भवेद्भंगो रूक्षः श्लक्ष्णोऽरुणच्छविः॥ ५॥
मृदुमध्यौ तथा खाद्यौ खरस्त्याज्यो विषोपमः। इति।

६–सूक्ष्मैलादिचूर्णम्–तदिदं चरकतश्चाश्रितम्। यथा—

एलापत्रत्वचोऽर्धाक्षा पिप्पल्यर्धपलं तथा।
सितामधूकखर्जूरमृद्वीकाश्च पलोन्मिताः॥ १॥
संचूर्ण्य मधुना युक्ता गुटिकां संप्रकल्पयेत्।
अक्षमात्रां ततश्चैकां भक्षयेन्नादिने दिने॥ २॥
कासं श्वासं ज्वरं हिक्कां छर्दिं मूर्छां मदं भ्रमम्।
रक्तनिष्ठीवनं तृष्णां पार्श्वशूलमरोचकम्॥ ३॥

शोषप्लीहाढ्यवातांश्च स्वरभेदं क्षतं क्षयम् ।
गुडिका तर्पणी वृष्या रक्तपित्तं च नाशयेत् ॥ ४ ॥ इति ।

७—गोक्षुरादिचूर्णम्—चक्रदत्ते संचितम् । यथा—

गोक्षुरकः क्षुरकः शतमूली वानरिनागबलातिबला च ।
चूर्णमिदं पयसा निशि पेयं यस्य गृहे प्रमदा शतमस्ति ॥ १ ॥ इति ।

८—त्रिविक्रमरसः—एष रसचिन्तामणेरधिगतः । यथा—

मृतताम्रमजाक्षीरे पाच्यं तुल्ये गते द्रवे ।
तत्ताम्रं शुद्धसूतं च गन्धकं च समं समम् ॥ १ ॥
निर्गुण्डयुत्थद्रवैर्मर्द्य दिनं तद्गोलमन्धयेत् ।
यामैकं वालुकायन्त्रे पाच्यं योज्यं द्विगुञ्जकम् ॥ २ ॥
बीजपूरस्य मूलन्तु सजलं चानुपाययेत् ।
रसस्त्रिविक्रमो नाम्ना मासैकेनाश्मरीप्रणुत् ॥ ३ ॥ इति ।

९—विष्यन्दनतैलम्—भैषज्यरत्नावल्यां तरलितम् । यथा—

चित्रकार्कौ त्रिवृत्पाठे मलपूहयमारकौ ।
सुधां वचां लाङ्गलिकीं हरितालं सुवर्चिका ॥ १ ॥
ज्योतिष्मतीं च संहृत्य तैलं धीरो विपाचयेत् ।
एतद्विष्यन्दनं नाम तैलं दद्याद्भगन्दरे ॥ २ ॥
शोधनं रोपणं चैव सावर्ण्यकरणं परम् । इति ।

१०—लघुलङ्केश्वरो रसः—रसकामधेनोर्दुग्धः । यथा—

[मृ]ताभ्रशुल्वानि च मारितानि सगन्धकं तालशिला द्रवौ च ।
[ज]याम्लवेतौ च समं समस्तं दिनत्रयं चाम्लरसैर्विपेष्यम् ॥ १ ॥

समाक्षिकेणैव मृतेन कुर्याद्वटीं द्विगुंजां च शतारुहन्त्रीम् ।
लंकाधिपाख्यस्तु रसः प्रसिद्धो निहन्ति कुष्ठांश्च शतारुकादीन् ॥ २ ॥

फलत्रयं निम्बवचारुणे च पटोलमूलं कटुका निशाख्या ।
क्वाथीकृतं चानुपिवेच्च नित्यं लङ्काधिपाख्यं तु रसं निषेव्य ॥ ३ ॥ इति ॥

११–नित्योदितो रसः–स एव रसमञ्जर्य्यामङ्कुरितः ।

मृतसूताभ्रलौहार्कविषं गन्धं समं समम् ।
सर्वतुल्यं तु भल्लातफलमेकत्र चूर्णयेत् ॥ १ ॥

द्रवैः शूरणकन्दोत्थैः खल्वे मर्द्यं दिनत्रयम् ।
लिहेदाज्यैर्माषमात्रं रसश्चार्शांसि नाशयेत् ॥ २ ॥

नित्योदितो रसो नाम गुदोद्भवकुलान्तकः । इति ।

१२–विद्याधरो रसः–भैषज्यरत्नावल्यां विभाति । यथा—

पारदं गन्धकं तालं ताप्यं स्वर्णं मनःशिलाम् ।
कृष्णा क्वाथैः स्नुहीक्षीरैर्दिनैकं मर्द्दयेत्सुधी ॥ १ ॥

निष्कार्धं श्लैष्मिकं गुल्मं हन्ति मूत्रानुपानतः ।
रसो विद्याधरो नाम गोदुग्धं तु पिबेदनु ॥ २ ॥ इति ।

१३–त्रिनेत्ररसः–रससारसंग्रहे मिलति । यथा—

रसताम्रगन्धकानां द्विगुणान्तरवर्धितांशानाम् ।
हस्तेन मर्दितानां पुटपक्वानां निषेवितं भस्म ॥ १ ॥

गुञ्जाप्रमाणमार्द्रकसिन्धूद्भवचूर्णसंयुक्तम् ।
सैरण्डतैलमाक्षिकमथवा तद्धिङ्गुदुग्धकोपेतम् ॥ २ ॥

शमयति शूलमशेषं तत्तद्रसभावितं बहुशः ।
उपचूर्णैरनुपानैस्तैस्तैः सहितं कफानिलार्तिहरम् ॥ ३ ॥

एतच्च हरिणश्टङ्गं मृतकाञ्चनहरिणटङ्कणोपेतम् ।
सघृतमधु पक्तिशूलं शमयति नक्तं त्रिनेत्ररसः ॥ ४ ॥ इति ।

-महावह्निरसः—वैद्यचिन्तामणौ ज्वलति । (प्रकाशते)

चतुः सूतस्य गन्धाष्टौ रजनी त्रिफला शिला ।
प्रत्येकं च त्रिभागं स्यात्त्रिवृज्जैपालचित्रकम् ॥ १ ॥
प्रत्येकं च त्रिभागं स्याद्दन्ती त्र्यूषणजीरकम् ।
प्रत्येकमष्टभागं स्यादेकीकृत्य विचूर्णयेत् ॥ २ ॥
जयन्ती स्नुक्पयो भृङ्गवह्निवातारितैलकैः ।
प्रत्येकेन क्रमाद्भाव्यं सप्तवारं पृथक् पृथक् ॥ ३ ॥
महावह्निरसो नाम्ना निष्कमुष्णजलैः पिबेत् ।
विरेचनं भवेत्तेन तक्रं भुक्तं ससैन्धवम् ॥ ४ ॥
दिवान्ते दापयेत्पथ्यं वर्जयेच्छीतलं जलम् ।
सर्वोदरहरः प्रोक्तः श्लेष्मवातहरः परः ॥ ५ ॥ इति ।

-गिरिकर्ण्यादिविधिः—

गिरीकर्णीफलं मूलं सजलं नस्यमाचरेत् ।
मूलं वा बन्धयेत् कर्णे निहन्त्यर्धशिरोरुजम् ॥ १ ॥

-गुञ्जातैलम्—भैषज्यरत्नावल्यामुत्प्लवते । यथा—

विशुद्धं तिलतैलं च तत्समं काञ्जिकं भवेत् ।
आरनालसमं भृंगद्रवं कृत्वा प्रदापयेत् ॥ १ ॥
मन्दाग्निना ततः पाच्यं यावत्तैलस्थितिर्भवेत् ।
तैलमध्ये प्रदातव्यं पिष्टा गुञ्जापलद्वयम् ॥ २ ॥
उत्तार्य तैलशेषं तु दिनैकं तत्तु रक्षयेत् ।
शिरोरोगेषु दुष्टेषु अर्धशीर्षे सुदारुणे ॥ ३ ॥
भ्रूशंखकर्णपीडाश्च नश्यन्ति नात्र संशयः ।
गुञ्जातैलमिति ख्यातं दत्तं हन्ति शिरोव्यथाम् ॥ ४ ॥ इति ।

१७–चन्द्रोदयावर्तिः–भैषज्यरत्नावल्यां वेल्लिता । यथा—

हरीतकी वचा कुष्ठं पिप्पली मरिचानि च ।
बिभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला ॥ १ ॥
सर्वमेतत्समाहृत्य छागीक्षीरेण पेषयेत् ।
नाशयेत्तिमिरं कण्डूं पटलान्यर्बुदानि च ॥ २ ॥
अधिकानि च मांसानि येन रात्रौ न दृश्यते ।
अपि द्विवार्षिकं पुष्पं मासेनैकेन साधयेत् ॥ ३ ॥
वर्तिश्चन्द्रोदया नाम नृणां दृष्टिप्रसादनी ।
हरीतकी हरिद्रा च पिपल्यो लवणानि च ॥ ४ ॥
कण्डूतिमिरजिद्वर्त्तौ न क्वचित्प्रतिहन्यते । इति ।

१८–सिद्धार्थको योगः–चक्रदत्तेनाधिकृतः । यथा—

सिद्धार्थको हिङ्गु वचाकरञ्जौ देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता कटभीत्वक् कटुत्रिकम् ॥ १ ॥
समांशानि प्रियङ्गुश्च शिरीषो रजनीद्वयम् ।
वस्तमूत्रेण पिष्टोऽयमगदः पानमञ्जनम् ॥ २ ॥
नस्य मालेपनं चैव स्नानमुद्वर्तनं तथा ।
अपस्मारविषोन्मादकृत्याऽलक्ष्मीज्वरापहः ॥ ३ ॥
भूतेभ्यश्च भयं हन्ति राजद्वारे च शस्यते ।
सर्पिरेतेन सिद्धं वा सगोमूत्रं तदर्थकृत् ॥ ४ ॥ इति ।

१९–नवायसचूर्णम्–चक्रदत्ते समुदाहृतम् । यथा—

त्र्यूषणं त्रिफला मुस्तं विडङ्गं चित्रकाः समाः ।
नवायोरजसो भागास्तच्चूर्णं मधुसर्पिषा ॥ १ ॥
भक्षयेत्पाण्डुहृद्रोगकुष्ठार्शःकामलापहम् । इति ।

॥ श्रीः ॥

श्रीजीवानन्दननाटकस्य शुद्धिपत्त्रम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१	५	कल्पतकरून्	कल्पकतरून् ।
१	८	किममीवृता	किममी वृता ।
३	४	मनुष्यशरीरं	मनुष्यत्वम् ।
३	१७	जीवराजयस्य	जीवराजस्य
३	२३	देवं द्विज	देवद्विज
५	२०	द्रष्टुमिच्छा	द्रष्टुमिच्छा
६	१५	संनह्यन्ति	संनह्यन्ति
११	१८	दीर्घप्लुत—	दीर्घप्लुतम्
११	१६	प्रायोवर्ण—	प्रायो वर्ण—
१२	२	संयुक्ता संलापं	संयुक्ताः संलापं
१२	६	पंच भिदा	पञ्च भिदा
१२	१६	विहृत्य	विहृत्य
१३	१६	विस्रम्भं यथा तथा	विस्रम्भेण
१३	१६	द्वारदेशे	द्वारदेशेषु
१४	४(टिप्पण्यां)	प्रतिद्वन्दिनो	प्रतिद्वन्द्विनो
१५	१७	नवेति	न वेति
१६	३	वक्ष्यमाणत्वात्	अमरकोषोक्तेरग्रेवक्ष्यमाणत्वात् ।
१७	२५	विदती (?)	विदती
२०	८	सम्प्रति रसम्प्रति	सम्प्रतिरसम्प्रति ।
२१	१३	दुर्जातेः	दुर्जाते
२१	२३	शालीनतां सन्त्यजन्	शालीननतामत्यजन्
२१	२१	गृहीतव्यः	ग्रहीतव्यः
२२	६	परिगमयन्	परिणमयन्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२३	१६	तद्बोध	तद्बोध
२४	१५	वर्णता	वर्णताः
२४	१६	मात्स्न्यादयः	मात्स्न्यादयः
२४	१६	औषध्यादयो	औषध्यादयः
२५	१३	द्विविधा	द्विविधाः
२६	८	किट्टरूपं	किट्टरूपं
२६	१५	सत्सौहार्दं	सत्तत्सौहार्दं
२६	२०	फलकर्मैव	मप्यफलकर्मैव ।
२७	६	रन्तः पुरचारिका	रन्तःपुरचारिका
२७	२३	द्रष्टुं	द्रष्टुं
२८	१०	चाकचिक्येन	चाकचक्येन
२९	२३	प्रकर्षेणोल्लसत्	निःसीमं प्रसरत्
२९	२४	लालिमा	रक्तिमा
३०	१४	वहत्पराङ्गं	वहदपराङ्गं
३२	८	योक्रं	योक्त्रं
,,	,,	,,	,,
३४	१	लक्षणार्थो	लक्षणार्थे (र्थो)
३४	१०	हरिणा	हरिणा
३६	६	न्तरमाकाशः	न्तराकाशः
३६	१८	तद् ज्ञानेन	तज्ज्ञानेन
३७	११	इति । आचार्यरामावतारः	इत्याचार्यरामावतारः ।
३७	१६	सह	तह
३७	१(टिप्पण्यां)	घनोद्घन	घनाघन
३८	१६	ऽङ्कइरितः	ऽङ्क इति कीर्तितः
३९	३	शृण्वत्	शृण्वन् (एवमन्यत्रापि)
४०	२३	तत	तत्
४१	६	पीडणादं	पडिणादं
४३	२	शणु	शृणु

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
४३	१४	प्रच्छ	पृच्छ
४३	२०	,,	,,
४४	५	वद्दन्दि	वट्टन्दि
४४	१३	भट्टिणि ।	भट्टिणि !
४६	१२	आरक्को इषदक्को संकुचन्तो अपाङ्गो,	आकुञ्चईषदक्कः संकुचन्नपाङ्गो।
४६	२०	जृम्भावसरेत्यादि	जृम्भावसर इत्यादि
४७	१८	वारिश्वित्यादि	वारिष्वित्यादि
४८	७	दृढ़यति	द्रढयति
४८	६	प्रसङ्ग	प्रसङ्गः
४८	१८	षडपिध्वतयो	षडपध्वतयो
५०	८	त्रुट्यन्तो	त्रुटन्तो
५१	७	पुरम्	पुरं
५१	२०	अम्भोधिर्मो	अम्भोधिर्मो
५१	२२	विपीत्यादि	विटपीत्यादि
५२	६	उदञ्चन्	उदञ्चन्
५४	१०	ईप्सवो अभि	ईप्सवोऽभि
५५	१ (टिप्पण्यां)	विघसो नाम यज्ञशिष्टमन्नं	विघसो नाम शिवभोजनावशिष्टमन्नं शिवप्रसाद इति यावत् ।
५६	१४	वर्षणां	वर्षणं
५६	१८	पित्तर्योयुगं	पित्तयोर्युगं
५७	१८	पुण्डरीकपुरेत्यादि	पुण्डरीकपुर इत्यादि ।
५८	२२	उच्छ्रङ्खलं	उच्छृङ्खलं
५९	११	श्रयताम्	श्रूयताम्
६२	२३	द्वितीयोऽङ्क	द्वितीयोऽङ्कः
६४	१५	अये:	अये
६५	३	ताराणि शुद्धानि	ताराणि अत्युच्चैरुच्चरितानि, निर्भयानीति यावत्
६५	६	जन्यतेऽसौ	जन्यन्त इति

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
६५	२३	भवानिमाम्	भवानिमम्
६७	१८	दर्शिता स्तारकाः	दर्शिता तारका
६८	४	प्रभृष्ट	प्रभ्रष्ट
६८	५	स्वसेङ्कत	स्वसङ्केत
,,	६	अभिसारिका, परनारी वा	अभिसारिकाः परनारीर्वा
,,	१४	प्रसादाधिरूढः	प्रासादाधिरूढः
,,	१५	मन्त्रीः—	मन्त्री
७०	१४	भूमी उद्विजेत	भूमी मा उद्विजेत
७०	२(टिप्पण्यां)	येषा स्तेषु	येषां तेषु
७१	१६	वर्णानि	वर्णानि
७३	७	धौरेय	धौरेय !
७३	३(टिप्पण्यां)	सत्यन्यथा	सक्त्यन्यथा
७३—७४	१७—१	वाद्यविशेषाणि	वाद्यविशेषाः
७४	१(टिप्पण्यां)	एवं भूता	एवं भूताः
,,	४ ,,	मञ्जर्थः	मञ्जर्य्यः
७५	२१	समेष्टिताः	सम्वेष्टिताः
७६	८	निमज्य	निमज्ज्य
७६	१६	लम्मयता	लम्भयता
७६	१७	मेघोऽम्बर	मेघोऽम्बरं
७७	४	मन्त्रीः--	मन्त्री
७७	१६	निरोगी	नीरोगी
७९	१४, १६, १७	राजाः, देवीः, राजाः–	राजा—देवी—राजा—
८१	२, ६	द्दष्टव्य	द्रष्टव्य
,,	६	मुक्रा	मुक्त्वा
,,	२१	बद्धा	बद्ध्वा
,,	२६	शिवारूढाङ्क	शिवारूढाङ्क
८२	६	अङ्कमुत्सङ्गो	अङ्क उत्सङ्गो
८३	६	अपुण्यायाश्र	अपुण्यायाश्च

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
८५	३	णाणित्तणं	णीणत्तणं
८५	११	सम्भूत इत्यादि	सम्भूते इत्यादि
८६	२	नाशाच्छे	नासाच्छे
८७	४	बलि अंरोस	बलि अरोस
८७	७	अन्ते उखेदि	अन्ते उरवेदि
८७	१२	वद्दति	वट्टदि
८८	१	तिह्वाए	तिह्णाए
८८	५	द हि	दहि
,,	,,(टिप्पण्यां)	विषङ्कटा	विशङ्कटा
,,	,, ,,	पात्रविशेषा	पानपात्रविशेषाः
८९	३	पखिक्क	परिवक्क
८९	११	चुह्वि	चुह्लि
८९	१(टिप्पण्यां)	कृन्तानि	कृत्तानि
९०	१	हिङ्ग	हिङ्गु
९०	५	किं विं	किं वि
९०	७	गेह्वदु	गेह्णदु
९०	१२	गिह्वि	गिह्णि
९१	४	प्रसादो	प्रासादो
९१	२२	तृप्यतः	तृप्यन्तः
९३	२२	शालिगोप्तुः	शालिगोप्त्री
९४	५	माणवनं संभादिदं	माणवानां संभाविदं
९६	७	वा आमेत्तेण	वाआ मेत्तेण
९८	६	कञ्चुल्या	कन्चुल्या
९८	२(टिप्प०)	मुपवेष्टं	मुपवेष्टुं
९९	३	कन्दलितारिवल	कन्दालिताखिल
९९	१(टिप्पण्यां)	तदीये	तदीयैः
,,	,,	रूपै अमृत	रूपैरमृत
१००	२	धर्मे	धर्मं

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१००	१७	अंभो	हंहो
१०३	७	अणुग्गाहीदम्	अणुग्गाहीदुम्
१०३	२१	अकारणा	निष्कपटा
१०४	१९	निर्गत आगो	निर्गतमागो
१०६	१७	नाना शा	नानाशा
१०८	२२	कुरुवकस्य	कुरवकस्य
१०९	२१	शैथिल्प	शैथिल्य
१०९	२६	किंअमालेत्यादि	किंअमाले इत्यादि
११०	९	श्रणुमस्तावत्	शृणुमस्तावत्
११०	२१	घना एव पुष्पाणि	घनपुष्पाणि, जलान्येव घनान्यविरलानि पुष्पाणि
११२	१८	मन्दाशुत्वात्	मन्दांशुत्वात्
११३	२१	उद्यतः	उद्यत्याः
११५	२	मुहुतुन्दिर	महुतुन्दिल
११५	१४	गृहीतव्यः	ग्रहीतव्यः
११५	१८	शरीरार्धवयवाः	शरीरार्धावयवा
११६	२	तिह्वा	तिहृणा
११६	५	चकोर	चओर
११६	१२	वि अ	विअ
११७	९	प्रतीचिजलधौ	प्रतीचि जलधौ
११९	१७	शब्दोः	शब्दो
१२४	१६	न वदसि किमुत्तरं कथं	न वदसि किमुत्तरं
१२६	१८	मुज्वलं	मुज्ज्वलं
१२७	१७	दृष्ट्याः	द्रष्ट्याः
१२८	१८	बहुधापजसोऽपि	बहुधोपजसोऽपि
१२९	४	श्रणु	शृणु
१२९	७	सेनासनाहं	सेनासंनाहं
१३३	१७	शैलानां	शिखराणां

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१३४	१८	मूर्धगः उरः	मूर्धगः । उरः
१४१	७	यात्युदिश्य	यान्युद्दिश्य
१४२	५	दष्टव्यं	द्रष्टव्यं
१४३	६	इदानी मनुक्रियन्ते	इदानीं क्रियन्ते
१४४	१३	विमच्येत	विमुच्येत
१४४	१५	एतदेव–	एतदेव
१४५	१	दष्टव्यम्	द्रष्टव्यम
१४७	२	माधारमेषो	माधारमेषां
१४८	१६	तत्तकार्य्ये	तत्तत्कार्य्ये
१५०	१५	अन्तिमे	अन्ति मे
१५२	८	स्वमेव व्यक्ती भविष्यति	स्वयमेव व्यक्ती भविष्यति
१५८	१०	भुवमलोक्य	भुवमवलोक्य
१५९	१८—१९	वा रसाला शिखरण इति भाषायां–(इति निष्कासनीयम्)	
१६१	१५	श्रृणु	शृणु
१६१	२३	धूमो अत	धूमोऽत
१६७	२१	धातुरुप	धातुरूप
१६८	४	इत्युत्थाय	इत्युत्थाय
१७०	८	श्लेष्मप्रभृतीन	श्लेष्मप्रभृतीन्
१७१	८	दसणम्	दंसणम्
१७४	१६	एतस्यौ	एतस्यै
१७७	८	स्पर्धेते	स्पर्धते
१७८	१६	शम्बूकावर्त्तोन्मार्गिगा:	शम्बूकावर्त्तोन्मार्गगाः
१८०	८	पावदो	पाविदो
१८६	१६	विगृहीतव्यौ	विग्रहीतव्यौ
१८९	२६	पत्रलता	पत्त्रलता
१९०	१८	आहूतम्	आहतम्
१९७	२४	मुज्वलानां	मुज्ज्वलानां
१९८	६	त त्वतः	तत्त्वतः
१९९	१६	च्छैदात्	च्छेदात्
२०१	६	बद्धा	बद्ध्वा
२०४	९	वह्याश्च	वाह्याश्च